

# Grammatical Analysis of

# Srimad Bagavad Gita

(Padacheda, Padaparichaya, Padartha, Anvaya, Thathparyam
and Grammatical portions for all the Shlokas)

## Part 3 - Chapters : 13 To 18

# GRAMMATICAL ANALYSIS
# OF
# SRIMAD BAGAVAD GITA

## CHAPTERS 13 - 18

Prepared By

Brahmachari Saravanan

(Gurusevak of Pujyasri Omkarananda Mahaswamiji)



Jagadguru Sri Sri Sri Bharati Tirtha Mahasannidhanam
Jagadguru Sri Sri Sri Vidhushekara Bharati Sannidhanam

भारतीकरुणापात्रं भारती पदभूषणम् ।
भारती पदमारुढं भारतीतीर्थमाश्रये ।।
विद्याविनयसम्पन्नं वीतरागं विवेकिनम् ।
वन्दे वेदान्ततत्त्वज्ञं विधुशेखरभारतीम् ।।



**Pujyasri Omkarananda Saraswati Mahaswamiji**

वेदवेदान्तशास्त्रज्ञं धर्मरक्षणनायकम् ।
चिद्भवानन्दशिष्यं तं परं सन्मार्गदर्शिनम् ।।
अपारकरुणापात्रम् वेदपुरीनिवासिनम् ।
आत्मविद्यागुरुं वन्दे ओङ्कारानन्दसद्गुरुम् ।।

# Preface

Ānandam - is the one common goal that every living being in the world pursues. Among all living beings, only humans have the unique ability to choose the source of their Ānandam. For other creatures, which lack this capacity to choose, Ānandam simply means survival without pain. Human pursuits, however, are classified broadly into Dharma, Artha, Kāma, and Mokṣa. Among these, the scriptures declare Mokṣa as the supreme goal, for Mokṣa alone is permanent, while all other goals are inherently transient and temporary.

As Lord Krishna says in the *Bhagavad Gītā* chapter 15:
"यत् गत्वा न निवर्तन्ते ।"—"*having reached that state, there is no return*".

Our scriptures teach that Mokṣa is "*Owning up to one's own nature as Brahman*":
"अहं ब्रह्मास्मि।" ("*I am Brahman*").

Sureśvarācārya, in his *Mānasollāsa*, beautifully states:

आत्मलाभात् परो लाभो नास्तीति मुनयो विदुः ।
तल्लाभार्थं कविः स्तौति स्वात्मानं परमेश्वरम् ॥

*"Sages say that there is no greater gain than gain of Ātman. With a view to this gain, the sage adores his own Self as Parameśvara."*

To realize our true nature as Brahman, it is necessary first to learn about Brahman. The Veda-s—specifically the end portion called Vedanta (the Upaniṣad-s)—are considered the primary source of this knowledge.

Vyasa Bhagavān states in the *Brahma Sutra*:
शास्त्रयोनित्वात् ।
"*Because Scriptures are the source (of the knowledge of Brahman).*"

Though the Upaniṣad-s speak clearly about Brahman, their subtle teachings can appear difficult to grasp. As Swami Chinmayananda says, "*the Upaniṣad-s are a tough nut to crack.*" Out of compassion, the Lord Himself presented this same truth in the form of the Bhagavad Gītā, making it accessible to all.

As one of the Gītā dhyāna śloka-s says:

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

Downloaded from www.omkaravidya.com

*“All the Upaniṣad-s are the cows, the milker is Kṛṣṇa (the son of Nanda), Arjuna is the calf, the people of purified intellect are the drinkers, and the milk is the great nectar of the Gita.”*

For a calf, the best food—and the food it can consume—is cow's milk. Though the verse specifies Arjuna as the calf, we too can consider ourselves calves, eager to drink the milk of the Bhagavad Gītā.

A sincere sādhaka does not merely study the Bhagavad Gītā casually, but strives to understand each śloka by carefully examining every word, and discerning how each word is connected. Such an approach enables one to remember the śloka-s along with their meaning more easily. This work undertakes the task of breaking down each śloka into its component words and arranging them in proper sequence to provide clear meaning—an approach termed अन्वयः (anvaya) in Saṃskṛtam.

At the outset, I offer this work at the feet of the Lord, without whose grace none of this would be possible.

My prostrations at the Lotus feet of the Sringeri Ubhaya Jagadgurus **Śrī Śrī Śrī Bharatī Tirtha Mahāsannidhānam** and **Śrī Śrī Śrī Vidhuśekhara Bhāratī Sannidhānam** by whose blessings I had the fortune to complete this work.

My prostrations to **Pujyaśrī Omkārānanda Saraswati Mahāswamīji,** who has been the guiding light for this endeavor. Swāmiji was delighted to see this work completed and blessed that it may reach all sincere seekers.

My prostrations to **Swāmini Brahmaleenānanda Saraswati,** from whom I had the privilege of learning the Bhagavad Gītā.

My prostrations to **Śrīmatī Dr. Umamaheswari,** who taught me Saṃskṛtam.

My sincere thanks to **Śrīmatī. Sudha Srinivaas**, who worked with me to validate and proofread this work to make it error-free.

May this work serve as a humble offering and a small aid for all sincere seekers of truth.

With pranāms,
**Brahmacārī Saravaṇan**

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता
# त्रयोदशोऽध्यायः
# क्षेत्रक्षेत्रज्ञविभागयोगः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः
अर्जुन उवाच
प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ॥
एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥

पदच्छेदः
प्रकृतिं पुरुषं च एव क्षेत्रं क्षेत्रज्ञम् एव च एतत् वेदितुम् इच्छामि ज्ञानं ज्ञेयं च केशव

पदपरिचयः
प्रकृतिं - इकार स्त्री द्वि एक
पुरुषं - अकार पु द्वि एक
क्षेत्रं - अकार नपु द्वि एक
क्षेत्रज्ञम् - अकार पु द्वि एक
वेदितुम - तुमुनन्तम्
इच्छामि - लट् उपु एक
ज्ञानं - अकार नपु द्वि एक
ज्ञेयं - अकार नपु द्वि एक
केशव - अकार पु सं प्र

पदार्थः
प्रकृतिं - प्रकृतिं
पुरुषं - नरम्
क्षेत्रं - क्षेत्रं
क्षेत्रज्ञम् - क्षेत्रविदम्
वेदितुम - ज्ञातुम्

Downloaded from www.omkaravidya.com

इच्छामि - अभिलषामि
ज्ञानं - ज्ञानम्
ज्ञेयं - अवगम्यम्
केशव - अर्जुन

अन्वयः
हे केशव! प्रकृतिं पुरुषं च एव क्षेत्रं क्षेत्रज्ञम् एव च ज्ञानं ज्ञेयं च एतत् वेदितुम इच्छामि ।

व्याकरणम्
▶ सन्धिः
च + एव - वृद्धिसन्धिः
एतत् + वेदितुम् - जश्त्वसन्धिः
▶ कृदन्ताः
वेदितुम् - विद् + तुमुन् प्रत्ययः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः
श्री भगवानुवाच
इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥१३.१॥

पदच्छेदः
इदं शरीरं कौन्तेय क्षेत्रम् इति अभिधीयते एतत य: वेत्ति तं प्राहुः क्षेत्रज्ञः इति तद्विदः

Downloaded from www.omkaravidya.com

पदपरिचयः
शरीरं - अकार नपु प्र एक
कौन्तेय - अकार पु सं प्र
क्षेत्रम् - अकार नपु प्र एक
अभिधीयते - कर्मणि प्रपु एक
वेत्ति - लट् प्रपु एक
प्राहुः - लट् प्रपु बहु
क्षेत्रज्ञः - अकार पु प्र एक
तद्विदः - अकार पु प्र बहु

पदार्थः
शरीरं - देहः
कौन्तेय - अर्जुन
क्षेत्रम् -क्षेत्रम्
अभिधीयते - कथ्यते
वेत्ति - जानाति
प्राहुः - वदन्ति
क्षेत्रज्ञः - क्षेत्रज्ञः
तद्विदः- क्षेत्रक्षेत्रज्ञवेत्तारः

अन्वयः
हे कौन्तेय! इदं शरीरं क्षेत्रम् इति अभिधीयते । यः एतत् वेत्ति तं क्षेत्रज्ञः इति तद्विदः प्राहुः ।

व्याकरणम्
▶ सन्धिः
इति + अभिधीयते - यण्सन्धिः

Downloaded from www.omkaravidya.com

एतत् + यः - जश्त्वसन्धिः
यः + वेत्ति - विसर्गउकारः
क्षेत्रज्ञः + इति - विसर्गलोपः

▶ समासः
क्षेत्रं जानाति इति क्षेत्रज्ञः - उपपदसमासः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ १३.०२॥

पदच्छेदः
क्षेत्रज्ञं च अपि मां विद्धि सर्वक्षेत्रेषु भारत क्षेत्रक्षेत्रज्ञयोः ज्ञानं यत् तत् ज्ञानं मतं मम

पदपरिचयः
क्षेत्रज्ञं - अकार पु द्वि एक
विद्धि - लोट् मपु एक
सर्वक्षेत्रेषु - अकार नपु स बहु
भारत - अकार पु सं प्र
क्षेत्रक्षेत्रज्ञयोः - अकार पु ष द्वि
ज्ञानं - अकार नपु प्र एक
मतं - अकार नपु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
क्षेत्रज्ञं - क्षेत्रविदम्
विद्धि - जानीहि
सर्वक्षेत्रेषु -सकलक्षेत्रेषु
भारत - अर्जुन क्षेत्रक्षेत्रज्ञयोः -शरीरतद्विदोः
ज्ञानं - बोधः
मतं - अभिमतम्

अन्वयः
हे भारत! सर्वक्षेत्रेषु माम् अपि च क्षेत्रज्ञं विद्धि । यत् क्षेत्रक्षेत्रज्ञयोः ज्ञानं तत् ज्ञानं (इति) मम मतम् ।

व्याकरणम्
▶ सन्धिः
च + अपि - सवर्णदीर्घसन्धिः
क्षेत्रक्षेत्रज्ञयोः + ज्ञानं - विसर्गरेफः
तत् + ज्ञानम् - जश्त्वसन्धिः श्चुत्वसन्धिः

## श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे श्रुणु ॥१३.०३॥

पदच्छेदः

Downloaded from www.omkaravidya.com

तत् क्षेत्रं  यत् च यादृक् च यद्विकारि यतः च यत् सः च यः यत्प्रभावः च तत् समासेन मे श्रुणु

पदपरिचयः
क्षेत्रं - अकार नपु प्र एक
यादृक् - अव्ययम्
यद्विकारि - नकार नपु प्र एक
यतः  - अव्ययम्
यत्प्रभावः - अकार पु प्र एक
समासेन - अकार पु तृ एक
श्रुणु - लोट् मपु एक

पदार्थः
क्षेत्रं -    शरीरम्
यादृक् - यादृशम्
यद्विकारि - यैः इन्द्रियादिविकारैः युक्तम्
यतः - यस्मात्
यत्प्रभावः  - यादृशप्रभावविशिष्टः
समासेन -सङ्क्षेपेण
श्रुणु - आकर्ण्य

अन्वयः
तत् क्षेत्रं यत्  च यादृक् च यद्विकारि यतः यत् च सः च यः यत्प्रभावः च तत् समासेन मे श्रुणु ।

व्याकरणम्
▶ सन्धिः
यत् + च - श्चुत्वसन्धिः

Downloaded from www.omkaravidya.com

यतः + च - विसर्गसकारः
सः + च - विसर्गलोपः
यः + यत्प्रभावः - विसर्गउकारः
यत्प्रभावः + च - विसर्गसकारः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥१३.४॥

पदच्छेदः
ऋषिभिः बहुधा गीतं छन्दोभिः विविधैः पृथक् ब्रह्मसूत्रपदैः च एव हेतुमद्भिः विनिश्चितैः

पदपरिचयः
ऋषिभिः - इकार पु तृ बहु
बहुधा - अव्ययम्
गीतं - अकार नपु प्र एक
छन्दोभिः - सकार नपु तृ बहु
विविधैः -अकार नपु तृ बहु
ब्रह्मसूत्रपदैः - अकार नपु तृ बहु
हेतुमद्भिः - अकार नपु तृ बहु
विनिश्चितैः -अकार नपु तृ बहु

Downloaded from www.omkaravidya.com

पदार्थः
ऋषिभिः - वसिष्ठादिभिः
बहुधा - बहुप्रकारम्
गीतं - कथितम्
छन्दोभिः छन्दांसि ऋगादीनि
विविधैः - नानाप्रकारैः
ब्रह्मसूत्रपदैः - उपनिषद्वाक्यैः
हेतुमद्भिः - युक्तियुक्तैः
विनिश्चितैः - न संशयरूपैः

अन्वयः
ऋषिभिः विविधैः छन्दोभिः हेतुमद्भिः विनिश्चितैः ब्रह्मसूत्रपदैः च एव पृथक् बहुधा गीतं ।

व्याकरणम्
▶ सन्धिः
ऋषिभिः + बहुधा - विसर्गरेफः
छन्दोभिः + विविधैः - विसर्गरेफः
ब्रह्मसूत्रपदैः+ च - विसर्गसकारः
च + एव - वृद्धिसन्धिः
हेतुमद्भिः + विनिश्चितैः - विसर्गरेफः

Downloaded from www.omkaravidya.com

मूलश्लोकः

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥ १३.५॥

इच्छा द्वेषः सुखं दुः खं सङ्घातश्चेतना धृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥ १३.६॥

पदच्छेदः

महाभूतानि अहङ्कारः बुद्धिः अव्यक्तम् एव च इन्द्रियाणि दश एकं च पञ्च च इन्द्रियगोचराः इच्छा द्वेषः सुखं दुः खं सङ्घातः चेतना धृतिः एतत् क्षेत्रं समासेन सविकारम् उदाहृतम्

पदपरिचयः

महाभूतानि - अकार नपु प्र बहु
अहङ्कारः - अकार पु प्र एक
बुद्धिः - इकार स्त्री प्र एक
अव्यक्तम् - अकार नपु प्र एक
इन्द्रियाणि - अकार नपु प्र बहु
दश - नकार त्रि प्र नित्यबहु
एकं - अकार नपु प्र नित्य एक
पञ्च - नकार त्रि प्र नित्यबहु
इन्द्रियगोचराः - अकार पु प्र बहु
इच्छा - आकार स्त्री प्र एक
द्वेषः - अकार पु प्र एक
सुखं - अकार नपु प्र एक

Downloaded from www.omkaravidya.com

दुः खं -- अकार नपु प्र एक
सङ्घातः - अकार पु प्र एक
चेतना - आकार स्त्री प्र एक
धृतिः - इकार स्त्री प्र एक
क्षेत्रं - अकार नपु प्र एक
समासेन - अकार पु तृ एक
सविकारम् - अकार नपु प्र एक
उदाहृतम् - अकार नपु प्र एक

पदार्थः
महाभूतानि - आकाशादिपञ्चमहाभूतानि
अहङ्कारः- अहं प्रत्ययलक्षणः
बुद्धिः - निश्चयात्मिका लक्षण
अव्यक्तम् - अव्याकृतम्
इन्द्रियाणि -इन्द्रियाणि
दश - दशेन्द्रियाणि
एकं - एकम्
पञ्च - पञ्च
इन्द्रियगोचराः - शब्दादयाः विषयाः
इच्छा - अभिलाषा
द्वेषः - द्वेषः
सुखं - हर्षः
दुः खं - व्यसनम्
सङ्घातः - देहेन्द्रियाणां संहतिः
चेतना - ज्ञानम्
धृतिः - दृढता
क्षेत्रं - क्षेत्रं
समासेन -सङ्क्षेपेण

Downloaded from www.omkaravidya.com

सविकारम् -विकारेण सह
उदाहृतम् - उक्तम्

अन्वयः
महाभूतानि अहङ्कारः बुद्धिः अव्यक्तम् एव च दश एकं च इन्द्रियाणि पञ्च इन्द्रियगोचराः इच्छा द्वेषः सुखं दुः खं सङ्घातः चेतना धृतिः एतत् सविकारम् क्षेत्रं समासेन उदाहृतम् ।

व्याकरणम्

▶ सन्धिः

महाभूतानि + अहङ्कारः - यण्सन्धिः
अहङ्कारः +बुद्धिः - विसर्गउकारः
बुद्धिः + अव्यक्तम् - विसर्गरेफः
दश + एकं- वृद्धिसन्धिः
च + इन्द्रियगोचरः - गुणसन्धिः
सङ्घातः + चेतना - विसर्गसकारः

▶ समासः

महत् भूतम् - महाभूतम् - विशेषणपूर्वपदकर्मधारयसमासः
इन्द्रियस्य गोचरः - इन्द्रियगोचरः - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ १३.०७॥

Downloaded from www.omkaravidya.com

पदच्छेदः
अमानित्वम् अदम्भित्वम् अहिंसा क्षान्तिः आर्जवम् आचार्योपासनं शौचं स्थैर्यम् आत्मविनिग्रहः

पदपरिचयः
अमानित्वम् - अकार नपु प्र एक
अदम्भित्वम् - अकार नपु प्र एक
अहिंसा - आकार स्त्री प्र एक
क्षान्तिः - इकार स्त्री प्र एक
आर्जवम् - अकार नपु प्र एक
आचार्योपासनं - अकार नपु प्र एक
शौचं - अकार नपु प्र एक
स्थैर्यम्- अकार नपु प्र एक
आत्मविनिग्रहः - अकार पु प्र एक

पदार्थः
अमानित्वम् – मानित्वाभावः
अदम्भित्वम् – स्वधर्मप्रकटीकरणाभावः
अहिंसा – प्राणापीडनम्
क्षान्तिः - क्षान्तिः
आर्जवम् – ऋजुभावः
आचार्योपासनं – आचार्यस्य सेवनम्
शौचं – कायमलानां प्रक्षालनम्
स्थैर्यम्- स्थिरभावः
आत्मविनिग्रहः - आत्मविनिग्रहः

Downloaded from www.omkaravidya.com

अन्वयः
अमानित्वम् अदम्भित्वम् अहिंसा क्षान्तिः आर्जवम् आचार्योपासनं शौचं स्थैर्यम् आत्मविनिग्रहः

व्याकरणम्

▶ सन्धिः

क्षान्तिः + आर्जवम् - विसर्गरेफः

▶ समासः

अमानित्वम्  - न मानित्वम् - नञ्तत्पुरुषः
अदम्भित्वम् - न दम्भित्वम्  नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

इन्द्रियार्थेषु वैराग्यमनङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषदर्शनम् ॥१३.८॥

पदच्छेदः
इन्द्रियार्थेषु वैराग्यम् अनङ्कारः  एव च जन्ममृत्युजराव्याधिदुःखदोषदर्शनम्

पदपरिचयः
इन्द्रियार्थेषु - अकार पु स बहु
वैराग्यम् - अकार नपु प्र एक
अनङ्कारः - अकार पु प्र एक
एव – अव्ययम्

Downloaded from www.omkaravidya.com

च - अव्ययम्
जन्ममृत्युजराव्याधिदु:खदोषदर्शनम् - अकार नपु प्र एक

पदार्थः
इन्द्रियार्थेषु - शब्दादिषु भोगेषु
वैराग्यम् - विरागस्य भाव:
अनङ्कार: - अहङ्काराभाव:
एव – एव
च- च
जन्ममृत्युजराव्याधिदु:खदोषदर्शनम् -जननमरणवृद्धत्वरोगदु:खावलोकनम्

अन्वयः
इन्द्रियार्थेषु वैराग्यम् अनङ्कार:  एव च जन्ममृत्युजराव्याधिदु:खदोषदर्शनम् (एतत् ज्ञानम् इति प्रोक्तम् )।

व्याकरणम्
▶ सन्धिः
अनङ्कार: + एव - विसर्गलोप:

▶ समासः
जन्म च मृत्युः च जरा च व्याधय: च दु:खानि च -
जन्ममृत्युजराव्याधिदु:खानि - इतरेतरद्वन्द्वसमास:
जन्ममृत्युजराव्याधिदु:खेषु दोषदर्शनम् - जन्ममृत्युजराव्याधिदु:खदोषदर्शनम् - सप्तमीतत्पुरुष:

Downloaded from www.omkaravidya.com

मूलश्लोकः

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥१३.९॥
पदच्छेदः
असक्तिः अनभिष्वङ्गः पुत्रदारगृहादिषु नित्यं च समचित्तत्वम् इष्टानिष्टोपपत्तिषु

पदपरिचयः
असक्तिः - इकार स्त्री प्र एक
अनभिष्वङ्गः - अकार पु प्र एक
पुत्रदारगृहादिषु - इकार पु स बहु
नित्यं – अव्ययम्
च - अव्ययम्
समचित्तत्वम् - अकार नपु प्र एक
इष्टानिष्टोपपत्तिषु - इकार स्त्री स बहु

पदार्थः
असक्तिः - अनासक्तिः
अनभिष्वङ्गः - अनभिनिवेशः
पुत्रदारगृहादिषु - तनयभार्यानिवासादिषु
नित्यं - सर्वदा
समचित्तत्वम् - तुल्यचित्तता
इष्टानिष्टोपपत्तिषु - अभीष्टद्विष्टवस्तुप्राप्तिषु

अन्वयः

Downloaded from www.omkaravidya.com

असक्तिः पुत्रदारगृहादिषु अनभिष्वङ्गः इष्टानिष्टोपपत्तिषु च नित्यं समचित्तत्वम् (एतत् ज्ञानं इति प्रोक्तम्)।

व्याकरणम्

▶ सन्धिः

असक्तिः + अनभिष्वङ्गः  विसर्गरेफः

▶ समासः

असक्तिः - न सक्तिः - नञ्तत्पुरुषः

अनभिष्वङ्गः - न अभिष्वङ्गः नञ्तत्पुरुषः

पुत्रः च दाराः च गृहं च - पुत्रदारगृहाणि - इतरेतरद्वन्द्वसमासः

पुत्रदारगृहाणि आदिः येषां ते - पुत्रदारगृहादयः - तेषु

इष्टा च अनिष्टा च - इष्टानिष्टे - इतरेतरद्वन्द्वसमासः

इष्टानिष्टयोः उपपत्तयः - षष्ठीतत्पुरुषसमासः - तेषु

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १३.१०॥

पदच्छेदः

मयि च अनन्ययोगेन भक्तिः अव्यभिचारिणी विविक्तदेशसेवित्वम् अरतिः जनसंसदि

Downloaded from www.omkaravidya.com

पदपरिचयः

मयि – दकार त्रि स एक

च -अव्ययम्

अनन्ययोगेन - अकार पु तृ एक

भक्तिः - इकार स्त्री पंर एक

अव्यभिचारिणी - ईकार स्त्री प्र एक

विविक्तदेशसेवित्वम् - - अकार पु प्र एक

अरतिः - इकार स्त्री प्र एक

जनसंसदि - दकार स्त्री स एक

पदार्थः

मयि – ईश्वरे

च -च

अनन्ययोगेन -एकाग्रचित्तेन

भक्तिः - भक्तिः

अव्यभिचारिणी - अनपायिनी

विविक्तदेशसेवित्वम् - एकान्तदेशसेविनम्

अरतिः - अप्रीतिः

जनसंसदि - जनसमवाये

अन्वयः

मयि च अनन्ययोगेन अव्यभिचारिणी भक्तिः विविक्तदेशसेवित्वम् जनसंसदि अरतिः (एतत् ज्ञानम् इति प्रोक्रम् )

व्याकरणम्

▶ सन्धिः

च + अनन्ययोगेन - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

भक्तिः+ अव्यभिचारिणी - विसर्गरेफः
अरतिः + जनसंसदि विसर्गरेफः

▶ समासः
विविक्तदेशस्य सेवित्वम् - षष्ठीतत्पुरुषः
जनानां संसदि - जनसंसदि- षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा । १३.११॥

पदच्छेदः
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् एतत् ज्ञानम् इति प्रोक्तम् अज्ञानं यत् अतः अन्यथा

पदपरिचयः
अध्यात्मज्ञाननित्यत्वं - अकार नपु प्र एक
तत्त्वज्ञानार्थदर्शनम् - अकार नपु प्र एक
ज्ञानम् - अकार नपु प्र एक
प्रोक्तम् - अकार नपु प्र एक
अज्ञानं - अकार नपु प्र एक
अन्यथा - अव्ययम्

पदार्थः
अध्यात्मज्ञाननित्यत्वं -सर्वदा आत्मविषयेचिन्तनम्
तत्त्वज्ञानार्थदर्शनम् - सत्यज्ञानफलप्रवर्तनम्

Downloaded from www.omkaravidya.com

ज्ञानम् - ज्ञानम्
प्रोक्रम् - उक्तम्
अज्ञानं - अज्ञानं
अन्यथा - विपर्ययेण

अन्वयः
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् एतत ज्ञानम् इति प्रोक्रम् यत् अतः अन्यथा अज्ञानम् ।

व्याकरणम्
▶ सन्धिः
एतत् + ज्ञानम् - जश्त्वसन्धिः श्चुत्वसन्धिः

▶ समासः
तत्वस्य ज्ञानम् - तत्वज्ञानम् -षष्ठीतत्पुरुषः
तत्वज्ञानस्य अर्थः - तत्वज्ञानार्थः षष्ठीतत्पुरुषः
तत्वज्ञानार्थस्य दर्शनम् -तत्त्वज्ञानार्थदर्शनम् षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥१३.१२॥

पदच्छेदः

Downloaded from www.omkaravidya.com

ज्ञेयं यत् तत् प्रवक्ष्यामि यत् ज्ञात्वा अमृतम् अश्नुते अनादिमत् परं ब्रह्म न सत् तत् न असत् उच्यते

पदपरिचयः

ज्ञेयं - अकार नपु द्वि एक

प्रवक्ष्यामि - लट् उपु एक

ज्ञात्वा - क्त्वान्तम्

अमृतम् - अकार पु द्वि एक

अश्नुते - लट् प्रपु एक

अनादिमत् - तकार नपु प्र एक

परं - अकार नपु प्र एक

ब्रह्म - नकार पु प्र एक

सत् - दकार नपु प्र एक

असत् - दकार नपु प्र एक

उच्यते - लट् कर्मणि प्रपु एक

पदार्थः

ज्ञेयं - ज्ञातव्यम्

प्रवक्ष्यामि - वदामि

ज्ञात्वा - अवगम्य

अमृतम् - अमृतत्वम्

अश्नुते - प्राप्नोति

अनादिमत् आदिरहितम्

परं - निरतिशयम्

ब्रह्म -ब्रह्म

सत् - सत्

असत् - असत्

उच्यते - कथ्यते

Downloaded from www.omkaravidya.com

अन्वयः
(अहं) यत् ज्ञेयं तत् प्रवक्ष्यामि यत् ज्ञात्वा अमृतम् अश्नुते । अनादिमत् तत् परं ब्रह्म न सत् न  असत् उच्यते ।

व्याकरणम्
▶ सन्धिः
यत्  + ज्ञात्वा -  जश्त्वसन्धि: श्चुत्वसन्धि:
तत् + न - अनुनासिकासन्धि:
न + असत् - सवर्णदीर्घसन्धि:
असत् + उच्यते - जश्त्वसन्धि:

▶ समासः
न मृतम् - अमृतम् - नञ्तत्पुरुष:
आदि:  अस्य अस्ति इति - आदिमद् - मतुप् प्रत्यय:
न आदिमद् – अनादिमद् नञ्तत्पुरुष:

श्रीमद्भगवद्गीता  -   त्रयोदशोऽध्याय:  -  क्षेत्रक्षेत्रज्ञविभागयोग:

मूलश्लोक:

सर्वत: पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वत: श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१३.१३॥

Downloaded from www.omkaravidya.com

पदच्छेदः
सर्वतः पाणिपादं तत् सर्वतः अक्षिशिरोमुखम् सर्वतः श्रुतिमत् लोके  सर्वम् आवृत्य तिष्ठति

पदपरिचयः
सर्वतः - अव्ययम्
पाणिपादं - अकार नपु प्र एक
सर्वतः - अव्ययम्
अक्षिशिरोमुखम् - अकार नपु प्र एक
सर्वतः - अव्ययम्
श्रुतिमत् - तकार नपु प्र एक
लोके  - अकार पु स एक
सर्वम् - अकार नपु द्वि एक
आवृत्य -ल्यबन्तम्
तिष्ठति - लट् प्रपु एक

पदार्थः
सर्वतः - परितः
पाणिपादं  - हस्तचरणम्
सर्वतः - सर्वत्र
अक्षिशिरोमुखम् -  नेत्रशीर्षवदनम्
श्रुतिमत् - श्रोत्रयुक्तम्
लोके - भुवने
सर्वम् - सकलम्
आवृत्य - संव्याप्य
तिष्ठति - वसति

Downloaded from www.omkaravidya.com

अन्वयः
तत् सर्वतः पाणिपादं सर्वतः अक्षिशिरोमुखम् सर्वतः श्रुतिमत् लोके सर्वम् आवृत्य तिष्ठति ।

व्याकरणम्
▶ सन्धिः
सर्वतः + अक्षिशिरोमुखम् - विसर्गउकारः पूर्वरूपसन्धिः
श्रुतिमत् + लोके - परसवर्णसन्धिः

▶ समासः
पाणयः च पादाः च एतेषां समाहारः पाणिपादम् - समाहारद्वन्द्वसमासः
सर्वतः पाणिपादं यस्य तत् - व्यधिकरमबहुव्रीहिसमासः
अक्षीणि शिरांसि मुखानि च एतेषां समाहारः - अक्षिशिरोमुखम् - समाहारद्वन्द्वसमासः
सर्वतः अक्षिशिरोमुखम् यस्य तत् व्यधिकरमबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १३.१४॥

पदच्छेदः
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् असक्तं सर्वभृत् च एव निर्गुणं गुणभोक्तृ च

Downloaded from www.omkaravidya.com

पदपरिचयः
सर्वेन्द्रियगुणाभासं - अकार नपु प्र एक
सर्वेन्द्रियविवर्जितम् - अकार नपु प्र एक
असक्तं - अकार नपु प्र एक
सर्वभृत् - तकार नपु प्र एक
निर्गुणं - अकार नपु प्र एक
गुणभोक्तृ - ऋकार नपु प्र एक

पदार्थः
सर्वेन्द्रियगुणाभासं -सकलेन्द्रियविषय प्रकाशकम्
सर्वेन्द्रियविवर्जितम् - सर्वकरणरहितम्
असक्तं - सङ्गरहितम्
सर्वभृत् - सकलस्याधारम्
निर्गुणं - गुणरहितम्
गुणभोक्तृ - गुणभोक्तृ

अन्वयः
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् असक्तं सर्वभृत् च एव निर्गुणं गुणभोक्तृ च ।

व्याकरणम्
▶ सन्धिः
सर्वभृत् + च - श्चुत्वसन्धिः
च + एव - वृद्धिसन्धिः

▶ समासः
सर्वाणि इन्द्रियाणि - सर्वेन्द्रियाणि - विशेषणपूर्वपदकर्मधारयसमासः

Downloaded from www.omkaravidya.com

सर्वेन्द्रियगुणानाम् आभासम्   - षष्ठीतत्पुरुषः
सर्वैः इन्द्रियैः - सर्वेन्द्रियैः विशेषणपूर्वपदकर्मधारयसमासः
सर्वेन्द्रियैः विवर्जितम्-तृतीयातत्पुरुषः
सर्वं बिभर्ति इति सर्वभृत् - उपपदसमासः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥१३.१५॥

पदच्छेदः
बहिः अन्तः च  भूतानाम् अचरं चरम् एव च सूक्ष्मत्वात् तत् अविज्ञेयं दूरस्थं च अन्तिके च तत्
पदपरिचयः
बहिः - अव्ययम्
अन्तः - अव्ययम्
भूतानाम् - अकार नपु ष बहु
अचरं - अकार नपु प्र एक चरम् - अकार नपु प्र एक
सूक्ष्मत्वात् - अकार नपु प एक
अविज्ञेयं - अकार नपु प्र एक
दूरस्थं - अकार नपु प्र एक
अन्तिके - अकार नपु स एक

पदार्थः
बहिः - बहिः

Downloaded from www.omkaravidya.com

अन्तः - अन्तः
भूतानाम् - प्राणिनाम्
अचरं - चलम्
चरम् - चररूपम्
सूक्ष्मत्वात् - सूक्ष्मरूपतत्वात्
अविज्ञेयं - अबोध्यम्
दूरस्थं - दूरस्थं
अन्तिके - समीपे

अन्वयः
भूतानाम् बहिः अन्तः च अचरं चरम् एव च सूक्ष्मत्वात् तत् अविज्ञेयं तत् दूरस्थं च अन्तिके च ।

व्याकरणम्
▶ सन्धिः
बहिः + अन्तः - विसर्गरेफः
अन्तः + च - विसर्गसकारः
तत् + अविज्ञेयम् - जश्त्वसन्धिः
च + अन्तिके - सवर्णदीर्घसन्धिः

▶ समासः
दूरे तिष्ठति इति दूरस्थम् उपपदसमासः

Downloaded from www.omkaravidya.com

मूलश्लोकः

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु च प्रभविष्णु च ॥ १३.१६॥

पदच्छेदः
अविभक्तं च भूतेषु विभक्तम् इव च स्थितम् भूतभर्तृ च तत् ज्ञेयं ग्रसिष्णु च प्रभविष्णु च

पदपरिचयः
अविभक्तं - अकार नपु प्र एक
भूतेषु - अकार नपु स बहु
विभक्तम् - अकार नपु प्र एक
स्थितम् - अकार नपु प्र एक
भूतभर्तृ - ऋकार नपु प्र एक
ज्ञेयं - अकार नपु प्र एक
ग्रसिष्णु - उकार नपु प्र एक
प्रभविष्णु - उकार नपु प्र एक

पदार्थः
अविभक्तं - अभिन्नम्
भूतेषु - प्राणिषु
विभक्तम् - भिन्नम्
स्थितम् - विद्यमानम्
भूतभर्तृ - भूतानि विभर्ति
ज्ञेयं - ज्ञातव्यम्

Downloaded from www.omkaravidya.com

ग्रसिष्णु   -ग्रसनशीलम्
प्रभविष्णु - प्रभवनशीलम्

अन्वयः
भूतेषु अविभक्तं च  विभक्तम् इव च स्थितम् भूतभर्तृ ग्रसिष्णु च प्रभविष्णु च तत् ज्ञेयं ।

व्याकरणम्
▶ सन्धिः
तत् + ज्ञेयम् - जश्त्वसन्धिः श्चुत्वसन्धिः

▶ समासः
अविभक्तम् - न विभक्तम् नञ्तत्पुरुषः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १३.१७॥

पदच्छेदः
ज्योतिषाम् अपि तत् ज्योतिः तमसः परम् उच्यते ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्

पदपरिचयः
ज्योतिषाम् - सकार नपु ष बहु
ज्योतिः - सकार नपु प्र एक

Downloaded from www.omkaravidya.com

तमसः - सकार नपु प एक
परम् - अकार नपु प्र एक
उच्यते - लट् कर्मणि प्रपु एक
ज्ञानं - अकार नपु प्र एक
ज्ञेयं - अकार नपु प्र एक
ज्ञानगम्यं - अकार नपु प्र एक
हृदि - दकार नपु स एक
सर्वस्य - अकार पु ष एक
विष्ठितम् - अकार नपु प्र एक

पदार्थः
ज्योतिषाम् - आदित्यानाम्
ज्योतिः - अर्चिः
तमसः - अज्ञानात्
परम् - अस्पृष्टम्
उच्यते - कथ्यते
ज्ञानं -बोधस्तरूपम्
ज्ञेयं - ज्ञातव्यम्
ज्ञानगम्यं - ज्ञानफलम्
हृदि - हृदये
सर्वस्य - सर्वस्य
विष्ठितम् - विशेषेण स्थितम्
अन्वयः
तत् ज्योतिषाम् अपि ज्योतिः तमसः परम् उच्यते ज्ञानं ज्ञेयं ज्ञानगम्यं सर्वस्य हृदि विष्ठितम् ।

व्याकरणम्
▶ सन्धिः

Downloaded from www.omkaravidya.com

तत् + ज्योतिः - जश्त्वसन्धिः श्चुत्वसन्धिः
ज्योतिः + तमसः - विसर्गसकारः

▶ समासः
ज्ञानेन गम्यम् - ज्ञानगम्यम् - तृतीयातत्पुरुषः
कृदान्तः
विष्ठितम् - वि + स्था + क्त प्रत्ययः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १३.१८॥

पदच्छेदः
इति क्षेत्रं तथा ज्ञानं ज्ञेयं च उक्तं समासतः मद्भक्तः एतत् विज्ञाय मद्भावाय उपपद्यते

पदपरिचयः
क्षेत्रं - अकार नपु प्र एक
ज्ञानं - अकार नपु प्र एक
ज्ञेयं - अकार नपु प्र एक
उक्तं - अकार नपु प्र एक
समासतः - अव्ययम्
मद्भक्तः - अकार पु प्र एक
विज्ञाय - ल्यबन्तम्

Downloaded from www.omkaravidya.com

मद्भावाय - अकार पु च एक
उपपद्यते - लट् प्रपु एक

पदार्थः
क्षेत्रं - महाभूतादि धृत्यन्तम्
ज्ञानं - अमानित्वादी तत्त्वज्ञानार्थ दर्शनपर्यन्तम् (उक्तम्)
ज्ञेयं - ज्ञातव्यम्
उक्तं - कथितम्
समासतः - संक्षेपतः
मद्भक्तः - मम भक्तः
विज्ञाय - ज्ञात्वा
मद्भावाय - परमात्मभावाय
उपपद्यते - मोक्षं गच्छति

अन्वयः
इति क्षेत्रं तथा ज्ञानं ज्ञेयं च  समासतः उक्तम् । मद्भक्तः  एतत् विज्ञाय मद्भावाय उपपद्यते ।

व्याकरणम्
▶ सन्धिः
च + उक्तं - गुणसन्धिः
मद्भक्तः + एतत् - विसर्गलोपः
एतत् + विज्ञाय - जश्त्वान्धिः
मद्भावाय + उपपद्यते - गुणसन्धिः

▶ समासः
मम भक्तः - मद्भक्तः - षष्ठीतत्पुरुषः
मम भावः - मद्भावः षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ १३.१९॥

पदच्छेदः
प्रकृतिं पुरुषं च एव विद्धि अनादी उभौ अपि विकारान् च गुणान् च एव विद्धि प्रकृतिसंभवान्

पदपरिचयः
प्रकृतिं - इकार स्त्री द्वि एक
पुरुषं - अकार पु द्वि एक
विद्धि - लोट् मपु एक
अनादी - इकार पु द्वि द्वि
उभौ - अकार पु द्वि द्वि
विकारान् - अकार पु द्वि बहु
गुणान् - अकार पु द्वि बहु
विद्धि - लोट् मपु एक
प्रकृतिसंभवान्- अकार पु द्वि बहु

पदार्थः
प्रकृतिं -अव्यक्तम्
पुरुषं - पुरुषम्
विद्धि - जानीहि
अनादी - आदिरहितौ

Downloaded from www.omkaravidya.com

उभौ - द्वयम्
विकारान् - बुद्ध्यादिदेहेन्द्रियान्
गुणान् - सुखदुःखादीन्
विद्धि - जानीहि
प्रकृतिसंभवान् - प्रकृतिपरिणामान्

अन्वयः
प्रकृतिं पुरुषं च एव उभौ अपि अनादी विद्धि । विकारान् च गुणान् च एव प्रकृतिसंभवान् विद्धि ।

व्याकरणम्
▶ सन्धिः
च + एव - वृद्धिसन्धिः
विद्धि + अनादी - यण्सन्धिः
उभौ + अपि - यान्तावान्तसन्धिः
विकारान् + च - सत्वसन्धिः
गुणान् + च -सत्वसन्धिः

▶ समासः
अनादी - न आदि विद्यते ययौ तौ - नञ्बहुव्रीहिः
प्रकृतेः सम्भवाः पञ्चमीतत्पुरुषः - तान्

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥१३.२०॥

Downloaded from www.omkaravidya.com

पदच्छेदः
कार्यकरणकर्तृत्वे हेतुः प्रकृतिः उच्यते पुरुषः सुखदुःखानां भोक्तृत्वे हेतुः उच्यते

पदपरिचयः
कार्यकरणकर्तृत्वे - अकार नपु स एक
हेतुः - उकार पु प्र एक
प्रकृतिः - इकार स्त्री प्र एक
उच्यते- लट् कर्मणि प्रपु एक
पुरुषः - अकार पु प्र एक
सुखदुःखानां - अकार नपु ष बहु
भोक्तृत्वे - अकार नपु स बहु
हेतुः - उकार पु प्र एक
उच्यते - लट् कर्मणि प्रपु

पदार्थः
कार्यकरणकर्तृत्वे - देहेन्द्रियकर्तृत्वे
हेतुः - कारणम्
प्रकृतिः - अव्यक्तम्
उच्यते - कथ्यते
पुरुषः - जीवः
सुखदुःखानां - सुखदुःखानां
भोक्तृत्वे - अनुभवे
हेतुः - कारणम्
उच्यते -कथ्यते

Downloaded from www.omkaravidya.com

अन्वयः
कार्यकरणकर्तृत्वे प्रकृति हेतुः उच्यते । पुरुषः सुखदुःखानां भोक्तृत्वे हेतुः उच्यते ।

व्याकरणम्
▶ सन्धिः
प्रकृतिः + उच्यते - विसर्गरेफः
हेतुः + उच्यते विसर्गरेफः

▶ समासः
कार्याणि च करणानि च एतेषां समाहारः - कार्यकरणम् - समाहारद्वन्द्वः
कार्यकरणस्य कर्तृत्वम् - कार्यकरणकर्तृत्वम् - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ १३.२१॥

पदच्छेदः
पुरुषः प्रकृतिस्थः हि भुङ्क्ते प्रकृतिजान् गुणान् कारणं गुणसङ्गः अस्य सदसद्योनिजन्मसु

पदपरिचयः
पुरुषः - अकार पु प्र एक
प्रकृतिस्थः - अकार पु प्र एक

Downloaded from www.omkaravidya.com

भुङ्क्ते - लट् प्रपु एक
प्रकृतिजान् - अकार पु द्वि बहु
गुणान् - अकार पु द्वि बहु
कारणं - अकार नपु प्र एक
गुणसङ्गः - अकार पु प्र एक
सदसद्योनिजन्मसु - नकार नपु स बहु

पदार्थः
पुरुषः - भोक्ता
प्रकृतिस्थः - प्रकृतौ स्थितः
भुङ्क्ते - उपलभते
प्रकृतिजान् - प्रकृतितः जातान्
गुणान् - सुखदुः खादीन्
कारणं - कारणम्
गुणसङ्गः - गुणेषु सङ्गः
सदसद्योनिजन्मसु -
साध्वसाधुयोनुजन्मसु

अन्वयः
हि पुरुषः प्रकृतिस्थः प्रकृतिजान् गुणान् भुङ्क्ते। अस्य
गुणसङ्गः सदसद्योनिजन्मसु कारणं (भवति) ।

व्याकरणम्
▶ सन्धिः
प्रकृतिस्थः + हि - विसर्गउकारः
गुणसङ्गः + अस्य - विसर्गउकारः पूर्वरूपसन्धिः

▶ समासः

Downloaded from www.omkaravidya.com

प्रकृतौ तिष्ठति - प्रकृतिस्थः - उपपदसमासः
गुणेषु सङ्गः - गुणसङ्गः - सप्तमीतत्पुरुषः
सत्यः च असत्यः च योनयः - सदसद्योनयः द्वन्द्वसमासः
सदश्योनिषु जन्मसु - सप्तमीतत्पुरुषः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः पर : ॥१३.२२॥

पदच्छेदः
उपद्रष्टा अनुमन्ता च भर्ता भोक्ता महेश्वरः परमात्मा इति च अपि उक्तः देहे अस्मिन् पुरुषः परः

पदपरिचयः
उपद्रष्टा - ऋकार पु प्र एक
अनुमन्ता - ऋकार पु प्र एक
भर्ता - ऋकार पु प्र एक
भोक्ता - ऋकार पु प्र एक
महेश्वरः - अकार पु प्र एक
परमात्मा - नकार पु प्र एक
उक्तः - अकार पु प्र एक
देहे - अकार पु स बहु
पुरुषः - अकार पु प्र एक पर : - अकार पु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः

उपद्रष्टा - समीपस्थः सन् द्रष्टा
अनुमन्ता - कार्यकरणप्रवृत्तिषु स्वयं प्रवृत्तः
भर्ता - धारकः
भोक्ता - अनुभविता
महेश्वरः - महाप्रभुः
परमात्मा - परब्रह्म
उक्तः - कथितः
देहे - शरीरे
पुरुषः - अक्षरः
पर : - उत्तमः

अन्वयः

उपद्रष्टा अनुमन्ता भर्ता भोक्ता च महेश्वरः परमात्मा इति च अपि उक्तः ।
अस्मिन् देहे परः पुरुषः (अस्ति)

व्याकरणम्

▶ सन्धिः

उपद्रष्टा + अनुमन्ता - सवर्णदीर्घसन्धिः
परमात्मा + इति - गुणसन्धिः
च + अपि - सवर्णदीर्घसन्धिः
अपि + उक्तः - यण्सन्धिः
देहे + अस्मिन् - पूर्वरूपसन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोकः
य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ १३.२३॥

पदच्छेदः
यः एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह सर्वथा वर्तमानः अपि न सः भूयः अभिजायते
पदपरिचयः
वेत्ति - लट् प्रपु एक
पुरुषं - अकार पु द्वि एक
प्रकृतिं- इकार स्त्री द्वि एक
गुणैः - अकार पु तृ बहु
वर्तमानः - अकार पु प्र एक
भूयः - अव्ययम्
अभिजायते - लट् प्रपु एक

पदार्थः
वेत्ति - जानाति
पुरुषं - आत्मानम्
प्रकृतिं-अविद्यालक्षणम्
गुणैः - स्वविकारैः
वर्तमानः -वर्तमानः
भूयः - पुनः
अभिजायते - उत्पद्यते

Downloaded from www.omkaravidya.com

अन्वयः
यः एवं पुरुषं गुणैः सह प्रकृतिं च वेत्ति सः सर्वथा वर्तमानः अपि  भूयः न अभिजायते ।

व्याकरणम्
▶ सन्धिः
यः + एवम् - विसर्गलोपः
वर्तमानः + अपि - विसर्गउकारः पूर्वरूपसन्धिः
सः + भूयः  विसर्गलोपः
भूयः + अभिजायते - विसर्गउकारः पूर्वरूपसन्धिः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥ १३.२४॥

पदच्छेदः
ध्यानेन आत्मनि पश्यन्ति केचित् आत्मानम् आत्मना अन्ये साङ्ख्येन योगेन कर्मयोगेन च अपरे

पदपरिचयः
ध्यानेन - अकार नपु तृ एक
आत्मनि - नकार पु स एक
पश्यन्ति - लट् प्रपु बहु
आत्मानम् - नकार पु द्वि एक
आत्मना - नकार पु तृ एक

Downloaded from www.omkaravidya.com

अन्ये - अकार पु प्र बहु
साङ्ख्येन - अकार नपु तृ एक
योगेन - अकार पु तृ एक
कर्मयोगेन - अकार पु तृ एक
अपरे - अकार पु प्र बहु

पदार्थः
ध्यानेन - चिन्तनेन
आत्मनि - बुद्धौ
पश्यन्ति - वीक्षन्ते
आत्मानम् - प्रत्यक् चेतनम्
आत्मना - ध्यानसंस्कृतेन अन्तकरणेन
अन्ये - इतरे
साङ्ख्येन - साङ्ख्येन
योगेन - योगेन
कर्मयोगेन - कर्मयोगेने
अपरे - इतरे

अन्वयः
केचित् ध्यानेन आत्मनि आत्मना आत्मानम् पश्यन्ति । अन्ये साङ्ख्येन योगेन अपरे च कर्मयोगेन (पश्यन्ति) ।

व्याकरणम्
▶ सन्धिः
ध्यानेन + आत्मनि - सवर्णदीर्घसन्धिः
केचित् + आत्मानम् - जश्त्वसन्धिः
च + अपरे - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ १३.२५॥

पदच्छेदः
अन्ये तु एवम् अजानन्तः श्रुत्वा अन्येभ्यः उपासते ते अपि च अतितरन्ति एव मृत्युं श्रुतिपरायणाः
पदपरिचयः
अन्ये - अकार पु प्र एक
अजानन्तः - तकार पु प्र बहु
श्रुत्वा - क्त्वान्तम्
अन्येभ्यः - अकार पु प बहु
उपासते - लट् प्रपु बहु
अतितरन्ति लट् प्रपु बहु
मृत्युं - उकार पु द्वि एक
श्रुतिपरायणाः - अकार पु प्र बहु

पदार्थः
अन्ये - अन्यतरेण
अजानन्तः - अविदन्तः
श्रुत्वा - आकर्ण्य
अन्येभ्यः - आचार्येभ्यः
उपासते - चिन्तयन्ति
अतितरन्ति - अतिक्रामन्ति
मृत्युं - संसारबन्धम्

Downloaded from www.omkaravidya.com

श्रुतिपरायणाः - श्रवणाशक्ताः

अन्वयः

अन्ये तु एवम् अजानन्तः  अन्येभ्यः श्रुत्वा उपासते । ते अपि च श्रुतिपरायणाः मृत्युं अतितरन्ति एव  ।

व्याकरणम्

▶ सन्धिः

तु + एवम् - यण्सन्धिः
श्रुत्वा + अन्येभ्यः  - सवर्णदीर्घसन्धिः
अन्येभ्यः  + उपासते - विसर्गलोपः
ते + अपि - पूर्वरूपसन्धिः
च +अतितरन्ति - सवर्णदीर्घसन्धिः
अतितरन्ति + एव - यण्सन्धिः

▶ समासः

श्रुतिः परायणम् येषां ते - श्रुतिपरायणाः - समानाधिकरणबहुव्रीहिसमासः

## श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ १३.२६॥

Downloaded from www.omkaravidya.com

पदच्छेदः
यावत् सञ्जायते किञ्चित् सत्त्वं स्थावरजङ्गमम् क्षेत्रक्षेत्रज्ञसंयोगात् तत् विद्धि भरतर्षभ

पदपरिचयः
यावत् - अव्ययम्
सञ्जायते - लट् प्रपु एक
किञ्चित् - अव्ययम्
सत्त्वं - अकार नपु प्र एक
स्थावरजङ्गमम् - अकार नपु प्र एक
क्षेत्रक्षेत्रज्ञसंयोगात् - अकार पु प एक
विद्धि - लोट् मपु एक
भरतर्षभ - अकार पु सं प्र
पदार्थः
यावत् - यावत्
सञ्जायते - समुत्पद्यते
किञ्चित् - किञ्चित्
सत्त्वं - वस्तु
स्थावरजङ्गमम् - चराचरम्
क्षेत्रक्षेत्रज्ञसंयोगात् - क्षेत्रक्षेत्रज्ञसंयोगात्
विद्धि - जानीहि
भरतर्षभ - अर्जुन

अन्वयः
हे भरतर्षभ ! यावत् किञ्चित् सत्त्वं स्थावरजङ्गमम् सञ्जायते तत् क्षेत्रक्षेत्रज्ञसंयोगात् विद्धि ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

तत् + विद्धि - जश्त्वसन्धिः

▶ समासः

स्थावरं च जङ्गमम् च एतेषां समाहारः स्थावरजङ्गमम् - समाहारद्वन्द्वसमासः

क्षेत्रः च क्षेत्रज्ञ च - क्षत्रक्षेत्रज्ञौ - द्वन्द्वसमासः

क्षत्रक्षेत्रज्ञयोः संयोगः - क्षत्रक्षेत्रज्ञसंयोगः - षष्ठीतत्पुरुषः - तस्मात्

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ १३.२७॥

पदच्छेदः

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् विनश्यत्सु अविनश्यन्तं यः पश्यति सः पश्यति

पदपरिचयः

समं - अकार पु द्वि एक

सर्वेषु - अकार नपु स बहु

भूतेषु अकार नपु स बहु

तिष्ठन्तं - तकार पु द्वि एक

परमेश्वरम् - अकार पु द्वि एक

विनश्यत्सु -तकार पु स बहु

अविनश्यन्तं तकार पु द्वि एक

Downloaded from www.omkaravidya.com

पश्यति - लट् प्रपु एक

पदार्थः
समं - निर्विशेषम्
सर्वेषु - ब्रह्मादिस्थावरान्तेषु
भूतेषु - प्राणिषु
तिष्ठन्तं - स्थितिं कुर्वन्तं
परमेश्वरम् - परमेश्वरम्
विनश्यत्सु - म्रियमाणेषु
अविनश्यन्तं - अम्रियमाणम्
पश्यति - वीक्षते

अन्वयः
यः सर्वेषु भूतेषु समं तिष्ठन्तं विनश्यत्सु अविनश्यन्तं परमेश्वरम् पश्यति सः पश्यति ।

व्याकरणम्
▶ सन्धिः
विनश्यत्सु + अविनश्यन्तं - यण्सन्धिः
सः + पश्यति - विसर्गलोपः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥ १३.२८॥

Downloaded from www.omkaravidya.com

पदच्छेदः

समं पश्यन् हि सर्वत्र समवस्थितम् ईश्वरम् न हिनस्ति आत्मना आत्मानं ततः याति परां गतिम्

पदपरिचयः

समं - अकार पु द्वि एक

पश्यन् - तकार पु प्र एक

समवस्थितम् - अकार पु द्वि एक

ईश्वरम् - अकार पु द्वि एक

हिनस्ति - लट् प्रपु एक

आत्मना - नकार पु तृ एक

आत्मानं - नकार पु द्वि एक

याति - लट् प्रपु एक

परां - आकार स्त्री द्वि एक

गतिम् - इकार स्त्री द्वि एक

पदार्थः

समं - निर्विशेषम्

पश्यन् - उपलभमानः

समवस्थितम् - तुल्यतया अवस्थितम्

ईश्वरम् - परमेश्वरम्

हिनस्ति - हिंसाम् करोति

आत्मना - स्वेन

आत्मानं - स्वम्

याति - प्राप्नोति

परां - प्रकृष्टाम्

गतिम् - स्थितिम्

Downloaded from www.omkaravidya.com

अन्वयः
सर्वत्र समं समवस्थितम् ईश्वरम् पश्यन् आत्मना आत्मानं न हिनस्ति
ततः परां गतिम् याति हि ।

व्याकरणम्
▶ सन्धिः
हिनस्ति + आत्मानम् यण्सन्धिः
आत्मना + आत्मानम् - सवर्णदीरघसन्धिः
ततः + याति - विसर्गउकारः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथात्मानमकर्तारं स पश्यति । १३.२९॥
पदच्छेदः
प्रकृत्या एच कर्माणि क्रियमाणानि सर्वशः यः पश्यति तथा आत्मानम् अकर्तारं
सः पश्यति

पदपरिचयः
प्रकृत्या - इकार स्त्री तृ एक
कर्माणि - अकार नपु द्वि एक
क्रियमाणानि -अकार नपु द्वि एक
सर्वशः - अव्ययम्
पश्यति - लट् प्रपु एक
आत्मानम् - नकार पु द्वि एक
अकर्तारं - ऋकार पु द्वि एक

Downloaded from www.omkaravidya.com

पश्यति -  लट् प्रपु एक

पदार्थः
प्रकृत्या -  मायया
कर्माणि - कर्माणि
क्रियमाणानि -  निवर्त्यमानानि
सर्वशः - सर्वप्रकारैः
पश्यति - उपलभते
आत्मानम् - क्षेत्रज्ञम्
अकर्तारं - सर्वोपाधिवर्जितम्
पश्यति - उपलभते

अन्वयः
यः सर्वशः कर्माणि प्रकृत्या एच च क्रियमाणानि पश्यति तथा आत्मानम् अकर्तारं (पश्यति) सः पश्यति ।

व्याकरणम्
▶ सन्धिः
प्रकृत्या + एव - वृद्धिसन्धिः
तथा + आत्मानम् - सवर्णदीरघसन्धिः
सः + पश्यति - विसर्गलोपः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥ १३.३०॥

Downloaded from www.omkaravidya.com

पदच्छेदः
यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति ततः एव च विस्तारं ब्रह्म सम्पद्यते तदा

पदपरिचयः
भूतपृथग्भावम् - अकार पु द्वि एक
एकस्थम्  अकार पु द्वि एक
अनुपश्यति - लट् प्रपु एक
विस्तारं  अकार पु द्वि एक
ब्रह्म - नकार पु प्र एक
सम्पद्यते - लट् प्रपु एक

पदार्थः
भूतपृथग्भावम् -  भूतानाम् पृथग्भावम्
एकस्थम् -  एकस्मिन् आत्मनि स्थितम्
अनुपश्यति - सम्यक् पश्यति
विस्तारं - उत्पत्तिं विकासम्
ब्रह्म -  ब्रह्म
सम्पद्यते - भवति

अन्वयः
यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति ततः एव विस्तारं च  तदा ब्रह्म सम्पद्यते ।

व्याकरणम्
▶ सन्धिः
ततः  + एव - विसर्गलोपः

Downloaded from www.omkaravidya.com

▶ समासः
एकस्मिन् तिष्ठति इति एकस्थः - उपपदसमासः - तम्

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥१३.३१॥

पदच्छेदः
अनादित्वात् निर्गुणत्वात् परमात्मा अयम् अव्ययः शरीरस्थः अपि कौन्तेय न करोति न लिप्यते

पदपरिचयः
अनादित्वात् - अकार नपु प एक
निर्गुणत्वात् - अकार नपु प एक
परमात्मा - नकार पु प्र एक
अव्ययः - अकार पु प्र एक
शरीरस्थः अकार पु प्र एक
कौन्तेय - अकार पु सं प्र एक
करोति - लट् प्रपु एक
लिप्यते- लट् प्रपु एक

पदार्थः
अनादित्वात् - अनादेः भावात्

Downloaded from www.omkaravidya.com

निर्गुणत्वात् - गुणरहितत्वात्
परमात्मा - परमात्मा
अव्ययः - व्ययरहितः
शरीरस्थः - क्षेत्रस्थः
कौन्तेय - पार्थ
करोति -करोति
लिप्यते - लिप्यते

अन्वयः
हे कौन्तेय! अनादित्वात् निर्गुणत्वात् अयम् अव्ययः परमात्मा शरीरस्थः अपि न करोति न लिप्यते ।

व्याकरणम्
▶ सन्धिः
अनादित्वात् + निर्गुणत्वात् - अनुनासिकासन्धिः
शरीरस्थः + अपि - विसर्गउकारः पूर्वरूपसन्धिः

▶ समासः
शरीरे तिष्ठति इति शरीरस्थः - उपपदसमासः - तम्

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ १३.३२॥

Downloaded from www.omkaravidya.com

पदच्छेदः
यथा सर्वगतं सौक्ष्म्यात् आकाशं न उपलिप्यते सर्वत्र अवस्थित: देहे तथा आत्मा न उपलिप्यते

पदपरिचयः
सर्वगतं - अकार नपु प्र एक
सौक्ष्म्यात् अकार नपु प एक
आकाशं - अकार नपु प्र एक
उपलिप्यते - लट् कर्मणि प्रपु एक
अवस्थित: - अकार पु प्र एक
देहे - अकार पु स एक
आत्मा - नकार पु प्र एक
उपलिप्यते - लट् कर्मणि प्रपु एक

पदार्थः
सर्वगतं - सर्वव्यापि
सौक्ष्म्यात् - सूक्ष्मभावात्
आकाशं -खं
उपलिप्यते - सम्बध्यते
अवस्थित: - स्थित:
देहे - सारीरे
आत्मा - आत्मा
उपलिप्यते - सम्बध्यते

अन्वयः
यथा सर्वगतं आकाशं सौक्ष्म्यात् न उपलिप्यते तथा सर्वत्र देहे अवस्थित: आत्मा न उपलिप्यते ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

सौक्ष्म्यात्+ आकाशं- जश्त्वसन्धि:

न + उपलिप्यते - गुणसन्धि:

सर्वत्र + अवस्थित: - सवर्णदीर्घसन्धि:

तथा +आत्मा - सवर्णदीर्घसन्धि:

श्रीमद्भगवद्गीता - त्रयोदशोऽध्याय: - क्षेत्रक्षेत्रज्ञविभागयोग:

मूलश्लोक:

यथा प्रकाशयत्येक: कृत्स्नं लोकमिमं रवि: ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ १३.३३॥

पदच्छेदः

यथा प्रकाशयति एक: कृत्स्नं लोकम् इमं रवि: क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत

पदपरिचयः

प्रकाशयति - लट् प्रपु एक

एक: - अकार पु प्र एक

कृत्स्नं - अकार पु द्वि एक

लोकम् अकार पु द्वि एक

रवि: - इकार पु प्र एक

क्षेत्रं अकार नपु द्वि एक

क्षेत्री - नकार पु प्र एक

कृत्स्नं - अकार पु द्वि एक

Downloaded from www.omkaravidya.com

प्रकाशयति - लट् प्रपु एक
भारत - अकार पु सं प्र

पदार्थः
प्रकाशयति - अवभासयति
एकः - एकः
कृत्स्नं- सकलम्
लोकम् - भुवनम्
रविः - सूर्यः
क्षेत्रं - शरीरम्
क्षेत्री - परमात्मा
कृत्स्नं - सकलम्
प्रकाशयति  अवभासयति
भारत - अर्जुन
अन्वयः
हे भारत! एकः रविः कृत्स्नं इमं  लोकं यथा प्रकाशयति  तथा क्षेत्री कृत्स्नं क्षेत्रं  प्रकाशयति ।

व्याकरणम्
▶ सन्धिः
प्रकाशयति + एकः -यण्सन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥ १३.३४॥

पदच्छेदः
क्षेत्रक्षेत्रज्ञयोः एवम् अन्तरं ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च ये विदुः यान्ति ते परम्

पदपरिचयः
क्षेत्रक्षेत्रज्ञयोः - अकार पु ष द्वि
अन्तरं - अकार नपु द्वि एक
ज्ञानचक्षुषा - षकार नपु तृ एक
भूतप्रकृतिमोक्षं - अकार पु द्वि एक
विदुः - लट् प्रपु बहु
यान्ति - लट् प्रपु बहु
परम् - अकार पु द्वि एक

पदार्थः
क्षेत्रक्षेत्रज्ञयोः -शरीरात्मनोः
अन्तरं - वैलक्षणम्
ज्ञानचक्षुषा - ज्ञानचक्षुषा
भूतप्रकृतिमोक्षं - अविद्यानाशम्
विदुः - विजानन्ति
यान्ति - गच्छन्ति
परम् - परमार्थतत्वम्

Downloaded from www.omkaravidya.com

अन्वयः
क्षेत्रक्षेत्रज्ञयोः अन्तरं भूतप्रकृतिमोक्षं च ये ज्ञानचक्षुषा एवं विदुः  ते परम् यान्ति ।

व्याकरणम्
▶ सन्धिः
क्षेत्रक्षेत्रज्ञयोः + एवम् - विसर्गरेफः
विदुः + यान्ति - विसर्गरेफः

श्रीमद्भगवद्गीता - त्रयोदशोऽध्यायः - क्षेत्रक्षेत्रज्ञविभागयोगः

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

पदच्छेदः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगः नाम त्रयोदशः अध्यायः

पदपरिचयः
ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. पु एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीतासु - आकार. स्त्री  स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रह्मविद्यायां - आकार. स्त्री स एक
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे -  अकार. पु. स. एक
क्षेत्रक्षेत्रज्ञविभागयोगः- अकार. पु. प्र. एक
नाम - नकार.नपु. प्र  एक
त्रयोदशः - अकार. पु. प्र  एक
अध्यायः - अकार. पु. प्र  एक

पदार्थः
ॐ - ओम्
तत् - तत्
सत् - सत्
इति - एवम्
श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु
ब्रह्मविद्यायां - ब्रह्म पाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयोः मध्ये संवादे
क्षेत्रक्षेत्रज्ञविभागयोगः - क्षेत्रक्षेत्रज्ञविभागयोगः
नाम - नाम
त्रयोदशः: - त्रयोदशः
अध्यायः - अध्यायः

Downloaded from www.omkaravidya.com

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोग: नाम त्रयोदश: अध्याय: (संपूर्णम् भवति) ।

व्याकरणम्
▶सन्धिः
श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धि:
योग: + नाम - विसर्ग उकार:
त्रयोदश: + अध्याय: - विसर्ग उकार: पूर्वरूपसन्धि:

▶ समासः
ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारय:

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता

# चतुर्दशोऽध्यायः

# गुणत्रयविभागयोगः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

श्री भगवानुवाच

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।

यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १४.१॥

पदच्छेदः

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानम् उत्तमम् यत् ज्ञात्वा मुनयः सर्वे परां सिद्धिम् इतः गताः

पदपरिचयः

परं - अकार नपु द्वि एक

प्रवक्ष्यामि - लट् उपु एक

ज्ञानानां - अकार नपु ष बहु

ज्ञानम् - अकार नपु द्वि एक

उत्तमम् - अकार नपु द्वि एक

ज्ञात्वा - क्त्वान्त्

मुनयः इकार पु प्र बहु

परां - आकार स्त्री द्वि एक

सिद्धिम् - इकार स्त्री द्वि एक

गताः - अकार पु प्र बहु

पदार्थः

परं - श्रेष्ठम्

प्रवक्ष्यामि - कथयामि

Downloaded from www.omkaravidya.com

ज्ञानानां - ज्ञानानाम्

ज्ञानम् - ज्ञानम्

उत्तमम् - उत्तमफलत्वात् परम्

ज्ञात्वा -प्राप्य

मुनयः - संन्यासिनः

परां - पराम्

सिद्धिम् - मोक्षम्

गताः - प्राप्ताः

अन्वयः

श्री भगवानुवाच

यत् ज्ञात्वा सर्वे मुनयः इतः परां सिद्धिम् गताः (तत्) ज्ञानानाम् उत्तमम् परं ज्ञानं भूयः प्रवक्ष्यामि ।

व्याकरणम्

▶ सन्धिः

यत् + ज्ञात्वा - जश्त्वसन्धिः श्चुत्वसन्धिः

इतः + गताः - विसर्गउकारः

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

श्री भगवानुवाच

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।

सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ १४.०२॥

Downloaded from www.omkaravidya.com

पदच्छेदः

इदं ज्ञानम् उपाश्रित्य मम साधर्म्यम् आगताः सर्गे अपि न उपजायन्ते प्रलये न व्यथन्ति च

पदपरिचयः

ज्ञानम् - अकार नपु द्वि एक

उपाश्रित्य - ल्यबन्तम्

साधर्म्यम् - अकार नपु द्वि एक

आगताः - अकार पु प्र बहु

सर्गे - अकार पु स एक

उपजायन्ते - लट् प्रपु बहु

प्रलये - अकार पु स एक

व्यथन्ति लट् प्रपु बहु

पदार्थः

ज्ञानम् - ज्ञानसाधनम्

उपाश्रित्य - अनुष्ठाय

साधर्म्यम् - मत्स्वरूपताम्

आगताः - प्राप्ताः

सर्गे - सृष्टिकाले

उपजायन्ते - उत्पद्यन्ते

प्रलये - विनाशकाले

व्यथन्ति - च्यवन्ति

Downloaded from www.omkaravidya.com

अन्वयः
(ये) इदं ज्ञानम् उपाश्रित्य मम साधर्म्यम् आगताः (ते) सर्गे न उपजायन्ते प्रलये अपि न व्यथन्ति च ।

व्याकरणम्
▶ सन्धिः
सर्गे + अपि - पूर्वरूपसन्धिः
न + उपजायन्ते - गुणसन्धिः

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

श्री भगवानुवाच
मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्।
सम्भवः सर्वभूतानां ततो भवति भारत ॥ १४.३॥

पदच्छेदः
मम योनिः महद् ब्रह्म तस्मिन् गर्भं दधामि अहम् सम्भवः सर्वभूतानां ततः भवति भारत

पदपरिचयः
योनिः - इकार स्त्री प्र एक
महद् - दकार नपु प्र एक
ब्रह्म - नकार नपु प्र एक
गर्भं - अकार पु पद्वि एक

Downloaded from www.omkaravidya.com

दधामि - लट् उपु एक

सम्भवः - अकार पु प्र एक

सर्वभूतानां -अकार नपु ष बहु

ततः - अव्ययम्

भवति - लट् प्रपु एक

भारत - अकार पु सं प्र

पदार्थः

योनिः - प्रकृतिः

महद् - मूलकारणम्

ब्रह्म - आधारम्

गर्भं - सङ्कल्परूपबीजम्

दधामि - निक्षिपामि

सम्भवः - उत्पत्तिः

सर्वभूतानां - सर्वप्राणिनाम्

ततः - पश्चात्

भवति - भवति

भारत - हे अर्जुन

अन्वयः

हे भारत! मम योनिः महद् ब्रह्म । तस्मिन् अहं गर्भं दधामि ततः सर्वभूतानां सम्भवः भवति ।

व्याकरणम्

▶ सन्धिः

योनिः + महद् - विसर्गरेफः

Downloaded from www.omkaravidya.com

महत् +ब्रह्म - जश्त्वसन्धिः
दधामि  + अहम् - यण्सन्धिः
ततः + भवति - विसर्गउकारः

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः
श्री भगवानुवाच

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ १४.४॥

पदच्छेदः
सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः तासां ब्रह्म महत् योनिः अहं बीजप्रदः पिता

पदपरिचयः
सर्वयोनिषु - इकार स्त्री स बहु
कौन्तेय - अकार पु सं प्र
मूर्तयः  इकार स्त्री प्र बहु
सम्भवन्ति - लट् प्रपु बहु
ब्रह्म - नकार नपु प्र एक
महत् - तकार नपु प्र एक
योनिः - इार स्त्री प्र एक
बीजप्रदः - अकार पु प्र एक
पिता - ऋकार पु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः

सर्वयोनिषु - देवपितृमनुष्यपशुमृगिदसर्वयोनिषु

कौन्तेय - हे अर्जुन!

मूर्तयः -शरीराणि

सम्भवन्ति - जायन्ते

ब्रह्म - ब्रह्म

महद्योनिः - प्रकृतिः

बीजप्रदः - गर्भाधानस्य कर्ता

पिता - पिता

अन्वयः

हे कौन्तेय! सर्वयोनिषु याः मूर्तयः सम्भवन्ति तासां महत्ब्रह्म योनिः अहं बीजप्रदः पिता ।

व्याकरणम्

▶ सन्धिः

महत् + योनिः -जश्त्वसन्धिः

योनिः + अहम् - विसर्गरेफः

▶ समासः

बीजं प्रददाति इति बीजप्रदः - उपपदसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः
श्री भगवानुवाच

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ 14.5॥

पदच्छेदः
सत्त्वं रजः तमः इति गुणाः प्रकृतिसम्भवाः निबध्नन्ति महाबाहो देहे देहिनम् अव्ययम्

पदपरिचयः
सत्त्वं - अकार नपु प्र एक
रजः - सकार नपु प्र एक
तमः - सकार नपु प्र एक
गुणाः - अकार पु प्र एक
प्रकृतिसम्भवाः अकार पु प्र बहु
निबध्नन्ति - लट् प्रपु बहु
महाबाहो - अकार पु सं प्र
देहे - अकार पु स एक
देहिनम् - नकार पु द्वि एक
अव्ययम् - अकार पु द्वि एक

पदार्थः
सत्त्वं - सत्त्वम्

Downloaded from www.omkaravidya.com

रजः - रजः

तमः - तमः

गुणाः - गुणाः

प्रकृतिसम्भवाः - भगवन्मायासम्भवाः

निबध्नन्ति - निबध्नन्ति

महाबाहो - हे अर्जुन!

देहे - शरीरे

देहिनम् - देहवन्तम्

अव्ययम् - अक्षयम्

अन्वयः

हे महाबाहो! सत्त्वं रजः तमः इति प्रकृतिसम्भवाः गुणाः अव्ययम् देहिनम् देहे निबध्नन्ति ।

व्याकरणम्

▶ सन्धिः

रजः + तमः - विसर्गसकारः

तमः + इति - विसर्गलोपः

▶ समासः

प्रकृतेः सम्भवाः - प्रकृतिसंभवाः - पञ्चमीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

श्री भगवानुवाच
तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥१४.६॥

पदच्छेदः
तत्र सत्त्वं निर्मलत्वात् प्रकाशकम् अनामयम् सुखसङ्गेन बध्नाति ज्ञानसङ्गेन च अनघ

पदपरिचयः
सत्त्वं - अकार नपु प्र एक
निर्मलत्वात् - अकार नपु प एक
प्रकाशकम् - अकार नपु प्र एक
अनामयम् - अकार नपु प्र एक
सुखसङ्गेन - अकार पु तृ एक
बध्नाति - लट् प्रपु एक
ज्ञानसङ्गेन अकार पु तृ एक
अनघ - अकार पु सं प्र

पदार्थः
सत्त्वं - सत्त्वं
निर्मलत्वात् - स्वच्छत्वात्
प्रकाशकम् -भासकम्

Downloaded from www.omkaravidya.com

अनामयम् - निरुपद्रवम्
सुखसङ्गेन - सुखयोगेन
बध्नाति -बध्नाति
ज्ञानसङ्गेन - ज्ञानयोगेन
अनघ - पापरहित

अन्वयः
हे अनघ तत्र  निर्मलत्वात् प्रकाशकम् अनामयम् सत्त्वं सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति ।

व्याकरणम्
▶ सन्धिः
च + अनघः - सवर्णदीर्घसन्धिः

▶ समासः
सुखेन सङ्गः सुखसङ्गः - तृतीयातत्पुरुषः - तेन
ज्ञानेन सङ्गः ज्ञानसङ्गः - तृतीयातत्पुरुषः - तेन
न अघम्  अनघम्  नञ्बहुव्रीहिः - संबोधनम्

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥१४.७॥

Downloaded from www.omkaravidya.com

पदच्छेदः
रजः रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् तत् निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्

पदपरिचयः
रजः - सकार नपु द्वि एक
रागात्मकं - अकार नपु द्वि एक
विद्धि - लोट् मपु एक
तृष्णासङ्गसमुद्भवम् - अकार पु द्वि एक
निबध्नाति - लट् प्रपु एक
कौन्तेय - अकार पु सं प्र कर्मसङ्गेन -अकार पु तृ एक
देहिनम् - नकार पु द्वि एक

पदार्थः
रजः - रजः
रागात्मकं - रञ्जनात्मकम्
विद्धि - जानीहि
तृष्णासङ्गसमुद्भवम् - अभिलाषासक्तिसमुत्पन्नम्
निबध्नाति - निबध्नाति
कौन्तेय - हे अर्जुन!
कर्मसङ्गेन - कर्मसंबन्धेन
देहिनम् - शरीरिणम्

अन्वयः
हे कौन्तेय! रागात्मकं रजः तृष्णासङ्गसमुद्भवम् विद्धि तत् कर्मसङ्गेन देहिनम् निबध्नाति ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

रजः + रागात्मकं - विसर्गउकारः

तत् + निबध्नाति- अनुनासिकासन्धिः

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥१४.८॥

पदच्छेदः

तमः तु अज्ञानजं विद्धि मोहनं सर्वदेहिनाम् प्रमादालस्यनिद्राभिः तत् निबध्नाति भारत

पदपरिचयः

तमः - सकार नपु द्वि एक

अज्ञानजं - अकार नपु द्वि एक

विद्धि- लोट् मपु एक

मोहनं - अकार नपु द्वि एक

सर्वदेहिनाम् - नकार पु ष बहु

प्रमादालस्यनिद्राभिः - आकार स्त्री तृ बहु

निबध्नाति लट् प्रपु एक

भारत - अकार पु सं प्र

Downloaded from www.omkaravidya.com

पदार्थः

तमः - तमोगुणः

अज्ञानजं - अज्ञानात् जातम्

विद्धि - जानीहि

मोहनं - मोहकरम्

सर्वदेहिनाम् - सर्वदेहवताम्

प्रमादालस्यनिद्राभिः - प्रमादालस्यनिद्राभिः

निबध्नाति - निबध्नाति

भारत -हे अर्जुन

अन्वयः

हे भारत! तु अज्ञानजं सर्वदेहिनाम् तमः मोहनं विद्धि । तत् प्रमादालस्यनिद्राभिः निबध्नाति ।

व्याकरणम्

▶ सन्धिः

तमः + तु - विसर्गसकारः

प्रमादालस्यनिद्राभिः + तत् - विसर्गसकारः

तत् + निबध्नाति - अनुनासिकासन्धिः

▶ समासः

प्रमादः च आलस्यं च निद्रा च - प्रमादालस्यनिद्राः - इतरेतरद्वन्द्वसमासः - ताभिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥१४.९॥

पदच्छेदः
सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ज्ञानम् आवृत्य तु तमः प्रमादे सञ्जयति उत

पदपरिचयः
सत्त्वं - अकार नपु प्र एक
सुखे - अकार नपु स एक
सञ्जयति - लट् प्रपु एक
रजः - सकार नपु प्र एक
कर्मणि - नकार नपु स एक
भारत - अकार पु सं प्र
ज्ञानम् - अकार नपु द्वि एक
आवृत्य - ल्यबन्तम्
तमः - सकार नपु प्र एक
प्रमादे - अकार पु स एक
सञ्जयति - लट् प्रपु एक
उत - अव्ययम्

Downloaded from www.omkaravidya.com

पदार्थः

सत्त्वं -सत्त्वगुणः

सुखे - सुखे

सञ्जयति- संश्लेषयति

रजः - रजः

कर्मणि कर्मणि

भारत - अर्जुन

ज्ञानम् -सत्त्वकृतं विवेकम्

आवृत्य - आच्छाद्य

तमः - तमः

प्रमादे - प्राप्तकर्तव्याकरणम्

सञ्जयति - सञ्जयति

उत - उत

अन्वयः

हे भारत! सत्त्वं सुखे सञ्जयति, रजः कर्मणि, तमः तु ज्ञानम् आवृत्य प्रमादे उत सञ्जयति ।

व्याकरणम्

▶ सन्धिः

सञ्जयति + उत - यण्सन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥१४.१०॥

पदच्छेदः
रजः तमः च अभिभूय सत्त्वं भवति भारत रजः सत्त्वं तमः च एच तमः सत्त्वं रजः तथा

पदपरिचयः
रजः- सकार नपु द्वि एक
तमः  सकार नपु द्वि एक
अभिभूय - ल्यबन्तम्
सत्त्वं - अकार नपु प्र एक
भवति - लट् प्रपु एक
भारत - अकार पु सं प्र
रजः - सकार नपु प्र एक
सत्त्वं - अकार नपु द्वि एक
तमः - सकार नपु द्वि एक
तमः - सकार नपु प्र एक
सत्त्वं - अकार नपु द्वि एक
रजः - सकार नपु द्वि एक

Downloaded from www.omkaravidya.com

पदार्थः

रजः- रजः

तमः - तमः

अभिभूय - अतिक्रम्य

सत्त्वं - सत्त्वगुणः

भवति - वर्धते

भारत - अर्जुन

रजः - रजः

सत्त्वं - सत्त्वगुणः

तमः - तमः

तमः - तमः

सत्त्वं - सत्त्वगुणः

रजः - रजः

अन्वयः

हे भारत! रजः तमः च अभिभूय सत्त्वं भवति एव । रजः सत्त्वं तमः च एव (अभिभूय भवति) । तथा तमः सत्त्वं रजः (अभिभूय भवति) ।

व्याकरणम्

▶ सन्धिः

रजः + तमः - विसर्गसकारः

तमः + च - विार्गसकारः

च + अभिभूय - सवर्णदीर्घसन्धिः

तमः + च - विसर्गसकारः

च + एव - वृद्धिसन्धिः

रजः + तथा - विसर्गसकारः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - अथ चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत ॥ १४.११॥

पदच्छेदः
सर्वद्वारेषु देहे अस्मिन् प्रकाशः उपजायते ज्ञानं यदा तदा विद्यात् विवृद्धं सत्वम् इति उत

पदपरिचयः
सर्वद्वारेषु - अकार नपु स बहु
देहे - अकार पु स एक
प्रकाशः - अकार पु प्र एक
उपजायते - लट् प्रपु एक
ज्ञानं - अकार नपु प्र एक
विद्यात् - विधि प्रपु एक
विवृद्धं - अकार नपु द्वि एक
सत्वम् - अकार नपु द्वि एक

पदार्थः
सर्वद्वारेषु - सकलेन्द्रियेषु
देहे - शरीरे
प्रकाशः - ज्योतिस्वरूपम्

Downloaded from www.omkaravidya.com

उपजायते - उपजायते
ज्ञानं - ज्ञानं
विद्यात् - जानीयात्
विवृद्धं - प्रवृद्धम्
सत्वम् - सत्वम्

अन्वयः
यदा अस्मिन् देहे सर्वद्वारेषु प्रकाशः ज्ञानं उपजायते तदा सत्वम् विवृद्धं इति उत विद्यात् ।

व्याकरणम्
▶ सन्धिः
देहे + अस्मिन् : - पूर्वरूपसन्धिः
प्रकाशः + उपजायते - विसर्गलोप
विद्यात् + विवृद्धम् - जश्त्वसन्धिः
इति + उत - यण्सन्धिः

श्रीमद्भगवद्गीता - अथ चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

लोभः प्रवृत्तिरारभ्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥१४.१२॥

Downloaded from www.omkaravidya.com

पदच्छेदः

लोभः प्रवृत्तिः आरम्भः कर्मणाम् अशमः स्पृहा रजसि एतानि जायन्ते विवृद्धे भरतर्षभ

पदपरिचयः

लोभः - अकार पु प्र एक

प्रवृत्तिः - इकार स्त्री प्र एक

आरम्भः - अकार पु प्र एक

कर्मणाम् - नकार पु ष बहु

अशमः - अकार पु प्र एक

स्पृहा - आकार स्त्री प्र एक

रजसि - सकार नपु स एक

जायन्ते - लट् प्रपय बहु

विवृद्धे - अकार नपु स एक

भरतर्षभ - अकार पु सं प्र

पदार्थः

लोभः - परद्रव्यादित्सा

प्रवृत्तिः - सामान्यचेष्टा

आरम्भः - आरम्भः

कर्मणाम् - कार्याणाम्

अशमः - हर्षरागादिप्रवृत्तिः

स्पृहा - तृष्णा

रजसि - गुणे

जायन्ते - जायन्ते

विवृद्धे – विवृद्धे भरतर्षभ - अर्जुन

Downloaded from www.omkaravidya.com

अन्वयः
हे भरतर्षभ! लोभः प्रवृत्तिः कर्मणाम् आरम्भः  अशमः स्पृहा एतानि रजसि विवृद्धे जायन्ते  ।

व्याकरणम्
▶ सन्धिः
प्रवृत्तिः + आरम्भः  विसर्गरेफः
रजसि + एतानि -  यण्सन्धिः

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १४.१३॥

पदच्छेदः
अप्रकाशः अप्रवृत्तिः च प्रमादः मोहः एव च तमसि एतानि जायन्ते विवृद्धे कुरुनन्दन

पदपरिचयः
अप्रकाशः - अकार पु प्र एक
अप्रवृत्तिः - इ स्त्री प्र एक
प्रमादः - अकार पु प्र एक

Downloaded from www.omkaravidya.com

मोहः - अकार पु प्र एक

तमसि - सकार नपु स एक

जायन्ते - लट् प्रपु बहु

विवृद्धे - अकार नपु स एक

कुरुनन्दन - अकार पु सं प्र

पदार्थः

अप्रकाशः - अविवेकः

अप्रवृत्तिः - प्रवृत्तयभावः

प्रमादः - अनवधानम्

मोहः - मिथ्या अभिनिवेशः

तमसि - गुणे

जायन्ते - जायन्ते

विवृद्धे - प्रवृद्धे

कुरुनन्दन - अर्जुन

अन्वयः

हे कुरुनन्दन! अप्रकाशः अप्रवृत्तिः च प्रमादः मोहः एव च एतानि तमसि विवृद्धे जायन्ते ।

व्याकरणम्

▶ सन्धिः

अप्रकाशः + अप्रवृत्तिः - विसर्गउकारः पूर्वरूपसन्धिः

अप्रवृत्तिः + च - विसर्गसकारः

प्रमादः + मोहः - विसर्गउकारः

मोहः + एव - विसर्गलोपः

तमसि + एतानि - यण्सन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोकः

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥ १४.१४॥

पदच्छेदः
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् तदा उत्तमविदां लोकान् अमलान् प्रतिपद्यते
पदपरिचयः
सत्त्वे - नकार नपु स एक
प्रवृद्धे - अकार नपु स एक
प्रलयं - अकार पु द्वि एक
याति - लट् प्रपु एक
देहभृत् - तकार पु प्र एक
उत्तमविदां - तकार पु ष बहु
लोकान् - अकार पु द्वि बहु
अमलान् - अकार पु द्वि बहु
प्रतिपद्यते - लट् प्रपु एक

पदार्थः
सत्त्वे - सत्त्वे
प्रवृद्धे - विवृद्धे
प्रलयं - मरणम्

Downloaded from www.omkaravidya.com

याति - प्रतिपद्यते
देहभृत् - शरीरधारी
उत्तमविदां - महदादितत्त्वविदाम्
लोकान् - लोकान्
अमलान् - मलरहितान्
प्रतिपद्यते - प्राप्नोति

अन्वयः
यदा तु सत्त्वे प्रवृद्धे देहभृत् प्रलयं याति तदा उत्तमविदां अमलान् लोकान् प्रतिपद्यते ।

व्याकरणम्
▶ सन्धिः
तदा + उत्तमविदां - गुणसन्धिः

▶ समासः
देहं बिभर्ति इति देहभृत् - उपपदसमासः
उत्तमं वेत्ति - उत्तमविद् उपपदसमासः

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १४.१५॥

Downloaded from www.omkaravidya.com

पदच्छेदः

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते तथा प्रलीनः तमसि मूढयोनिषु जायते

पदपरिचयः

रजसि - सकार नपु स एक

प्रलयं - अकार पु द्वि एक

गत्वा - क्त्वान्तम्

कर्मसङ्गिषु - नकार पु स बहु

जायते - लट् प्रपु एक

प्रलीनः - अकार पु प्र एक

तमसि - सकार नपु स एक

मूढयोनिषु - इकार स्त्री स बहु

जायते लट् प्रपु एक

पदार्थः

रजसि - रजोगुणे

प्रलयं - मरणम्

गत्वा - प्राप्य

कर्मसङ्गिषु - कर्मासक्तियुक्तेषु

जायते - उद्भवति

प्रलीनः - मृतः

तमसि - तमसि गुणे

मूढयोनिषु - पश्वादियोनिषु

जायते - जायते

Downloaded from www.omkaravidya.com

अन्वयः
(यथा) रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते तथा तमसि प्रलीनः मूढयोनिषु जायते ।

व्याकरणम्
▶ सन्धिः
प्रलीनः + तमसि - विसर्गसकारः

▶ समासः
कर्मसु सज्जन्ते तच्छीलाः कर्मसङ्गिनः - तेषु
मूढा योनिः येषां ते - मूढयोनिः - व्यधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १४.१६॥

पदच्छेदः
कर्मणः सुकृतस्य आहुः सात्त्विकं निर्मलं फलम् रजसः तु फलं दुःखम् अज्ञानं तमसः फलम्

Downloaded from www.omkaravidya.com

पदपरिचयः

कर्मणः - नकार पु ष एक

सुकृतस्य - अकार नपु ष एक

आहुः - लट् प्रपु बहु

सात्त्विकं - अकार नपु प्र एक

निर्मलं - अकार नपु प्र एक

फलम् - अकार नपु प्र एक

रजसः - सकार नपु ष एक

फलं - अकार नपु प्र एक

दुःखम् - अकार नपु प्र एक

अज्ञानं - अकार नपु प्र एक

तमसः - सकार नपु ष एक

फलम् - अकार नपु प्र एक

पदार्थः

कर्मणः - कर्मणः

सुकृतस्य - सात्त्विकस्य

आहुः - वदन्ति

सात्त्विकं - सत्त्वसम्पन्नम्

निर्मलं - परिशुद्धम्

फलम् - फलम्

रजसः -रजसः

फलं - फलम्

दुःखम् - दुःखम्

अज्ञानं - अज्ञानं

तमसः - तमसस्य

Downloaded from www.omkaravidya.com

फलम् - फलम्

अन्वयः
सुकृतस्य कर्मणः निर्मलं पफलम् सात्त्विकं आहुः । रजसः तु फलं दुःखम् तमसः फलम् अज्ञानं (आहुः) ।

व्याकरणम्
▶ सन्धिः
सुकृतस्य + आहुः - सवर्णदीर्घसन्धिः
रजसः + तु - विसर्गसकारः

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥ १४.१७॥

पदच्छेदः
सत्त्वात् सञ्जायते ज्ञानं रजसः लोभः एव च प्रमादमोहौ तमसः भवतः अज्ञानम् एव च

Downloaded from www.omkaravidya.com

पदपरिचयः

सत्त्वात् - अकार नपु प एक

सञ्जायते - लट् प्रपु एक

ज्ञानं - अकार नपु प्र एक

रजसः - सकार नपु प एक

लोभः - अकार पु प्र एक

प्रमादमोहौ - अकार पु प्र द्वि

तमसः - सकार नपु प एक

भवतः - लट् प्रपु द्वि

अज्ञानम् - अकार नपु प्र एक

पदार्थः

सत्त्वात् - सत्त्वगुणात्

सञ्जायते - समुत्पद्यते

ज्ञानं - ज्ञानम्

रजसः - रजोगुणम्

लोभः - लोभः

प्रमादमोहौ - प्रमादमोहौ

तमसः - तमोगुणम्

भवतः - वर्तेते

अज्ञानम् - अज्ञानम्

अन्वयः

सत्त्वात् ज्ञानं सञ्जायते । रजसः लोभः एव च (सञ्जायते) । तमसः प्रमादमोहौ भवतः अज्ञानम् एव च (भवति) ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

रजसः + लोभः - विसर्गउकारः

लोभः + एव - विसर्गलोपः

तमसः + भवतः - विसर्गउकारः

भवतः + अज्ञानम् - विसर्गउकारः पूर्वरूपसन्धिः

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥१४.१८॥

पदच्छेदः

ऊर्ध्वं गच्छन्ति सत्त्वस्थाः मध्ये तिष्ठन्ति राजसाः जघन्यगुणवृत्तिस्थाः अधः गच्छन्ति तामसाः

पदपरिचयः

ऊर्ध्वं - अव्ययम्

गच्छन्ति - लट् प्रपु बहु

सत्त्वस्थाः - अकार पु प्र बहु

मध्ये - अकार पु स एक

तिष्ठन्ति - लट् प्रपु बहु

राजसाः - अकार पु प्र बहु

Downloaded from www.omkaravidya.com

जघन्यगुणवृत्तिस्थाः -  अकार पु प्र बहु
अधः  - अव्ययम्
गच्छन्ति - लट् प्रपु बहु
तामसाः- अकार पु प्र बहु

पदार्थः
ऊर्ध्वं - देवलोकादिषु
गच्छन्ति - उत्पद्यन्ते
सत्त्वस्थाः - सत्त्वगुणवृत्तस्थाः
मध्ये - मध्ये
तिष्ठन्ति - उत्पद्यन्ते
राजसाः - राजोगुणप्रधानाः
जघन्यगुणवृत्तिस्थाः - नीचगुणप्रवृत्तिसंस्थिताः
अधः - पश्वादिषु
गच्छन्ति - उत्पद्यन्ते
तामसाः - तामोगुणप्रधानाः

अन्वयः
सत्त्वस्थाः ऊर्ध्वं गच्छन्ति । राजसाः मध्ये तिष्ठन्ति । जघन्यगुणवृत्तिस्थाः तामसाः अधः गच्छन्ति ।

व्याकरणम्
▶ सन्धिः
सत्त्वस्थाः + मध्ये - विसर्गलोपः
जघन्यगुणवृत्तिस्थाः + अधः -विसर्गलोपः
अधः + गच्छन्ति - विसर्गउकारः

Downloaded from www.omkaravidya.com

▶ समासः

सत्त्वे तिष्ठन्ति -सत्त्वस्थाः उपपदसमासः

जघन्यः च असौ गुणः च - जघन्यगुणः - विशेषपूर्वपदकर्मधारयसमासः

तस्य वृत्तिः- जघन्यगुणवृत्तिः -षष्ठितत्पुरुष

जघन्यगुणवृत्तौ तिष्ठति - जघन्यगुणवृत्तिस्थाः - उपपदसमासः

## श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १४.१९॥

पदच्छेदः

न अन्यं गुणेभ्यः कर्तारं यदा द्रष्टा अनुपश्यति गुणेभ्यः च परं वेत्ति मद्भावं सः अधिगच्छति

पदपरिचयः

अन्यं - अकार पु द्वि एक

गुणेभ्यः - अकार पु प एक

कर्तारं - अकार पु द्वि एक

द्रष्टा - ऋकार पु प्र एक

अनुपश्यति - लट् प्रपु एक

गुणेभ्यः - अकार पु प एक

परं - अकार पु द्वि एक

वेत्ति - लट् प्रपु एक

Downloaded from www.omkaravidya.com

मद्भावं- अकार पु द्वि एक
अधिगच्छति - लट् प्रपु एक

पदार्थः
अन्यं - इतरम्
गुणेभ्यः - कार्यकरणविषयाकारपरिणतेभ्यः
कर्तारं - कर्तारम्
द्रष्टा - विद्वान्
अनुपश्यति - अवलोकते
गुणेभ्यः - गुणेभ्य
परं - परम्
वेत्ति - जानाति
मद्भावं - मम भावम्
अधिगच्छति – लभते

अन्वयः
यदा द्रष्टा गुणेभ्यः अन्यं कर्तारं न अनुपश्यति गुणेभ्यः च परं वेत्ति सः मद्भावं अधिगच्छति ।

व्याकरणम्
▶ सन्धिः
न + अन्यम् - सवर्णदीर्घसन्धिः
द्रष्टा + अनुपश्यति सवर्णदीर्घसन्धिः
गुणेभ्यः + च - विसर्गसकारः
सः + अधिगच्छति - विसर्गउकारः पूर्वरूपसन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

गुणानेतानतीन्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ १४.२०॥

पदच्छेदः
गुणान् एतान् अतीन्य त्रीन् देही देहसमुद्भवान् जन्ममृत्युजरादुःखैः विमुक्तः अमृतम् अश्नुते

पदपरिचयः
गुणान् - अकार पु द्वि बहु
एतान् - दकार पु द्वि बहु
अतीन्य - ल्यबन्तम्
त्रीन् - इकार पु द्वि बहु
देही - नकार पु प्र एक
देहसमुद्भवान् - तकार पु द्वि बहु
जन्ममृत्युजरादुःखैः- अकार नपु तृ बहु
विमुक्तः - अकार पु प्र एक
अमृतम् - अकार नपु द्वि एक
अश्नुते - लट् प्रपु एक

पदार्थः
गुणान् - गुणान्

Downloaded from www.omkaravidya.com

एतान् - यथोक्तान्

अतीन्य - अतिक्रम्य

त्रीन् - त्रीन्

देही - विद्वान्

देहसमुद्भवान् - सरीरकारणभूतान्

जन्ममृत्युजरादु:खैः - जननमरणजराक्लेशैः

विमुक्तः - मुक्तः

अमृतम् - ब्रहसमानन्दम्

अश्नुते - प्राप्नोति

अन्वयः

देही देहसमुद्भवान् एतान् त्रीन् गुणान् अतीन्य जन्ममृत्युजरादु:खैः विमुक्तः अमृतम् अश्नुते ।

व्याकरणम्

▶ सन्धिः

जन्ममृत्युजरादु:खैः + विमुक्तः - विसर्गरेफः

विमुक्तः + अमृतम् - विसर्गउकारः

▶ समासः

जन्म च मृत्युः च जरा च - जन्ममृत्युजराः - इतरेतरद्वन्द्वसमासः

जन्ममृत्युजराः एव दु:खानि - जन्ममृत्युजरादु:खानि - आवधारणपूर्वपदकर्मधारयसमासः -तैः

देहस्य समुद्भवः - देहसमुद्भवः -षष्ठीतत्पुरुषः - तान्

Downloaded from www.omkaravidya.com

मूलश्लोकः

अर्जुन उवाच
कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥ १४.२१॥

पदच्छेदः
कैः लिङ्गैः त्रीन् गुणान् एतान् अतीतः  भवति प्रभो किम् आचारः कथं च एतान् त्रीन् गुणान् अतिवर्तते

पदपरिचयः
लिङ्गैः - अकार नपु तृ बहु
त्रीन् - इकार पु द्वि बहु
गुणान्  - अकार पु द्वि बहु
अतीतः  - अकार पु प्र एक
भवति - लट् प्रपु एक
प्रभो - उकार पु सं प्र
आचारः -  अकार पु प्र एक
त्रीन् - अकार पु द्वि बहु
गुणान् -अकार पु द्वि बहु
अतिवर्तते  - लट् प्रपु एक

पदार्थः
लिङ्गैः- चिह्नैः

Downloaded from www.omkaravidya.com

त्रीन् - त्रीन्

गुणान् - गुणान्

अतीतः - अतिक्रान्तः

भवति - अस्ति

प्रभो - प्रभो

आचारः - आचारः

त्रीन् - त्रीन्

गुणान् - गुणान्

अतिवर्तते - अतिक्राम्यति

अन्वयः

अर्जुन उवाच

हे प्रभो ! कैः लिङ्गैः एतान् त्रीन् गुणान् अतीतः भवति । किम् आचारः कथं च एतान् त्रीन् गुणान् अतिवर्तते ?।

व्याकरणम्

▶ सन्धिः

कैः + लिङ्गैः - विसर्गरेफः

लिङ्गैः +त्रीन् - विसर्गसकारः

अतीतः + भवति - विसर्गउकारः

च + एतान् - वृद्धिसन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोकः

श्री भगवानुवाच
प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ॥ १४.२२॥

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥ १४.२३॥

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥ १४.२४॥

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥ १४.२५ ॥

पदच्छेदः
प्रकाशं च प्रवृत्तिं च मोहम् एव च पाण्डव न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि च काङ्क्षति उदासीनवत् आसीनः गुणैः यः न विचाल्यते गुणाः वर्तन्ते इति एव यः अवतिष्ठति न इङ्गते समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः धीरः तुल्यनिन्दात्मसंस्तुतिः मानापमानयोः तुल्यः तुल्यः मित्रारिपक्षयोः सर्वारम्भपरित्यागी गुणातीतः सः उच्यते

पदपरिचयः

Downloaded from www.omkaravidya.com

प्रकाशं - अकार पु द्वि एक
प्रवृत्तिं - इकार स्त्री द्वि एक
मोहम् - अकार पु द्वि एक
पाण्डव - अकार पु सं प्र
द्वेष्टि - लट् प्रपु एक
सम्प्रवृत्तानि - अकार नपु द्वि बहु
निवृत्तानि- अकार नपु द्वि बहु
काङ्क्षति - लट् प्रपु एक
उदासीनवत् - अव्ययम्
आसीनः - लट् प्रपु एक
गुणैः - अकार पु तृ बहु
विचाल्यते - कर्मणि णिच् प्रपु एक
गुणाः - अकार पु प्र बहु
वर्तन्ते - लट् प्रपु बहु
अवतिष्ठति - लट् प्रपु एक
इङ्गते लट् प्रपु एक
समदुःखसुखः - अकार पु प्र एक
स्वस्थः- अकार पु प्र एक
समलोष्टाश्मकाञ्चनः - अकार पु प्र एक
तुल्यप्रियाप्रियः - अकार पु प्र एक
धीरः- अकार पु प्र एक
तुल्यनिन्दात्मसंस्तुतिः- इकार पु प्र एक
मानापमानयोः - अकार पु स द्वि
तुल्यः - अकार पु प्र एक
तुल्यः - अकार पु प्र एक
मित्रारिपक्षयोः - अकार पु स द्वि

Downloaded from www.omkaravidya.com

सर्वारम्भपरित्यागी - नकार पु प्र एक
गुणातीतः- अकार पु प्र एक
उच्यते - कर्मणि लट् प्रपु एक

पदार्थः
प्रकाशं - सत्त्वकार्यम्
प्रवृत्तिं - रजः कार्यम्
मोहम् - तमः कार्यम्
पाण्डव - अर्जुन
द्वेष्टि - द्वेष्टि
सम्प्रवृत्तानि - सम्प्राप्तानि
निवृत्तानि - अतीतानि
काङ्क्षति - स्पृहयति
उदासीनवत् - तटस्थवत्
आसीनः - तिष्ठन्
गुणैः - गुणैः
विचाल्यते - विचाल्यते
गुणाः - गुणाः
वर्तन्ते - वर्तन्ते
अवतिष्ठति - अवतिष्ठति
इङ्गते - चलति
समदुःखसुखः -क्लेशानन्दयोः समानः
स्वस्थः - प्रसन्नः
समलोष्टाश्मकाञ्चनः - मृत्पाषाणसुवर्णेषु समानः
तुल्यप्रियाप्रियः - तुल्यप्रियाप्रियः
धीरः- धीमान्

Downloaded from www.omkaravidya.com

तुल्यनिन्दात्मसंस्तुतिः - दूषणप्रशंसयोः तुल्यः
मानापमानयोः - माने च अपमाने च
तुल्यः - समानः
तुल्यः - समानः
मित्रारिपक्षयोः - मित्रारिपक्षयोः
सर्वारम्भपरित्यागी -सर्वकर्मपरित्यागी
गुणातीतः - गुणातीतः
उच्यते - कथ्यते

अन्वयः
हे पाण्डव! यः प्रकाशं च प्रवृत्तिं च मोहम् एव च सम्प्रवृत्तानि न द्वेष्टि निवृत्तानि च न काङ्क्षति उदासीनवत् आसीनः गुणैः यः न विचाल्यते गुणाः एव वर्तन्ते इति अवतिष्ठति यः न इङ्गते समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः धीरः तुल्यनिन्दात्मसंस्तुतिः मानापमानयोः तुल्यः मित्रारिपक्षयोः तुल्यः सर्वारम्भपरित्यागी सः गुणातीतः उच्यते ।

व्याकरणम्
▶ सन्धिः
उदासीनवत् + आसीनः - जश्त्वसन्धिः
गुणैः + यः - विसर्गरेफः
गुणाः + वर्तन्ते - विसर्गलोपः
यः + अवतिष्ठति - विसर्गउकारः पूर्वरूपसन्धिः
न + इङ्गते - गुणसन्धिः
तुल्यप्रियाप्रियः + धीरः -विसर्गउकारः
धीरः + तुल्यनिन्दात्मसंस्तुतिः - विसर्गसकारः

Downloaded from www.omkaravidya.com

मानापमानयो:+ तुल्य: -विसर्गसकार:

तुल्य: + तुल्य: - विसर्गसकार:

तुल्य: + मित्रारिपक्षयो: - विसर्गउकार:

स: + उच्यते - विसर्गलोप:

▶ समास:

दु:खं च सुखं च - दु:खसुखे - इतरेतरद्वन्द्वसमास:

समे सु:खसुखे यस्य स: -समदु:खसुख: समानाधिकरणबहुव्रीहिसमास:

स्वस्मिन् तिष्ठति - स्वस्थ: - उपपदसमास:

समानि लोष्ट: च अश्मा च काञ्चनम् यस्य स:- समलोष्टाश्मकाञ्चन: - समानाधिकरणवहुव्रीहिसमास:

प्रिय: च अप्रिय: च - प्रियाप्रियौ - इतरेतरद्वन्द्वसमास:

तुल्यौ प्रियाप्रियौ यस्य स:

तुल्यप्रियाप्रिय: - समानाधिकरणवहुव्रीहिसमास:

तुल्ये निन्दा च आत्मसंस्तुति : च यस्य स: -तुल्यनिन्दात्मसंस्तुति: व्यधिकरणबहुव्रीहिसमास:

मान: च अपमान: च - मानापमानौ इतरेतररद्वन्द्वसमास:

गुणान् अतीत: - गुणातीत: - द्वितीयातत्पुरुष:

सर्वे आरम्भा: - सर्वारम्भा: - विशेषणपूर्वपदकर्मधारयसमास:

सर्वारम्भानां परित्यागी - सर्वारम्भपरित्यागी - षष्ठीतत्पुरुष:

Downloaded from www.omkaravidya.com

मूलश्लोकः

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥ १४.२६॥

🏹पदच्छेदः
मां च यः अव्यभिचारेण भक्तियोगेन सेवते सः गुणान् समतीत्य एतान् ब्रह्मभूयाय कल्पते

पदपरिचयः
अव्यभिचारेण - अकार पु तृ एक
भक्तियोगेन - अकार पु तृ एक
सेवते - लट् प्रपु एक
गुणान् - अकार पु द्वि बहु
समतीत्य - ल्यबन्तम्
ब्रह्मभूयाय - अकार पु च एक
कल्पते- लट् प्रपु एक

पदार्थः
अव्यभिचारेण - व्यभिचाररहितेन
भक्तियोगेन - भक्तियोगेन
सेवते - उपासते
गुणान् - गुणान्
समतीत्य - सम्यक् अतिक्रम्य

Downloaded from www.omkaravidya.com

ब्रह्मभूयाय - मोक्षाय
कल्पते - योग्यः भवति

अन्वयः
यः अव्यभिचारेण भक्तियोगेन मां सेवते सः  एतान् गुणान् समतीत्य ब्रह्मभूयाय कल्पते ।

व्याकरणम्
▶ सन्धिः
यः + अव्यभिचारेण - विसर्गउकारः पूर्वरूपसन्धिः
सः + गुणान् - विसर्गलोपः
समतीत्य + एतान् - वृद्धिसन्धिः

▶ समासः
ब्रह्मणः भावः - ब्रह्मभूयः

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥१४.२७॥

पदच्छेदः
ब्रह्मणः हि प्रतिष्ठा अहम् अमृतस्य अव्ययस्य च शाश्वतस्य च धर्मस्य सुखस्य ऐकान्तिकस्य च

Downloaded from www.omkaravidya.com

पदपरिचयः

ब्रह्मणः - नकार नपु ष एक

प्रतिष्ठा  - आकार स्त्री प्र एक

अमृतस्य - अकार नपु ष एक

अव्ययस्य - अकार नपु ष एक

शाश्वतस्य - अकार पु ष एक

धर्मस्य - अकार पु ष एक

सुखस्य -  अकार नपु ष एक

ऐकान्तिकस्य - अकार नपु ष एक

पदार्थः

ब्रह्मणः - परमात्मनः

प्रतिष्ठा - प्रत्यगात्मा

अमृतस्य - अविनाशिनः

अव्ययस्य  - अविकारिणिः

शाश्वतस्य - नित्यस्य

धर्मस्य - धर्मस्य

सुखस्य -आनन्दरूपस्य

ऐकान्तिकस्य - अव्यभिचारिणः

अन्वयः

हि अहं ब्रह्मणः प्रतिष्ठा अव्ययस्य अमृतस्य  च शाश्वतस्य धर्मस्य च ऐकान्तिकस्य सुखस्य च ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

ब्रह्मणः + हि - विसर्गउकारः

प्रतिष्ठा + अहम् - सवर्णदीर्घसन्धिः

अमृतस्य + अव्ययस्य - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - चतुर्दशोऽध्यायः - गुणत्रयविभागयोगः

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ॥ १४॥

पदच्छेदः

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगः नाम चतुर्दशः अध्यायः

पदपरिचयः

ॐ - अव् धातुः + मन् प्रत्ययः

तत् - दकार. नपु. पु एक

सत् - दकार. नपु. प्र एक

इति - अव्ययम्

श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु

उपनिषत्सु - दकार. स्त्री स बहु

ब्रह्मविद्यायां - आकार. स्त्री स एक

Downloaded from www.omkaravidya.com

योगशास्त्रे - अकार. नपु. स. एक

श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक

गुणत्रयविभागयोग:- अकार. पु. प्र. एक

नाम - नकार.नपु. प्र एक

चतुर्दश: - अकार. पु. प्र एक

अध्याय: - अकार. पु. प्र एक

पदार्थः

ॐ - ओम्

तत् - तत्

सत् - सत्

इति - एवम्

श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु

उपनिषत्सु - उपनिषत्सु

ब्रह्मविद्यायां - ब्रह्म पाठे

योगशास्त्रे - योगशास्त्रे

श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयो: मध्ये संवादे

गुणत्रयविभागयोग: - गुणत्रयविभागयोग:

नाम - नाम

चतुर्दश: - चतुर्दश:

अध्याय: - अध्याय:

अन्वयः

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोग: नाम चतुर्दश: अध्याय: (संपूर्णम् भवति) ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः

योगः + नाम - विसर्ग उकारः

चतुर्दशः + अध्यायः - विसर्ग उकारः पूर्वरूपसन्धिः

▶ समासः

ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारयः

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता

# पञ्चदशोऽध्यायः

# पुरुषोत्तमयोगः

Downloaded from www.omkaravidya.com

## श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

श्री भगवानुवाच_

ऊर्ध्वमूलमध:शाखमश्वत्थं प्राहुरव्ययम् ।

छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १५.१॥

पदच्छेदः

ऊर्ध्वमूलम् अध:शाखम् अश्वत्थं प्राहुः अव्ययम् छन्दांसि यस्य पर्णानि यः तं वेद सः वेदवित्

पदपरिचयः

ऊर्ध्वमूलम् - अकार पु द्वि एक

अध:शाखम् - अकार पु द्वि एक

अश्वत्थं - अकार पु द्वि एक

प्राहुः - लट् प्रपु बहु

अव्ययम् - अकार पु द्वि एक

छन्दांसि - सकार नपु प्र बहु

पर्णानि - अकार नपु प्र बहु

वेद - लट् प्रपु एक

वेदवित् - तकार पु प्र एक

पदार्थः

ऊर्ध्वमूलम् - ऊर्ध्वस्थितपुरुषोत्तममूलम्

अध:शाखम् - नीचस्थितमहदहङ्कारतन्मात्रादयः

अश्वत्थं - अश्वत्थं

Downloaded from www.omkaravidya.com

प्राहुः - वदन्ति
अव्ययम् - नाशरहितम्
छन्दांसि - वेदाः
पर्णानि - पत्राणि
वेद - जानाति
वेदवित् -वेदार्थज्ञः

अन्वयः
(ते) ऊर्ध्वमूलम् अधःशाखम् यस्य छन्दांसि पर्णानि अश्वत्थं अव्ययम् प्राहुः ।
यः तं वेद सः वेदवित् ।

व्याकरणम्

▶ सन्धिः

प्राहुः + अव्ययम् - विसर्गरेफः
यः + तम् - विसर्गसकारः
सः + वेदवित् - विसर्गलोपः

▶ समासः

ऊर्ध्वं मूलं यस्य सः - ऊर्ध्वमूलः - समानाधिकरणबहुव्रीहिसमासः - तम्
अधः शाखाः यस्य सः - अधः शाखः समानाधिकरणबहुव्रीहिसमासः - तम्
वेदान् वेत्ति - वेदवित् - उपपदसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥१५.२॥

पदच्छेदः
अधः च ऊर्ध्वं प्रसृताः तस्य शाखाः गुणप्रवृद्धाः विषयप्रवालाः
अधः च मूलानि अनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके

पदपरिचयः
प्रसृताः - आकार स्त्री प्र बहु
शाखाः - - आकार स्त्री प्र बहु
गुणप्रवृद्धाः - आकार स्त्री प्र बहु
विषयप्रवालाः - आकार स्त्री प्र बहु
मूलानि - अकार नपु प्र बहु
अनुसन्ततानि - - अकार नपु प्र बहु
कर्मानुबन्धीनि- इकार नपु प्र बहु
मनुष्यलोके - अकार पु स एक

पदार्थः
प्रसृताः - प्रगताः
शाखाः -शाखाः
गुणप्रवृद्धाः - सत्त्वरजस्तमोभिः
प्रवृद्धाः - स्थूलीकृताः

Downloaded from www.omkaravidya.com

विषयप्रवालाः - शब्दादिविषयपल्लवाः
मूलानि - मूलानि
अनुसन्ततानि - अनुप्रविष्टानि
कर्मानुबन्धीनि - कर्मानुसारिणि
मनुष्यलोके - नरलोके

अन्वयः
गुणप्रवृद्धाः विषयप्रवालाः तस्य शाखाः अधः च ऊर्ध्वं प्रसृताः ।
मनुष्यलोके कर्मानुबन्धीनि मूलानि अधः च अनुसन्ततानि ।

व्याकरणम्
▶ सन्धिः
अधः + च - विसर्गसकारः
च + ऊर्ध्वं - गुणसन्धिः
प्रसृताः + तस्य- विसर्गसकारः
शाखाः + गुणप्रवृद्धाः - विसर्गलोपः
गुणप्रवृद्धाः + विषयप्रवालाः - विसर्गलोपः
अधः + च - विसर्गसकारः
मूलानि + अनुसन्ततानि - यण्सन्धिः

▶ समासः
गुणैः प्रवृद्धाः - तृतीयातत्पुरुषः
विषयाः एव प्रवालाः - विषयप्रवालाः - अवधारणपूर्वपदकर्मधारयसमासः
मनुष्यानां लोके - मनुष्यलोके - षष्ठीतत्पुरुषः

Downloaded from www.omkaravidya.com

मूलश्लोकः

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ॥ १५.०३॥

ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥ १५.४॥

पदच्छेदः
न रूपम् अस्य इह तथा उपलभ्यते न अन्तः न च आदिः न च सम्प्रतिष्ठा अश्वत्थम् एनं सुविरूढमूलम् असङ्गशस्त्रेण दृढेन छित्त्वा ततः पदं तत परिमार्गितव्यं यस्मिन् गताः न निवर्तन्ति भूयः तत् एव च आद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृताः पुराणी

पदपरिचयः
रूपम् - अकार नपु प्र एक
उपलभ्यते - लट् प्रपु एक
अन्तः - अकार पु प्र एक
आदिः - इकार पु प्र एक
सम्प्रतिष्ठा - आकार स्त्री प्र एक
अश्वत्थम् - अकार पु द्वि एक
सुविरूढमूलम् - अकार पु द्वि एक
असङ्गशस्त्रेण - अकार नपु तृ एक
दृढेन - अकार नपु तृ एक

Downloaded from www.omkaravidya.com

छित्त्वा - क्त्वान्तम्

पदं - अकार नपु प्र एक

परिमार्गितव्यं अकार नपु प्र एक

गताः - अकार पु प्र बहु

निवर्तन्ति - लट् प्रपु बहु

आद्यं - अकार पु द्वि एक

पुरुषं - अकार पु द्वि एक

प्रपद्ये - लट् उपु एक

प्रवृत्तिः इकार स्त्री प्र एक

प्रसृताः - आकार स्त्री प्र बहु

पुराणी - ईकार स्त्री प्र एक

पदार्थः

रूपम् -रूपम्

उपलभ्यते - उपलभ्यते

अन्तः - अवसानम्

आदिः - अनादित्वात्

सम्प्रतिष्ठा -स्थितिः

अश्वत्थम् - संसारवृक्षम्

सुविरूढमूलम् - सुविरूढमूलम्

असङ्गशस्त्रेण -असङ्गशस्त्रेण

दृढेन - निश्चयेन

छित्त्वा -उद्धृत्य

पदं - वैष्णवम्

परिमार्गितव्यं - परिमार्गणम्

गताः - प्रविष्टाः

Downloaded from www.omkaravidya.com

निवर्तन्ति - आवर्तन्ते

आद्यं - प्रथमम्

पुरुषं - पुरुषम्

प्रपद्ये - नमामि

प्रवृत्तिः - प्रवृत्तिः

प्रसृताः - निसृताः

पुराणी - प्राचीना

अन्वयः

अस्य रूपम् इह तथा न उपलभ्यते अन्तः न च आदिः न च सम्प्रतिष्ठा । एनं सुविरूढमूलम् अश्वत्थम् दृढेन असङ्गशस्त्रेण छित्त्वा ततः तत् पदं परिमार्गितव्यं यस्मिन् गताः भूयः न निवर्तन्ति तम् एव च आद्यं पुरुषं प्रपद्ये यतः पुराणी प्रवृत्तिः प्रसृताः ।

व्याकरणम्

▶ सन्धिः

अस्य + इह - गुणसन्धिः

तथा + उपलभ्यते - गुणसन्धिः

न + अन्तः - सवर्णदीर्घसन्धिः

अन्तः +न - विसर्गउकारः

च + आदिः - सवर्णदीर्घसन्धिः

आदिः + न - विसर्गरेफः

च + आद्यं - सवर्णदीर्घसन्धिः

प्रसृताः + पुराणी - विसर्गलोपः

▶ समासः

सुविरूढानि मूलानि यस्य सः - सुविरूढमूलः - समानाधिकरणबहुव्रीहिसमासः

असङ्गः एव शस्त्रम् - अवधारणापूर्वपदकर्मधारयसमासः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।

द्वन्द्वैर्विमुक्ताः सुखादुः खसञ्ज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥ १५.५॥

पदच्छेदः

निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः द्वन्द्वैः विमुक्ताः

सुखदुः खसञ्ज्ञैः गच्छन्ति अमूढाः पदम् अव्ययं तत्

पदपरिचयः

निर्मानमोहाः - अकार पु प्र बहु

जितसङ्गदोषाः - अकार पु प्र बहु

अध्यात्मनित्याः- अकार पु प्र बहु

विनिवृत्तकामाः - अकार पु प्र बहु

द्वन्द्वैः - अकार नपु तृ बहु

विमुक्ताः - अकार पु प्र बहु

सुखदुः खसञ्ज्ञैः- अकार नपु तृ बहु

गच्छन्ति - लट् प्रपु बहु

अमूढाः - अकार पु प्र बहु

पदम् - अकार नपु द्वि एक

अव्ययं - अकार नपु द्वि एक

पदार्थः

निर्मानमोहाः - मानमोहवर्जिताः

जितसङ्गदोषाः - विगताशक्तिकल्मषाः

Downloaded from www.omkaravidya.com

अध्यात्मनित्याः- परमात्मस्वरूपालोचननित्याः
विनिवृत्तकामाः -अपगतवाञ्छाः
द्वन्द्वैः - प्रियाप्रियादिभिः
विमुक्ताः - विमुक्ताः
सुखदुः खसञ्ज्ञैः - सुखादुः खसञ्ज्ञैः
गच्छन्ति -प्राप्नोति
अमूढाः - विवेकिनः
पदम् - पदम्
अव्ययं - अविनाशि

अन्वयः
निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः सुखदुः खसञ्ज्ञैः द्वन्द्वैः विमुक्ताः अमूढाः तत् अव्ययं पदम् गच्छन्ति ।

व्याकरणम्
▶ सन्धिः
निर्मानमोहाः + जितसङ्गदोषाः- विसर्गलोपः
जितसङ्गदोषाः+ अध्यात्मनित्याः-विसर्गलोपः
अध्यात्मनित्याः +विनिवृत्तकामाः - विसर्गलोपः
द्वन्द्वैः + विमुक्ताः - विसर्गरेफः
सुखदुः खसञ्ज्ञैः + गच्छन्ति - विसर्गरेफः
गच्छन्ति + अमूढाः - यण्सन्धिः

▶ समासः
मानः च मोहः च - मानमोहौ- इतरेतरद्वन्द्वसमासः
मानमोहौ निर्गतौ येभ्यः ते- निर्मानमोहाः - समानाधिकरणबहुव्रहिसमासः
सङ्गः एव दोषः- सङ्गदोषः - अवधारणपूर्वपदकर्मधारयसमासः

Downloaded from www.omkaravidya.com

जितः सङ्गदोषः यैः ते - जितसङ्गदोषाः - समानाधिकरणबहुव्रहिसमासः
विनिवृत्ताः कामाः येषां ते - समानाधिकरणबहुव्रीहिसमासः
सुखम् च दुः खं च - सुखदुःखे -इतरेतरद्वन्द्वसमासः
सुखदुःखे संज्ञे यस्य तत् - सुखदुखसंज्ञम् - समानाधिकरणबहुव्रीहिसमासः

## श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥१५.०६॥

पदच्छेदः
न तद् भासयते सूर्यः न शशाङ्कः न पावकः यत् गत्वा न निवर्तन्ते तद् धाम परमं मम

पदपरिचयः
भासयते - णिच् लट् प्रपु एक
सूर्यः - अकार पु प्र एक
शशाङ्कः - अकार पु प्र एक
पावकः - अकार पु प्र एक
गत्वा - क्त्वान्तम्
निवर्तन्ते - लट् प्रपु बहु
धाम - नकार नपु प्र एक

Downloaded from www.omkaravidya.com

परमं - अकार नपु प्र एक

पदार्थः

भासयते - प्रकाशयते

सूर्यः - आदित्यः

शशाङ्कः - चन्द्रः

पावकः - अग्निः

गत्वा - प्राप्य

निवर्तन्ते - निवर्तन्ते

धाम - वैष्णवं पदं

परमं - उत्तमम्

अन्वयः

सूर्यः तद् न भासयते न शशाङ्कः न पावकः यत् गत्वा न निवर्तन्ते तद् मम परमं धाम ।

व्याकरणम्

▶ सन्धिः

तत् + भासयते - जश्त्वसन्धिः

सूर्यः + न - विसर्गउकारः

शशाङ्कः + न - विसर्गउकारः

यत् + गत्वा -जश्त्वसन्धिः

तत् + धाम -जश्त्वसन्धिः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ १५.०७॥

पदच्छेदः
मम एव अंशः जीवलोके जीवभूतः सनातनः मनः षष्ठानि इन्द्रियाणि प्रकृतिस्थानि कर्षति

पदपरिचयः
अंशः - अकार पु प्र एक
जीवलोके - अकार पु स एक
जीवभूतः - अकार पु प्र एक
सनातनः - अकार पु प्र एक
मनःषष्ठानि - अकार नपु द्वि बहु
इन्द्रियाणि- अकार नपु द्वि बहु
प्रकृतिस्थानि- अकार नपु द्वि बहु
कर्षति - लट् प्रपु एक

पदार्थः
अंशः - भागः
जीवलोके - संसारे
जीवभूतः - भोक्ताकर्ता च
सनातनः - चिरन्तनः

Downloaded from www.omkaravidya.com

मनःषष्ठानि -मनःषष्ठानि
इन्द्रियाणि -श्रोत्रादीनि
प्रकृतिस्थानि - प्रकृतिस्थानि
कर्षति - आकर्षति

अन्वयः
मम अंशः एव जीवलोके सनातनः जीवभूतः। प्रकृतिस्थानि मनः षष्ठानि इन्द्रियाणि कर्षति ।

व्याकरणम्
▶ सन्धिः
मम + एव - वृद्धिसन्धिः
एव + अंशः - सवर्णदीर्घसन्धिः
अंशः + जीवलोके - विसर्गउकारः
मनः षष्ठानि + इन्द्रियाणि - सवर्णदीर्घसन्धिः

▶ समासः
जीवानां लोकः - जीवलोकः - षष्ठीतत्पुरुषः - तस्मिन्

श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ १५.८॥

Downloaded from www.omkaravidya.com

पदच्छेदः

शरीरं यत् अवाप्नोति यत् च अपि उत्क्रामति ईश्वरः गृहीत्वा एतानि संयाति वायुः गन्धान् इव आशयात्

पदपरिचयः

शरीरं - अकार नपु द्वि एक

अवाप्नोति - लट् प्रपु एक

उत्क्रामति  लट् प्रपु एक

ईश्वरः - अकार पु प्र एक

गृहीत्वा - क्त्वान्तम्

संयाति - लट् प्रपु एक

वायुः - उकार पु प्र एक

गन्धान्  - अकार पु द्वि बहु

आशयात् - अकार पु प एक

पदार्थः

शरीरं - देहम्

अवाप्नोति - प्राप्नोति

उत्क्रामति - निर्गच्छति

ईश्वरः - परमात्मा

गृहीत्वा - स्वीकृत्य

संयाति - गच्छति

वायुः - वायुः

गन्धान् -    सौरभाणि

आशयात् - कुसुमापैः

Downloaded from www.omkaravidya.com

अन्वयः

ईश्वर: यत् च अपि (शरीरात् )उत्क्रामति (प्रकृतिस्थानि मन: षष्ठानि इन्द्रियाणि) कर्षति । यत् शरीरं अवाप्नोति  वायु: आशयात् गन्धान् इव  एतानि इन्द्रियाणि गृहीत्वा  संयाति  ।

व्याकरणम्

▶ सन्धिः

यत् + अवाप्नोति - जश्त्वसन्धि:

यत् + च - श्चुत्वसन्धि:

च + अपि - सवर्णदीर्घसन्धि:

अपि + उत्क्रामति - यण्सन्धि:

उत्क्रामति + ईश्वर: -सवर्णदीर्घसन्धि:

गृहीत्वा + एतानि - वृद्धिसन्धि:

वायु: + गन्धान् - विसर्गरेफ:

इव + आशयात् - सवर्णदीर्घसन्धि:

श्रीमद्भगवद्गीता - पञ्चदशोऽध्याय:  -  पुरुषोत्तमयोग:

मूलश्लोक:

श्रोत्रं चक्षु: स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय  मनश्चायं विषयानुपसेवते ॥ १५.९॥

Downloaded from www.omkaravidya.com

पदच्छेदः
श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणम् एव च अधिष्ठाय  मनः च अयं विषयान् उपसेवते

पदपरिचयः
श्रोत्रं - अकार नपु द्वि एक
चक्षुः -  षकार नपु द्वि एक
स्पर्शनं - अकार नपु द्वि एक
रसनं - अकार नपु द्वि एक
घ्राणम्  - अकार नपु द्वि एक
अधिष्ठाय - ल्यबन्तम्
मनः - सकार नपु द्वि एक
विषयान् - अकार पु द्वि बहु
उपसेवते - लट् प्रपु एक

पदार्थः
श्रोत्रं -श्रवणेन्द्रियम्
चक्षुः - नेत्रम्
स्पर्शनं - त्वगिन्द्रियम्
रसनं  - रसनम्
घ्राणम् - घ्राणम्
अधिष्ठाय - आश्रित्य
मनः - अन्तःकरणम्
विषयान् - शब्दादीन्
उपसेवते - उपभुङ्क्ते

Downloaded from www.omkaravidya.com

अन्वयः
अयं (जीव:) श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणम् एव च अधिष्ठाय विषयान् उपसेवते ।

व्याकरणम्
▶ सन्धिः
मन: + च - विसर्गसकार:
च + अयम् - सवर्णदीर्घसन्धि:

▶ कृदन्ता:
अधिष्ठाय - अधि + स्था + ल्यप् प्रत्यय:

श्रीमद्भगवद्गीता - पञ्चदशोऽध्याय: - पुरुषोत्तमयोग:

मूलश्लोक:

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ १५.१०॥

पदच्छेदः
उत्क्रामन्तं स्थितं वा अपि भुञ्जानं वा गुणान्वितम् विमूढा: न अनुपश्यन्ति पश्यन्ति ज्ञानचक्षुष:

पदपरिचयः
उत्क्रामन्तं - अकार पु द्वि एक

Downloaded from www.omkaravidya.com

स्थितं  - अकार पु द्वि एक
भुञ्जानं   - अकार पु द्वि एक
गुणान्वितम् - - अकार पु द्वि एक
विमूढाः - अकार पु प्र बहु
अनुपश्यन्ति - लट् प्रपु बहु
पश्यन्ति - लट् प्रपु बहु
ज्ञानचक्षुषः - षकार नपु प्र बहु

पदार्थः
उत्क्रामन्तं - परित्यजन्तम्
स्थितं - तिष्ठन्तम्
भुञ्जानं - अनुभवन्तम्
गुणान्वितम् - गुणैः अन्वितम्
विमूढाः -  अविवेकिनः
अनुपश्यन्ति -  अनुपश्यन्ति
पश्यन्ति - अवलोकयन्ति
ज्ञानचक्षुषः - ज्ञाननेत्राः

अन्वयः
विमूढाः उत्क्रामन्तं स्थितं वा अपि भुञ्जानं वा गुणान्वितम् न अनुपश्यन्ति ज्ञानचक्षुषः पश्यन्ति ।

व्याकरणम्
▶ सन्धिः
वा + अपि - सवर्णदीर्घसन्धिः विमूढाः + न - विसर्गलोपः
न + अनुपश्यन्ति - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

मूलश्लोकः

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥ १५.११॥

पदच्छेदः
यतन्तः योगिनः च एनं पश्यन्ति आत्मनि अवस्थितम् यतन्तः अपि अकृतात्मानः न एनं पश्यन्ति अचेतसः

पदपरिचयः
यतन्तः - तकार पु प्र बहु
योगिनः - नकार पु प्र बहु
पश्यन्ति - लट् प्रपु बहु
आत्मनि - नकार पु स एक
अवस्थितम् - अकार पु द्वि एक
यतन्तः तकार पु प्र बहु
अकृतात्मानः - नकार पु प्र बहु
पश्यन्ति - लट् प्रपु बहु
अचेतसः - सकार पु प्र बहु

पदार्थः
यतन्तः - प्रयत्नं कुर्वन्तः
योगिनः - विवेकिनः

Downloaded from www.omkaravidya.com

पश्यन्ति - उपलभन्ते

आत्मनि - स्वस्याम् बुद्धौ

अवस्थितम् - स्थितम्

यतन्तः - प्रयत्नं कुर्वन्तः

अकृतात्मानः - असंस्कृतात्मानः

पश्यन्ति -उपलभन्ते

अचेतसः - अविवेकिनः

अन्वयः

यतन्तः योगिनः आत्मनि अवस्थितम् एनं पश्यन्ति । यतन्तः अपि अकृतात्मानः अचेतसः एनं न पश्यन्ति ।

व्याकरणम्

▶ सन्धिः

यतन्तः + योगिनः - विसर्गउकारः

योगिनः + च - विसर्गसकारः

च + एनं - वृद्धिसन्धिः

पश्यन्ति + आत्मनि - यण्सन्धिः

आत्मनि + अवस्थितम् - यण्सन्धिः

यतन्तः + अपि - विसर्गउकारः

अपि +अकृतात्मानः - यण्सन्धिः

अकृतात्मानः + न - विसर्गउकारः

न + एनं - वृद्धिसन्धिः

पश्यन्ति + अचेतसः - यण्सन्धिः

▶ कृदन्ताः

अवस्थितः - अव + स्था + क्त प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ १५.१२॥

पदच्छेदः
यत् आदित्यगतं तेजः जगत् भासयते अखिलम् यत् चन्द्रमसि यत् च अग्नौ तत् तेजः विद्धि मामकम्

पदपरिचयः
आदित्यगतं - अकार नपु प्र एक
तेजः - सकार नपु प्र एक
जगत् - तकार नपु द्वि एक
भासयते णिच् लट् प्रपु एक
अखिलम् - अकार नपु द्वि एक
चन्द्रमसि - सकार पु स एक
अग्नौ - इकार पु स एक
तेजः - सकार नपु द्वि एक
विद्धि - लोट् मपु एक
मामकम् - अकार नपु द्वि एक

पदार्थः
आदित्यगतं - आदित्यं गतम्

Downloaded from www.omkaravidya.com

तेजः - दीप्तिः

जगत् - जगत्

भासयते - प्रकाशयति

अखिलम् - सर्वम्

चन्द्रमसि - शशभृति

अग्नौ - हुतवहे

तेजः - तेजः

विद्धि - विजानीहि

मामकम् - मदीयम्

अन्वयः

यत् आदित्यगतं तेजः अखिलम् जगत् भासयते यत् चन्द्रमसि यत् अग्नौ च तत् तेजः मामकम् विद्धि ।

व्याकरणम्

▶ सन्धिः

यत् + आदित्यगतं - जश्त्वसन्धिः

तेजः + जगत् - विसर्गउकारः

जगत् + भासयते - जश्त्वसन्धिः

भासयते + अखिलम् - पूर्वरूपसन्धिः

यत् + चन्द्रमसि - श्चुत्वसन्धिः

यत् + च - श्चुत्वसन्धिः

च +अग्नौ - सवर्णदीर्घसन्धिः तेजः + विद्धि - विसर्गउकारः

▶ समासः

आदित्यं गतम् - आदित्यगतम् द्वितीयातत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १५.१३॥

पदच्छेदः
गाम् आविश्य च भूतानि धारयामि अहम् ओजसा पुष्णामि च ओषधीः सर्वाः सोमः भूत्वा रसात्मकः

पदपरिचयः
गाम् - आकार स्त्री द्वि एक
आविश्य - ल्यबन्तम्
भूतानि - अकार नपु द्वि बहु
धारयामि - लट् उपु एक
ओजसा - सकार नपु तृ एक
पुष्णामि - लट् उपु एक
ओषधीः - ईकार स्त्री द्वि बहु
सर्वाः - अकार स्त्री प्र बहु
सोमः - अकार पु प्र एक
भूत्वा - क्त्वान्तम्
रसात्मकः - अकार पु प्र एक

पदार्थः
गाम् - पृथिवीम्
आविश्य - प्रविश्य

Downloaded from www.omkaravidya.com

भूतानि - चराचरानि

धारयामि -वहामि

ओजसा - बलेन

पुष्णामि - पोषयामि

ओषधीः -औषधीः

सर्वाः - सकलाः

सोमः - चन्द्रः

भूत्वा - भूत्वा

रसात्मकः - रसस्वभावः

अन्वयः

अहं  गाम् आविश्य ओजसा भूतानि धारयामि  च । (अहम्) रसात्मकः सोमः भूत्वा सर्वाः ओषधीः पुष्णामि ।

व्याकरणम्

▶ सन्धिः

धारयामि + अहम् - यण्सन्धिः

च + ओषधीः - वृद्धिसन्धिः

सोमः + भूत्वा - विसर्गउकारः

▶ समासः

रसः आत्मा यस्य सः - रसात्मकः - समानाधिकरणबहुव्रीहिसमासः

▶ कृदन्ताः

आविश्य - आ + विश् + ल्यप् प्रत्ययः

भूत्वा - भू + क्त्वा प्रत्ययः

Downloaded from www.omkaravidya.com

मूलश्लोकः

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १५.१४॥

पदच्छेदः
अहं वैश्वानरः भूत्वा प्राणिनां देहम् आश्रितः प्राणापानसमायुक्तः पचामि अन्नं चतुर्विधम्

पदपरिचयः
वैश्वानरः - अकार पु प्र एक
भूत्वा - क्त्वान्तम्
प्राणिनां - नकार पु ष बहु
देहम् - अकार पु द्वि एक
आश्रितः - आ + श्रि + क्त प्रत्ययः
प्राणापानसमायुक्तः - अकार पु प्र एक
पचामि - लट् उपु एक
अन्नं - अकार नपु द्वि एक
चतुर्विधम् - अकार नपु द्वि एक

पदार्थः
वैश्वानरः - जाठराग्निः
भूत्वा - भूत्वा
प्राणिनां - प्राणवताम्

Downloaded from www.omkaravidya.com

देहम् - शरीरम्
आश्रितः - प्रविष्टः
प्राणापानसमायुक्तः -प्राणापानसमायुक्तः
पचामि - पक्वं करोमि
अन्नं - सोमः
चतुर्विधम् - चतुष्प्रकारम्

अन्वयः
अहं वैश्वानरः भूत्वा प्राणिनां देहम् आश्रितः प्राणापानसमायुक्तः चतुर्विधम् अन्नं पचामि ।

व्याकरणम्
▶ सन्धिः
वैश्वानरः + भूत्वा - विसर्गउकारः
पचामि + अन्नं - यण्सन्धिः

▶ समासः
प्राणः च अपानः च - प्राणापानौ इतरेतरद्वन्द्वः
प्राणापानाभ्यां समायुक्तः - प्राणापानसमायुक्तः - तृतीयातत्पुरुषः

▶ कृदन्ताः
भूत्वा - भू + क्त्वा प्रत्ययः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥१५.१५॥

पदच्छेदः
सर्वस्य च अहं हृदि सन्निविष्टः मत्तः स्मृतिः ज्ञानम् अपोहनं च
वेदैः च सर्वैः अहम् एव वेद्यः वेदान्तकृत् वेदविद् एव च अहम्

पदपरिचयः
सर्वस्य - अकार पु ष एक
हृदि - दकार नपु स एक
सन्निविष्टः - अकार पु प्र एक
मत्तः- अव्ययम्
स्मृतिः - इकार स्त्री प्रपु एक
ज्ञानम् - अकार नपु प्र एक
अपोहनं - अकार नपु प्र एक
वेदैः - अकार पु तृ बहु
सर्वैः - अकार पु तृ बहु
वेद्यः - अकार पु प्र एक
वेदान्तकृत् - दकार पु प्र एक
वेदविद् - दकार पु प्र एक

पदार्थः

Downloaded from www.omkaravidya.com

सर्वस्य - सकलस्य

हृदि - बुद्धौ

सन्निविष्टः - संस्थितः

मत्तः - मत्तः

स्मृतिः - स्मरणम्

ज्ञानम् - ज्ञानम्

अपोहनं - अपगमनम्

वेदैः - चतुर्वेदैः

सर्वैः - सकलैः

वेद्यः - वेदितव्यः

वेदान्तकृत् - वेदान्तार्थसंप्रदायकृत्

वेदविद् - वेदार्थविद्

अन्वयः

अहं सर्वस्य हृदि सन्निविष्टः । मत्तः स्मृतिः ज्ञानम् अपोहनं च । सर्वैः वेदैः च अहं एव वेद्यः वेदान्तकृत् वेदवित् च ।

व्याकरणम्

▶ सन्धिः

च+ अहं - सवर्णदीर्घसन्धिः

सन्निविष्टः + मत्तः - विसर्गउकारः

स्मृतिः + ज्ञानम् - विसर्गरेफः

अपोहनं + च - अनुस्वारसन्धिः

वेदैः + च - विसर्गसकारः

सर्वैः + अहम् - विसर्गरेफः

वेद्यः + वेदान्तकृत् - विसर्गउकारः

Downloaded from www.omkaravidya.com

वेदान्तकृत् + वेदविद् - जश्त्वसन्धिः
च + अहम् - सवर्णदीर्घसन्धि

▶ समासः
वेदान्तं करोति - वेदान्तकृत् - उपपदसमासः
वेदान् वेत्ति - वेदविद् -उपपदसमासः

▶ कृदन्ताः
मत्तः - अस्मत् + तसिल् प्रत्ययः

श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १५.१६॥

पदच्छेदः
द्वौ इमौ पुरुषौ लोके क्षरः च अक्षरः एव च क्षरः सर्वाणि भूतानि कूटस्थः अक्षरः उच्यते

पदपरिचयः
द्वौ - इकार पु प्र द्वि
इमौ - मकार पु प्र द्वि
पुरुषौ - अकार पु प्र द्वि
लोके - अकार पु स एक

Downloaded from www.omkaravidya.com

क्षरः - अकार पु प्र एक

अक्षरः - अकार पु प्र एक

सर्वाणि - अकार नपु प्र बहु

भूतानि - अकार नपु प्र बहु

कूटस्थः - अकार पु प्र एक

अक्षरः - अकार पु प्र एक

उच्यते - लट् प्रपु एक

पदार्थः

द्वौ - उभौ

इमौ - एतौ

पुरुषौ - पुरुषौ

लोके - भूमौ

क्षरः - नाशसहितः

अक्षरः - नाशरहितः

सर्वाणि - सकालानि

भूतानि - भूतानि

कूटस्थः  कूटस्थः

अक्षरः - अक्षरः

उच्यते - कथ्यते

अन्वयः

लोके क्षरः च अक्षरः एव च (इति) इमौ पुरुषौ द्वौ ।  सर्वाणि भूतानि क्षरः (इत्युच्यते) ।  कूटस्थः अक्षरः उच्यते ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

द्वौ + इमौ - यान्तावान्तादेशसन्धिः

क्षरः + च - विसर्गसकारः

च + अक्षरः - सवर्णदीर्घसन्धिः

अक्षरः + एव - विसर्गलोपः

कूटस्थः + अक्षरः - विसर्गउकारः

अक्षरः + उच्यते - विसर्गलोपः

श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥१५.१७॥

पदच्छेदः

उत्तमः पुरुषः तु अन्यः परमात्मा इति उदाहृतः यः लोकत्रयम् आविश्य बिभर्ति अव्ययः ईश्वरः

पदपरिचयः

उत्तमः - अकार पु प्र एक

पुरुषः - अकार पु प्र एक

अन्यः- अकार पु प्र एक

परमात्मा - नकार पु प्र एक

Downloaded from www.omkaravidya.com

उदाहृतः - दकार पु प्र एक

लोकत्रयम् - अकार नपु द्वि एक

आविश्य - ल्यबन्तम्

बिभर्ति - लट् प्रपु एक

अव्ययः - अकार पु प्र एक

ईश्वरः- अकार पु प्र एक

पदार्थः

उत्तमः - उत्कृष्टतमः

पुरुषः -पुरुषः

अन्यः - इतरः

परमात्मा -परब्रह्मा

उदाहृतः - वेदान्तेषु उक्तः

लोकत्रयम् - भुवनत्रयम्

आविश्य -प्रविश्य

बिभर्ति - धारयति

अव्ययः - नाशरहितः

ईश्वरः - सर्वज्ञः

अन्वयः

तु यः अव्ययः ईश्वरः लोकत्रयम् आविश्य बिभर्ति (सः) उत्तमः पुरुषः अन्यः परमात्मा इति उदाहृतः ।

व्याकरणम्

▶ सन्धिः

पुरुषः+ तु - विसर्गसकारः

Downloaded from www.omkaravidya.com

तु + अन्यः - यण्सन्धिः
परमात्मा + इति - गुणसन्धिः
इति + उदाहृतः - यण्सन्धिः
यः + लोकत्रयम् - विसर्गउकारः
बिभर्ति + अव्ययः - यण्सन्धिः
अव्ययः + ईश्वरः - विसर्गलोपः

▶ समासः
लोकानां त्रयम् - लोकत्रयम् - षष्ठीतत्पुरुषः

▶ कृदन्ताः
आविश्य - आ + विश् + ल्यप् प्रत्ययः

## श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१५.१८॥

पदच्छेदः
यस्मात् क्षरम् अतीतः अहम् अक्षरात् अपि च उत्तमः अतः अस्मि लोके वेदे च प्रथितः पुरुषोत्तमः

Downloaded from www.omkaravidya.com

पदपरिचयः

यस्मात्  - दकार पु प एक

क्षरम् - अकार पु द्वि एक

अतीतः - अकार पु प्र एक

अक्षरात्  - अकार पु प एक

उत्तमः - अकार पु प्र एक

लोके - अकार पु स एक

वेदे - अकार पु स एक

प्रथितः - अकार पु प्र एक

पुरुषोत्तमः - अकार पु प्र एक

पदार्थः

यस्मात् - यस्मात् कारणात्

क्षरम् - अचेतनम्

अतीतः - अतिक्रान्तः

अक्षरात्  - चेतनात्

उत्तमः - उत्कृष्टतमः

लोके - लोके

वेदे - वेदे

प्रथितः - प्रख्यातः

पुरुषोत्तमः - पुरुषोत्तमः

अन्वयः

यस्मात् अहं क्षरम् अतीतः  अक्षरात् अपि उत्तमः  । अतः लोके वेदे च पुरुषोत्तमः  प्रथितः अस्मि ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶ सन्धिः

अतीतः + अहम् - विसर्गउकारः पूर्वरूपसन्धिः

अक्षरात् + अपि - जश्त्वसन्धिः

च + उत्तमः - गुणसन्धिः

अतः+ अस्मि -विसर्गउकारः पूर्वरूपसन्धिः

## श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत॥१५.१९॥

पदच्छेदः

यः माम् एवम् असम्मूढः जानाति पुरुषोत्तमम् सः सर्वविद् भजति मां सर्वभावेन भारत

पदपरिचयः

असम्मूढः - अकार पु प्र एक

जानाति - लट् प्रपु एक

पुरुषोत्तमम् - अकार पु द्वि एक

सर्वविद् - दकार पु प्र एक

भजति - लट् प्रपु एक

Downloaded from www.omkaravidya.com

सर्वभावेन -अकार पु तृ एक
भारत - अकार पु सं प्र

पदार्थः
असम्मूढः - संमोहवर्जितः
जानाति - विद्यते
पुरुषोत्तमम्  - पुरुषश्रेष्ठम्
सर्वविद् - सर्वज्ञः
भजति - भजति
सर्वभावेन - सर्वात्मचित्ततया
भारत- अर्जुन

अन्वयः
हे भारत! यः असम्मूढः पुरुषोत्तमम् माम्  एवं जानाति सः सर्वविद्  मां सर्वभावेन भजति ।

व्याकरणम्
▶ सन्धिः
यः + माम् - विसर्गउकारः
असम्मूढः + जानाति - विसर्गउकारः

▶ समासः
सर्वं वेत्ति - सर्वविद् - उपपदसमासः
पुरुषेषु उत्तमः - पुरुषोत्तमः - सप्तमीतत्पुरुषः - तम्

Downloaded from www.omkaravidya.com

## श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥१५.२०॥

पदच्छेदः
इति गुह्यतमं शास्त्रम् इदम् उक्तं मया अनघ एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यः च भारत

पदपरिचयः
गुह्यतमं - अकार नपु प्र एम
शास्त्रम् - अकार नपु प्र एक
उक्तं - अकार नपु प्र एक
अनघ- अकार पु सं प्र
बुद्ध्वा - क्त्वान्तम्
बुद्धिमान् - तकार पु प्र एक
स्यात् - विधि प्रपु एक
कृतकृत्यः - अकार पु प्र एक
भारत - अकार पु सं प्र

पदार्थः
गुह्यतमं - अतिरहस्यम्
शास्त्रम् - शास्त्रम्
उक्तं - कथितम्

Downloaded from www.omkaravidya.com

अनघ - पापरहित

बुद्ध्वा - ज्ञात्वा

बुद्धिमान् - ज्ञानवान्

स्यात् - स्यात्

कृतकृत्यः - कृतार्थः

भारत - अर्जुन

अन्वयः

हे अनघ! इति मया गुह्यतमं इदम् शास्त्रम् उक्तं । हे भारत ! एतद् बुद्ध्वा बुद्धिमान् कृतकृत्यः च स्यात् ।

व्याकरणम्

▶ सन्धिः

मया + अनघ - सवर्णदीर्घसन्धिः

कृतकृत्यः + च - विसर्गसकारः

▶ समासः

न अघम् विद्यते यस्य सः अनघः - नञ्बहुव्रीहिः

श्रीमद्भगवद्गीता - पञ्चदशोऽध्यायः - पुरुषोत्तमयोगः

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ॥ 15॥

Downloaded from www.omkaravidya.com

पदच्छेदः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगः नाम पञ्चदशः अध्यायः

पदपरिचयः
ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. पु एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्
श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रह्मविद्यायां - आकार. स्त्री स एक
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक
पुरुषोत्तमयोगः- अकार. पु. प्र. एक
नाम - नकार.नपु. प्र एक
पञ्चदशः - अकार. पु. प्र एक
अध्यायः - अकार. पु. प्र एक

पदार्थः
ॐ - ओम्
तत् - तत्
सत् - सत्
इति - एवम्
श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु

Downloaded from www.omkaravidya.com

ब्रह्मविद्यायां - ब्रह्म पाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयो: मध्ये संवादे
पुरुषोत्तमयोग: - पुरुषोत्तमयोग:
नाम - नाम
पञ्चदश: - पञ्चदश:
अध्याय: - अध्याय:

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोग: नाम पञ्चदश: अध्याय: (संपूर्णम् भवति) ।

व्याकरणम्
▶सन्धिः
श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धि:
योग: + नाम - विसर्ग उकार:
पञ्चदश: + अध्याय: - विसर्ग उकार: पूर्वरूपसन्धि:

▶ समासः
ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारय:

Downloaded from www.omkaravidya.com

# श्रीमद्भगवद्गीता

# षोडशोऽध्यायः

# दैवासुरसंपद्विभागयोगः


Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - षोडशोऽध्याय: - दैवासुरसंपद्विभागयोग:

मूलश्लोका:

श्री भगवानुवाच
अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थिति:।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥१६.१॥

अहिंसा सत्यमक्रोधस्त्याग: शान्तिरपैशुनम् ।
दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥१६.०२॥

तेज: क्षमा धृति: शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥१६.०३॥

पदच्छेदः
अभयं सत्त्वसंशुद्धि: ज्ञानयोगव्यवस्थिति: दानं दम: च यज्ञ: च स्वाध्याय: तप: आर्जवम् अहिंसा सत्यम् अक्रोध: त्याग: शान्ति: अपैशुनम् दया भूतेषु

[Type here] Downloaded from www.omkaravidya.com [Type here]

अलोलुप्त्वं मार्दवं ह्रीः अचापलम् तेजः क्षमा धृतिः शौचम् अद्रोहः न अतिमानिता भवन्ति सम्पदं दैवीम् अभिजातस्य भारत

पदपरिचयः

अभयं - अकार नपु प्र एक

सत्त्वसंशुद्धिः - इकार स्त्री प्र एक

ज्ञानयोगव्यवस्थितिः - इकार स्त्री प्र एक

दानं - अकार नपु प्र एक

दमः - अकार पु प्र एक

यज्ञः - अकार पु प्र एक

स्वाध्यायः - अकार पु प्र एक

तपः - सकार नपु प्र एक

आर्जवम् - अकार नपु प्र एक

अहिंसा - आकार स्त्री प्र एक

सत्यम् - अकार नपु प्र एक

अक्रोधः- अकार पु प्र एक

त्यागः - अकार पु प्र एक

शान्तिः - इकार स्त्री प्र एक

अपैशुनम् - अकार नपु प्र एक

दया - आकार स्त्री प्र एक

भूतेषु - अकार नपु स बहु

अलोलुप्त्वं - अकार नपु प्र एक

मार्दवं - अकार नपु प्र एक

ह्रीः - ईकार स्त्री प्र एक

अचापलम् - अकार नपु प्र एक

तेजः - सकार नपु प्र एक

 Downloaded from www.omkaravidya.com 

क्षमा   आकार स्त्री प्र एक
धृतिः - इकार स्त्री प्र एक
शौचम्  - अकार नपु प्र एक
अद्रोहः - अकार पु प्र एक
अतिमानिता - आकार स्त्री प्र एक
भवन्ति - लट् प्रपु बहु
सम्पदं - दकार स्त्री द्वि एक
दैवीम् - ईकार स्त्री द्वि एक
अभिजातस्य - अकार पु ष एक
भारत - अकार पु सं प्र

पदार्थः
अभयं - अभयशीलता
सत्त्वसंशुद्धिः - चित्तसंशुद्धिः
ज्ञानयोगव्यवस्थितिः -आतंमज्ञानोपाये तत्परत्वम्
दानं - वितरणम्
दमः - बाह्येन्द्रियनिग्रहः
यज्ञः - अग्निगोत्रादिः
स्वाध्यायः - ऋग्वेदाद्यध्ययनम्
तपः - विविध नियमः
आर्जवम् - ऋजुत्वम्
अहिंसा - पीडानर्जवम्
सत्यम् - यथार्तकथनम्
अक्रोधः - क्रोधरहितः
त्यागः - सन्न्यासः
शान्तिः - अन्तः करणस्य उपशमः

अपैशुनम् - अपिशुनत्वम्

दया - कृपा

भूतेषु - प्राणिषु

अलोलुप्त्वं - तृष्णासून्यत्वम्

मार्दवं - मृदुना अक्रौर्यम्

ह्रीः - लज्ज्ञा

अचापलम् - अचाञ्चलयम्

तेजः - प्राकल्प्यम्

क्षमा - सहनम्

धृतिः - धरणशीलतम्

शौचम् - शुद्धम्

अद्रोहः - परजिघांसाभावः

अतिमानिता - अतिमानित्वम्

भवन्ति - भवन्ति

सम्पदं -सम्पत्तिं

दैवीम् - दैवीम्

अभिजातस्य - अभिभूसीभूय उत्पन्नस्य

भारत - अर्जुन

अन्वयः

हे भारत! अभयं सत्त्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः दानं दमः च यज्ञः च स्वाध्यायः तपः आर्जवम् अहिंसा सत्यम् अक्रोधः त्यागः शान्तिः अपैशुनम् भूतेषु दया अलोलुप्त्वं मार्दवं ह्रीः अचापलम् तेजः क्षमा धृतिः शौचम् अद्रोहः नातिमानिता दैवीम् सम्पदं अभिजातस्य भवन्ति ।

व्याकरणम्

 Downloaded from www.omkaravidya.com 

▶ सन्धिः

सत्त्वसंशुद्धिः +ज्ञानयोगव्यवस्थितिः- विसर्गरेफः
दमः + च - विसर्गसकारः
यज्ञः+ च - विसर्गसकारः
स्वाध्यायः + तपः - विसर्गसकारः
अक्रोधः + त्यागः - विसर्गसकारः
शान्तिः + अपैशुनम् - विसर्गरेफः
भूतेषु + अलोलुप्त्वं - यण्सन्धिः
ह्रीः + अचापलम् - विसर्गरेफः
अद्रोहः + न - विसर्गउकारः
न + अतिमानिता - सवर्णदीर्घसन्धिः

▶ समासः

सत्त्वस्य संशुद्धिः - सत्त्वसंशुद्धिः - षष्ठीतत्पुरुषः
ज्ञानयोगे व्यवस्थितिः - ज्ञानयोगव्यवस्थितिः - सप्तमीतत्पिरुषः

श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थसम्पदमासुरीम् ॥१६.०४॥

पदच्छेदः

दम्भः दर्पः अभिमानः च क्रोधः पारुष्यम् एव च अज्ञानं च अभिजातस्य पार्थ सम्पदम् आसुरीम्

[Type here] Downloaded from www.omkaravidya.com [Type here]

पदपरिचयः

दम्भः - अकार पु प्र एक

दर्पः - अकार पु प्र एक

अभिमानः - अकार पु प्र एक

क्रोधः - अकार पु प्र एक

पारुष्यम् - अकार नपु प्र एक

अज्ञानं - अकार नपु प्र एक

अभिजातस्य - अकार पु ष एक

पार्थ - अकार पु सं प्र

सम्पदम् दकार स्त्रीद्वि एक

आसुरीम् - ईकार स्त्री द्वि एक

पदार्थः

दम्भः - धर्मध्वजित्वम्

दर्पः - धनस्वलनादिनिमित्तः उत्सेकः

अभिमानः - स्वकीर्तिः

क्रोधः - कोपः

पारुष्यम् - परुषवचनम्

अज्ञानं - अविवेकज्ञानम्

अभिजातस्य - अभिजातस्य

पार्थ - अर्जुन

सम्पदम् - विभवम्

आसुरीम् - असुराणां सम्पत्

अन्वयः

 Downloaded from www.omkaravidya.com 

हे पार्थ! चआसुरीम् सम्पदम् अभिजातस्य दम्भः दर्पः अभिमानः च क्रोधः पारुष्यम् एव च अज्ञानं (भवन्ति) ।

व्याकरणम्

▶ सन्धिः

दम्भः + दर्पः - विसर्गउकारः

दर्पः + अभिमानः - विसर्गउकार:पूर्वरूपसन्धिः

अभिमानः + च - विसर्गसकारः

च + अभिजातस्य - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

दैवीः सम्पद्विमोक्षाय निबन्धायासुरी मता ।

मा शुचः सम्पदं दैवीमपिजातोऽसि पाण्डव ॥१६.५॥

पदच्छेदः

दैवी सम्पत् विमोक्षाय निबन्धाय आसुरी मता मा शुचः सम्पदं दैवीम् अपिजातः असि पाण्डव

पदपरिचयः

दैवी - ईकार स्त्री प्र एक

सम्पत् - दकार स्त्री प्र एक

विमोक्षाय - अकार पु च एक

निबन्धाय - अकार पु च एक

आसुरी - ईकार स्त्री प्र एक


Downloaded from www.omkaravidya.com

मता - आकार स्त्री प्र एक
शुचः लोट् मपु एक
सम्पदं - इकार स्त्री द्वि एक
दैवीम्  - ईकार स्त्री द्वि एक
अपिजातः - अकार पु प्र एक
पाण्डव - अकार पु सं प्र

पदार्थः
दैवी - दैवी
सम्पत् - संपत्
विमोक्षाय - बन्धनाशनाय
निबन्धाय - संसाराय
आसुरी - राक्षसी
मता - अभिप्रेता
शुचः - शोकं मा कार्षीः
सम्पदं - सम्पदं
दैवीम्  दैवीम्
अपिजातः - अभिलक्ष्य जातः
पाण्डव - अर्जुन

अन्वयः
दैवी सम्पत् विमोक्षाय  आसुरी निबन्धाय (इति) मता । हे पाण्डव! मा शुचः दैवीं सम्पदं अभिजातः असि  ।

व्याकरणम्
▶ सन्धिः

 Downloaded from www.omkaravidya.com 

निबन्धाय + आसुरी - सवर्णदीर्घसन्धिः
अभिजातः + असि - विसर्गउकारः पूर्वरूपसन्धिः

श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त असुरं पार्थ मे श्रुणु ॥ १६.६॥

पदच्छेदः
द्वौ भूतसर्गौ लोके अस्मिन् दैवः आसुरः एव च दैवः विस्तरशः प्रोक्तः असुरं पार्थ मे श्रुणु

पदपरिचयः
द्वौ - इकार पु प्र द्वि
भूतसर्गौ- अकार पु प्र द्वि
लोके - अकार पु स एक
दैवः - अकार पु प्र एक
आसुरः - अकार पु प्र एक

 Downloaded from www.omkaravidya.com 

दैवः-अकार पु प्र एक
विस्तरशः -अव्ययम्
प्रोक्तः  - अकार पु प्र एक
आसुरं - अकार पु द्वि एक
पार्थ - अकार पु सं प्र
श्रुणु - लोट् मपु एक

पदार्थः
द्वौ - द्विसङ्ख्याकौ
भूतसर्गौ - मनुष्यसर्गौ
लोके - भुवने
दैवः - दिव्यः
आसुरः - राक्षससम्बन्धी
दैवः- दैवसृष्टिः
विस्तरशः - विस्तरशः
प्रोक्तः - उक्तः
आसुरं - आसुरम्
पार्थ - अर्जुन
श्रुणु - अवधारय

अन्वयः
हे पार्थ! अस्मिन् लोके द्वौ भूतसर्गौ दैवः आसुरः एव च । दैवः विस्तरशः प्रोक्तः  आसुरं मे श्रुणु ।

व्याकरणम्
▶ सन्धिः

लोके + अस्मिन् - पूर्वरूपसन्धिः
दैवः + आसुरः - विसर्गलोपः
आसुरः + एव - विसर्गलोपः
दैवः + विस्तरशः - विसर्गउकारः
प्रोक्तः + अासुरं - विसर्गलोपः

▶ समासः
भूतानाम् सर्गौ - भूतसर्गौ- षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - अथ षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥१६.७॥

पदच्छेदः
प्रवृत्तिं च निवृत्तिं च जनाः न विदुः आसुराः न शौचं न अपि च आचारः न सत्यं तेषु विद्यते

पदपरिचयः
प्रवृत्तिं - इकार स्त्री द्वि एक
निवृत्तिं - इकार स्त्री द्वि एक
जनाः - अकार पु प्र बहु
विदुः - लट् प्रपु बहु

 Downloaded from www.omkaravidya.com 

आसुराः - अकार पु प्र बहु
शौचं - अकार नपु प्र एक
आचारः- अकार पु प्र एक
सत्यं - अकार नपु प्र एक
विद्यते - लट् प्रपु एक

पदार्थः
प्रवृत्तिं-धर्मे प्रवृत्तिं
निवृत्तिं - अधर्मात् निवृत्तिं
जनाः - पुरुषाः
विदुः - जानन्ति
आसुराः - असुरगुणसम्पन्नाः
शौचं -शुद्धिः
आचारः - आचारः
सत्यं - यथार्थकथनम्
विद्यते - विद्यते

अन्वयः
आसुराः जनाः प्रवृत्तिं च निवृत्तिं च न विदुः । तेषु शौचं न विद्यते । आचारः अपि च सत्यं च न ( विद्यते ) ।

व्याकरणम्
▶ सन्धिः
जनाः + न - विसर्गलोपः
विदुः + आसुराः - विसर्गरेफः
न + अपि - सवर्णदीर्घसन्धिः

 Downloaded from www.omkaravidya.com 

च + आचारः - सवर्णदीर्घसन्धिः
आचारः + न - विसर्गउकारः

श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥ १६.८॥

पदच्छेदः
असत्यम् अप्रतिष्ठं ते जगत् आहुः अनीश्वरम् अपरस्परसम्भूतं किम् अन्यत् कामहैतुकम्

पदपरिचयः
असत्यम् - अकार नपु प्र एक
अप्रतिष्ठं - अकार नपु प्र एक
जगत् - दकार नपु प्र एक
आहुः - लट् प्रपु बहु

 Downloaded from www.omkaravidya.com 

अनीश्वरम् - अकार नपु प्र एक

अपरस्परसम्भूतं - अकार नपु प्र एक

अन्यत् - दकार नपु प्र एक

कामहैतुकम् - अकार नपु प्र एक

पदार्थः

असत्यम् - अनृतम्

अप्रतिष्ठं - अनाधारम्

जगत् - जगत्

आहुः - वदन्ति

अनीश्वरम् - नियन्तृरहितम्

अपरस्परसम्भूतं - स्त्रीपुरुषमिथुनात्जातम्

अन्यत् - इतरत्

कामहैतुकम् - कामनिमित्तकम्

अन्वयः

ते जगत् असत्यम् अप्रतिष्ठं अनीश्वरम् अपरस्परसम्भूतं कामहैतुकम् किम् अन्यत् आहुः ।

व्याकरणम्

▶ सन्धिः

जगत् + आहुः - जश्त्वसन्धिः

आहुः + अनीश्वरम् - विसर्गरेफः

▶ समासः

अपरस्पराभ्यां सम्भूतम् - अपरस्परसम्भूतम् - पञ्चमीतत्पुरुषः

कामः हेतुः यस्य तत् - कामहेतुकम् - समानाधिकरणबहुव्रीहिसमासः


Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ १६.९॥

पदच्छेदः
एतां दृष्टिम् अवष्टभ्य नष्टात्मानः अल्पबुद्धयः प्रभवन्ति उग्रकर्माणः क्षयाय जगतः अहिताः

पदपरिचयः
एतां - दकार स्त्री द्वि एक
दृष्टिम् - इकार स्त्री द्वि एक
अवष्टभ्य - ल्यबन्तम्
नष्टात्मानः - अकार पु प्र बहु
अल्पबुद्धयः - इकार पु प्र बहु
प्रभवन्ति - लट् प्रपु बहु
उग्रकर्माणः- अकार पु प्र बहु
क्षयाय - अकार पु च एक
जगतः दकार नपु ष एक
अहिताः - अकार पु प्र बहु

पदार्थः

 Downloaded from www.omkaravidya.com 

एतां -   एतां

दृष्टिम् - दर्शनम्

अवष्टभ्य - आश्रित्य

नष्टात्मान: - नष्टस्वभावा:

अल्पबुद्धय: - स्वल्पविवेका:

प्रभवन्ति - उद्भवन्ति

उग्रकर्माण: - क्रूरकर्माण:

क्षयाय - नाशाय

जगत: - लोकस्य

अहिता:- शत्रव:

अन्वयः

एतां दृष्टिम् अवष्टभ्य नष्टात्मान: अल्पबुद्धय:  उग्रकर्माण: अहिता:
जगत:  क्षयाय प्रभवन्ति ।

व्याकरणम्

▶ सन्धिः

नष्टात्मान: + अल्पबुद्धय: - विसर्गउकार: पूर्वरूपसन्धि:

प्रभवन्ति + उग्रकर्माण: - यण्सन्धि:

जगत: + अहिता: - विसर्गउकार: पूर्वरूपसन्धि:

▶ कृदन्ता:

अवष्टभ्य - अव + स्था + ल्यप् प्रत्यय:

श्रीमद्भगवद्गीता  -  षोडशोऽध्याय:  -  दैवासुरसंपद्विभागयोग:


Downloaded from www.omkaravidya.com

मूलश्लोकः

काममाश्रित्य दुष्पूरं दम्भमानमदान्विदाः ।
मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्ते ऽशुचिव्रताः ॥१६.१०॥

पदच्छेदः
कामम् आश्रित्य दुष्पूरं दम्भमानमदान्विदाः मोहात् गृहीत्वा असद्ग्राहान् प्रवर्तन्ते अशुचिव्रताः

पदपरिचयः
कामम् - अकार पु द्वि एक
आश्रित्य - ल्यबन्तम्
दुष्पूरं - अकार नपु द्वि एक
दम्भमानमदान्विदाः - अकार पु प्र बहु
मोहात् - अकार पु प एक
गृहीत्वा - क्त्वान्तम्
असद्ग्राहान् - अकार पु द्वि बहु
प्रवर्तन्ते - लट् प्रपु बहु
अशुचिव्रताः - अकार पु प्र बहु

पदार्थः
कामम् - इच्छाविशेषम्
आश्रित्य - अवष्टभ्य
दुष्पूरं - असक्यपूरणम्
दम्भमानमदान्विदाः - दम्भाभिमानगर्वसहिताः
मोहात् - अविवेकात्

[Type here] Downloaded from www.omkaravidya.com [Type here]

गृहीत्वा -गृहीत्वा
असद्ग्राहान् - दुष्टनिश्चयान्
प्रवर्तन्ते - प्रवर्तन्ते
अशुचिव्रताः - अशुद्धकर्मणः

अन्वयः
दुष्पूरं कामम् आश्रित्य दम्भमानमदान्विदाः अशुचिव्रताः मोहात् असद्ग्राहान् गृहीत्वा प्रवर्तन्ते ।

व्याकरणम्
▶ सन्धिः
मोहात् + गृहीत्वा - जश्त्वसन्धिः
गृहीत्वा + असद्ग्राहान् - सवर्णदीर्घसन्धिः
प्रवर्तन्ते + अशुचिव्रताः - पूर्वरूपसन्धिः

▶ समासः
दम्भः च मानः च मदः च - दम्भमानमदाः - इतरेतरद्वन्द्वसमासः
दम्भमानमदैः अन्विताः - दम्भमानमदान्विताः तृतीयातत्पुरुषः

श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥१६.११॥

[Type here] Downloaded from www.omkaravidya.com [Type here]

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥ १६.१२॥

पदच्छेदः
चिन्ताम् अपरिमेयां च प्रलयान्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः कामक्रोधपरायणाः ईहन्ते कामभोगार्थम् अन्यायेन अर्थसञ्चयान्

पदपरिचयः
चिन्ताम् - आकार स्त्री द्वि एक
अपरिमेयां - आकार स्त्री द्वि एक
प्रलयान्ताम् - आकार स्त्री द्वि एक
उपाश्रिताः - अकार पु प्र बहु
कामोपभोगपरमाः - अकार पु प्र बहु
निश्चिताः - अकार पु प्र बहु
आशापाशशतैः अकार नपु तृ बहु
बद्धाः - अकार पु प्र बहु
कामक्रोधपरायणाः - अकार पु प्र बहु
ईहन्ते - लट् प्रपु बहु
कामभोगार्थम् - अव्ययम्
अन्यायेन - अकार पु प्र बहु
अर्थसञ्चयान् - अकार पु द्वि बहु

पदार्थः
चिन्ताम् - चिन्ताम्

[Type here] Downloaded from www.omkaravidya.com [Type here]

अपरिमेयां -   परिमातुमशक्यम्

प्रलयान्ताम् - मरणान्तम्

उपाश्रिताः - चिन्तापराः

कामोपभोगपरमाः - विषयानुभवपरमपुरुषार्थाः

निश्चिताः - दृढाः

आशापाशशतैः -आशापाशशतैः

बद्धाः -बद्धाः

कामक्रोधपरायणाः- रागद्वेषाशक्ताः

ईहन्ते -इच्छन्ति

कामभोगार्थम् - विषयानुभवार्थम्

अन्यायेन -   अधर्मेण

अर्थसञ्चयान् - अर्थप्रचयान्

अन्वयः

अपरिमेयां प्रलयान्ताम् चिन्ताम्   उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः च आशापाशशतैः बद्धाः कामक्रोधपरायणाः  कामभोगार्थम् अन्यायेन अर्थसञ्चयान् ईहन्ते ।

व्याकरणम्

▶ सन्धिः

कामोपभोगपरमाः + एतावत् - विसर्गलोपः

एतावत् + इति - जश्त्वसन्धिः

आशापाशशतैः + बद्धाः- विसर्गरेफः

अन्यायेन + अर्थसञ्चयान् - सवर्णदीर्घसन्धिः

▶ समासः

प्रलयः अन्तः यस्याः सा - प्रलयान्ताः - समानाधिकरणबहुव्रीहिसमासः

[Type here]   Downloaded from www.omkaravidya.com   [Type here]

कामानाम् उपभोगः षष्ठीतत्पुरुषः
कामोपभोगः परमः येषां ते - समानाधिकरणबहुव्रीहिसमासः
आशा एव पाशाः - अवधारणपूर्वपदकर्मधारयसमासः
आशापाशानां शतैः - आशापाशशतैः - षष्ठीतत्पुरुषः
कामक्रोधौ परम् अयनं येषां ते - कामक्रोधपरायणाः - व्यधिकरणबहुव्रीहिः
अर्थं सञ्चयति - अर्थसञ्चयः - उपपदसमासः

## श्रीमद्भगवद्गीता - अथ षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १६.१३॥

पदच्छेदः
इदम् अद्य मया लब्धम् इमं प्राप्स्ये मनोरथम् इदम् अस्ति इदम् अपि मे भविष्यति पुनः धनम्

पदपरिचयः
लब्धम् - अकार नपु प्र एक
इमं - मकार पु द्वि एक
प्राप्स्ये - लृट् लकार उपु एक
मनोरथम् - अकार पु द्वि एक

[Type here] Downloaded from www.omkaravidya.com [Type here]

इदम् -  अकार नपु प्र एक

अस्ति - लट् प्रपु एक

मे - दकार त्रि ष एक

भविष्यति  - लृट् लकार प्रपु एक

धनम् - अकार नपु प्र एक

पदार्थः

लब्धम् - प्राप्तम्

इमं - इमम्

प्राप्स्ये - लभ्स्ये

मनोरथम् - मनस्तुष्टिकरम्

इदम् - इदम्

मे - मम

भविष्यति -  भविष्यति

धनम् - वित्तम्

अन्वयः

मया अद्य इदम् लब्धम् । (अहं) इमं  मनोरथम् प्राप्स्ये ।  इदम् धनम् मे अस्ति।  पुनः इदं मे भविष्यति ।

व्याकरणम्

▶ सन्धिः

अस्ति + इदम् - सवर्णदीर्घसन्धिः

पुनः + धनम् - विसर्गरेफः

 Downloaded from www.omkaravidya.com 

मूलश्लोकः

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥ १६.१४॥

पदच्छेदः
असौ मया हतः शत्रुः हनिष्ये च अपरान् अपि ईश्वरः अहम् अहं भोगी सिद्धः अहं बलवान् सुखी

पदपरिचयः
हतः - अकार पु प्र एक
शत्रुः - उकार पु प्र एक
हनिष्ये - लृट् लकारः उपु एक
अपरान् - अकार पु द्वि बहु
ईश्वरः - अकार पु प्र एक
अहम् - दकार त्रि प्र एक
भोगी - नकार पु प्र एक
सिद्धः - अकार पु प्र एक
बलवान् - तकार पु प्र एक
सुखी - नकार पु प्र एक

पदार्थः
हतः - हतः

 Downloaded from www.omkaravidya.com 

शत्रुः - अरिः
हनिष्ये - नाशयिष्यामि
अपरान् - अन्यान्
ईश्वरः - प्रभुः
अहम् - अकं
भोगी - भोक्ता
सिद्धः- कृतकृत्यः
बलवान् -बलयुक्तः
सुखी - सुखी

अन्वयः
असौ शत्रुः मया हतः । अपरान् च अपि हनिष्ये । अहम् ईश्वरः अहं भोगी अहं सिद्धः बलवान् सुखी च ( अस्मि)

व्याकरणम्
▶ सन्धिः
शत्रुः + हनिष्ये - विसर्गरेफः
च + अपरान् - सवर्णदीर्घसन्धिः
ईश्वरः + अहं - विसर्गउकारः पूर्वरूपसन्धिः
सिद्धः + अहं - विसर्गउकारः -पूर्वरूपसन्धिः

श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

[Type here] Downloaded from www.omkaravidya.com [Type here]

आढ्योऽभिजनवानस्मि कोऽन्योस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिता: ॥१६.१५॥

पदच्छेदः
आढ्य: अभिजनवान् अस्मि क: अन्य: अस्ति सदृश: मया यक्ष्ये दास्यामि मोदिष्ये इति अज्ञानविमोहिता:

पदपरिचयः
आढ्य: - अकार पु प्र एक
अभिजनवान् - तकार पु प्र एक
अस्मि - लट् उपु एक
अन्य: - अकार पु प्र एक
सदृश: - अकार पु प्र एक
यक्ष्ये - लृट् उपु एक
दास्यामि - लृट् उपु एक
मोदिष्ये - - लृट् उपु एक
अज्ञानविमोहिता: - अकार पु प्र बहु

पदार्थः
आढ्य: - धनवान्
अभिजनवान् - कुलिन:
अन्य: - इतर:
सदृश: - समान:
यक्ष्ये - यागं करोमि
दास्यामि - वितरिष्यामि

 Downloaded from www.omkaravidya.com 

मोदिष्ये - तुष्यामि
अज्ञानविमोहिताः - अविवेकभ्रान्ताः

अन्वयः
आढ्यः अभिजनवान् अस्मि । मया सदृशः  अन्यः कः अस्ति । (अहं) यक्ष्ये दास्यामि मोदिष्ये इति अज्ञानविमोहिताः (वदन्ति) ।

व्याकरणम्
▶ सन्धिः
आढ्यः + अभिजनवान् - विसर्गउकारः पूर्वरूपसन्धिः
कः + अन्यः - विसर्गउकारः पूर्वरूपसन्धिः
अन्यः + अस्ति - विसर्गउकारः
सदृशः + मया  - विसर्गउकारः
मोदिष्ये + इति - यान्तावान्तादेशसन्धिः
इति+ अज्ञानविमोहिताः - गुणसन्धिः

▶ समासः
अज्ञानेन विमोहिताः - अज्ञानविमोहिताः - तृतीयातत्पुरुषः

श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः


Downloaded from www.omkaravidya.com

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६.१६॥

पदच्छेदः

अनेकचित्तविभ्रान्ताः मोहजालसमावृताः प्रसक्ताः कामभोगेषु पतन्ति नरके अशुचौ

पदपरिचयः

अनेकचित्तविभ्रान्ताः - अकार पु प्र बहु
मोहजालसमावृताः - अकार पु प्र बहु
प्रसक्ताः - अकार पु प्र बहु
कामभोगेषु - अकार पु स बहु
पतन्ति - लट् प्रपु बहु
नरके - अकार पु स एक
अशुचौ - इकार स्त्री स एक

पदार्थः

अनेकचित्तविभ्रान्ताः - विविधमनोविभ्रम मोहिताः
मोहजालसमावृताः - अविवेकजालसमावृताः
प्रसक्ताः - अत्यन्तमासक्ताः
कामभोगेषु - विषयभोगेषु
पतन्ति - पतन्ति
नरके - नरकलोके
अशुचौ - वैतरण्यादौ

[Type here] Downloaded from www.omkaravidya.com [Type here]

अन्वयः

अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ।

व्याकरणम्

▶ सन्धिः

अनेकचित्तविभ्रान्ताः + मोहजालसमावृताः - विसर्गलोपः
नरके + अशुचौ - पूर्वरूपसन्धिः

▶ समासः

अनेकचित्तेन विभ्रान्ताः अनेकचित्तविभ्रान्ताः - तृतीयातत्पुरुषः
मोहः एव जालम् - मोहजालम् - अवधारणपूर्वपदकर्मधारयसमासः
मोहजालेन समावृताः - तृतीयातत्पुरुषः

## श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

आत्मसम्भाविताः स्तब्धाः धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ १६.१७॥

अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥१.१८॥

[Type here] Downloaded from www.omkaravidya.com [Type here]

तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १६.१९॥

पदच्छेदः
आत्मसम्भाविताः स्तब्धाः धनमानमदान्विताः यजन्ते नामयज्ञैः ते दम्भेन अविधिपूर्वकम् अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः माम् आत्मपरदेहेषु प्रद्विषन्तः अभ्यसूयकाः तान् अहं द्विषतः क्रूरान् संसारेषु नराधमान् क्षिपामि अजस्रम् अशुभान् आसुरीषु एव योनिषु

पदपरिचयः
आत्मसम्भाविताः - अकार पु प्र बहु
स्तब्धाः - अकार पु प्र बहु
धनमानमदान्विताः - अकार पु प्र बहु
यजन्ते - लट् प्रपु बहु
नामयज्ञैः - अकार पु तृ बहु
दम्भेन - अकार पु तृ एक
अविधिपूर्वकम् - अकार नपु द्वि एक
अहङ्कारं - अकार पु द्वि एक
बलं - अकार पु द्वि एक
दर्पं - अकार पु द्वि एक
कामं - अकार पु द्वि एक
क्रोधं - अकार पु द्वि एक
संश्रिताः - अकार पु प्र बहु
आत्मपरदेहेषु - अकार पु स बहु
प्रद्विषन्तः - तकार पु प्र बहु
अभ्यसूयकाः - अकार पु प्र बहु

[Type here] Downloaded from www.omkaravidya.com [Type here]

द्विषतः - तकार पु द्वि बहु
क्रूरान् - अकार पु द्वि बहु
संसारेषु - अकार पु स बहु
नराधमान्  - अकार पु द्वि बहु
क्षिपामि - लट् उपु एक
अजस्रम् - अव्ययम्
अशूभान् - अकार पु द्वि बहु
आसुरीषु इकार स्त्री स बहु
योनिषु - इकार पु स एक

पदार्थः
आत्मसम्भाविताः - आत्मना एव सम्भाविताः
स्तब्धाः - अप्रणतात्मानः
धनमानमदान्विताः - धननिमित्तमानमदान्विताः
यजन्ते -  यजन्ते
नामयज्ञैः - नामयज्ञैः
दम्भेन -धर्मध्वजितया
अविधिपूर्वकम् - आशास्त्रीयम्
अहङ्कारं -  अहङ्कारं
बलं - बलम्
दर्पं - दर्पम्
कामं - स्त्र्यादिविषयम्
क्रोधं - अनिष्टविषयम्
संश्रिताः - संश्रिताः
आत्मपरदेहेषु - स्वकीयान्यशरीरेषु
प्रद्विषन्तः - खेदयन्तः

[Type here] Downloaded from www.omkaravidya.com [Type here]

अभ्यसूयकाः - सन्मार्गस्थानां गुणेषु असहमानाः

द्विषतः - द्विषतः

क्रूरान् - क्रूरान्

संसारेषु - नरकसंसारणमार्गेषु

नराधमान् - नराधमान्

क्षिपामि - प्रक्षिपामि

अजस्रम् - सन्ततम्

अशूभान् - अशूभान्

आसुरीषु - आसुरीषु

योनिषु - योनिषु

अन्वयः

आत्मसम्भाविताः स्तब्धाः धनमानमदान्विताः ते दम्भेन नामयज्ञैः अविधिपूर्वकम् यजन्ते । अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः आत्मपरदेहेषु मां प्रद्विषन्तः अभ्यसूयकाः ते द्विषतः क्रूरान् अशूभान् नराधमान् तान् संसारेषु आसुरीषु योनिषु एव अजस्रम् अहं क्षिपामि ।

व्याकरणम्

▶ सन्धिः

स्तब्धाः + धनमानमदान्विताः - विसर्गलोपः

नामयज्ञैः+ ते - विसर्गसकारः

दम्भेन +अविधिपूर्वकम् - सवर्णदीर्घसन्धिः

प्रद्विषन्तः + अभ्यसूयकाः -विसर्गउकारः पूर्वरूपसन्धिः

क्षिपामि + अजस्रम् - यण्सन्धिः

आसुरीषु + एव - यण्सन्धिः

[Type here] Downloaded from www.omkaravidya.com [Type here]

▶ समासः
आत्मना सम्भाविताः - तृतीयातत्पुरुषः
धनं च मानश्च मदश्च - धनमानमदाः -इतरेतरद्वन्द्वसमासः
तै; अन्विताः तृतीयातत्पुरुषः

श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमांगतिम् ॥१६.२०॥

पदच्छेदः
आसुरीं योनिम् आपन्नाः मूढाः जन्मनि जन्मनि माम् अप्राप्य एव कौन्तेय ततः यान्ति अधमां गतिम्

पदपरिचयः
आसुरीं - ईकार स्त्री द्वि एक
योनिम् - इकार पु द्वि एक
आपन्नाः - अकार पु प्र बहु
मूढाः - अकार पु प्र बहु
जन्मनि - नकार नपु स एक
अप्राप्य - ल्यबन्तम्

 Downloaded from www.omkaravidya.com 

कौन्तेय - अकार पु सं प्र
यान्ति - लट् प्रपु बहु
अधमां - अाकार स्त्री द्वि एक
गतिम् - इकार स्त्री द्वि एक

पदार्थः
आसुरीं - राक्षसीं
योनिम् -प्रकृतिं
आपन्नाः-प्रतिपन्नाः
मूढाः - अविवेकिनः
जन्मनि जन्मनि - प्रति जन्म
अप्राप्य - अनसाद्यकौन्तेय ततः यान्ति
अधमां - निकृष्ठतमां
गतिम् - मार्गम्

अन्वयः
हे कौन्तेय ! मूढाः जन्मनि जन्मनि आसुरीं योनिम् आपन्नाः माम् अप्राप्य ततः अधमां गतिम् यान्ति ।

व्याकरणम्
▶ सन्धिः
आपन्नाः + मूढाः विसर्गलोपः
मूढाः + जन्मनि - विसर्गलोपः
अप्राप्य + एव - वृद्धिसन्धिः
ततः + यान्ति - विसर्गउकारः
यान्ति +अधमां - यण्सन्धिः


Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ १६.२१॥

पदच्छेदः
त्रिविधं नरकस्य इदं द्वारं नाशनम् आत्मनः कामः क्रोधः तथा लोभः तस्मात् एतत् त्रयं त्यजेत्

पदपरिचयः
त्रिविधं - अकार नपु प्र एक
नरकस्य - अकार पु ष एक
द्वारं - अकार नपु प्र एक
नाशनम् - अकार नपु प्र एक
आत्मनः - नकार पु ष एक

 Downloaded from www.omkaravidya.com 

कामः- अकार पु प्र एक
क्रोधः  - अकार पु प्र एक
लोभः- अकार पु प्र एक
त्रयं- अकार नपु प्र एक
त्यजेत् - लोट् प्रपु एक

पदार्थः
त्रिविधं - त्रिप्रकारम्
नरकस्य - नरकस्य
द्वारं - द्वारम्
नाशनम् -  नाशनम्
आत्मनः - आत्मनः
कामः - इच्छा
क्रोधः-क्रोपः
लोभः - लोभः
त्रयं - त्रयम्
त्यजेत् -  त्यजेत्

अन्वयः
कामः क्रोधः तथा लोभः त्रिविधं नरकस्य इदं द्वारं  आत्मनः नाशनम् तस्मात् एतत् त्रयं त्यजेत् ।

व्याकरणम्
▶ सन्धिः
नरकस्य + इदं - गुणसन्धिः
क्रोधः + तथा - विसर्गसकारः


Downloaded from www.omkaravidya.com

लोभः + तस्मात् - विसर्गसकारः
तस्मात् + एतत् - जश्त्वसन्धिः

श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचारत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥ १६.२२॥

पदच्छेदः
एतैः विमुक्तः कौन्तेय तमोद्वारैः त्रिभिः नरः आचारति आत्मनः श्रेयः ततः याति परां गतिम्

पदपरिचयः
विमुक्तः - अकर पु प्र एक
कौन्तेय - अकार पु सं प्र
तमोद्वारैः - अकार नपु तृ बहु
त्रिभिः - अकार नपु तृ बहु
नरः - अकार पु प्र एक
आचारति -लट् प्रपु एक


Downloaded from www.omkaravidya.com

आत्मनः - नकार पु ष एम

श्रेयः - सकार पु प्र एक

याति - लट् प्रपु एक

परां - आकार स्त्री द्वि एक

गतिम् - इकार स्त्री द्वि एक

पदार्थः

विमुक्तः - विवर्जितः

कौन्तेय - अर्जुन

तमोद्वारैः- नरकद्वारैः

त्रिभिः - त्रिभिः

नरः - मनुष्यः

आचारति - अनुतिष्ठति

आत्मनः - आत्मनः

श्रेयः - हितम्

याति - गच्छति

परां - उत्कृष्टाम्

गतिम् - गतिम्

अन्वयः

हे कौन्तेय! एतैः त्रिभिः तमोद्वारैः विमुक्तः नरः आत्मनः श्रेयः आचारति ततः परां गतिम् याति ।

व्याकरणम्

▶ सन्धिः

एतैः + विमुक्तः - विसर्गरेफः

[Type here] Downloaded from www.omkaravidya.com [Type here]

तमोद्वारैः + त्रिभिः - विसर्गसकारः
त्रिभिः + नरः - विसर्गरेफः
आचारति + आत्मनः - यण्सन्धिः
श्रेयः + ततः - विसर्गसकारः
ततः +याति - विसर्गउकारः

▶ समासः
तमसः द्वारम् - तमोद्वारम् - षष्ठीतत्पुरुषः - तैः

श्रीमद्भगवद्गीता - षोडशोऽध्यायः - दैवासुरसंपद्विभागयोगः

मूलश्लोकः

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ १६.२३॥

पदच्छेदः
यः शास्त्रविधिम् उत्सृज्य वर्तते कामकारतः न सः सिद्धिम् अवाप्नोति न सुखं न परां गतिम्

पदपरिचयः
शास्त्रविधिम् - इकार पु द्वि एक
उत्सृज्य- ल्यबन्तम्
वर्तते - लट् प्रपु एक
कामकारतः - अव्ययम्
सिद्धिम् - इकार स्त्री द्वि एक
अवाप्नोति - लट् प्रपु एक

[Type here] Downloaded from www.omkaravidya.com [Type here]

सुखं  - अकार नपु द्वि एक
परां - आकार स्त्री द्वि एक
गतिम् - इकार स्त्री द्वि एक

पदार्थः
शास्त्रविधिम् -  शास्त्रनियमम्
उत्सृज्य- त्यक्त्वा
वर्तते - प्रवर्तते
कामकारतः - कामप्रयुक्तः
सिद्धिम् - तत्त्वज्ञानम्
अवाप्नोति  - प्राप्नोति
सुखं -सुखं
परां - प्रकृष्टाम्
गतिम् - स्वर्गम्
अन्वयः
यः शास्त्रविधिम् उत्सृज्य  कामकारतः वर्तते सः सिद्धिम् न अवाप्नोति न सुखं न परां गतिम् (अवाप्नोति) ।

व्याकरणम्
▶ सन्धिः
सः + सिद्धिम्  - विसर्गलोपः

▶ समासः
शास्त्रसम्मतः विधिः - शास्त्रविधिः - मध्यमपदलोपि

 Downloaded from www.omkaravidya.com 

मूलश्लोक:

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ १६.२५॥

पदच्छेदः
तस्मात् शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुम् इह अर्हसि

पदपरिचयः
शास्त्रं - अकार नपु प्र एक
प्रमाणं - अकार नपु प्र एक
कार्याकार्यव्यवस्थितौ - इकार स्त्री स एक
ज्ञात्वा - क्त्वान्तम्
शास्त्रविधानोक्तं - अकार नपु द्वि एक
कर्म - नकार नपु द्वि एक
कर्तुम् - तुमुनन्तम्
अर्हसि - लट् मपु एक

पदार्थः
शास्त्रं - शास्त्रं
प्रमाणं - ज्ञानसाधनम्
कार्याकार्यव्यवस्थितौ - कर्तव्याकर्तव्यव्यवस्थायाम्

 Downloaded from www.omkaravidya.com 

ज्ञात्वा - बुद्ध्वा
शास्त्रविधानोक्तं  - शास्त्रविहितम्
कर्म- स्वकर्म
कर्तुम् -  कर्तुम्
अर्हसि  - अर्हसि

अन्वयः
तस्मात्  कार्याकार्यव्यवस्थितौ ते शास्त्रं प्रमाणं । (त्वं) शास्त्रविधानोक्तं कर्म इह (लोके)  ज्ञात्वा कर्तुम्  अर्हसि  ।

व्याकरणम्
▶ सन्धिः
तस्मात् + शास्त्रम् - श्चुत्वसन्धि: छत्वसन्धि:
इह + अर्हसि - सवर्णदीर्घसन्धि:

▶ समास:
शास्त्रेण विधानम्  - शास्त्रविधानम् तृतीयातत्पुरुष:
शास्त्रविधानलक्षणेन उक्तम् - तृतीयातत्पुरुष:

श्रीमद्भगवद्गीता  -  षोडशोऽध्याय:  -  दैवासुरसंपद्विभागयोग:

मूलश्लोकः


Downloaded from www.omkaravidya.com

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः ॥ १६॥

पदच्छेदः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसम्पद्विभागयोगः नाम षोडशः अध्यायः

पदपरिचयः
ॐ - अव् धातुः + मन् प्रत्ययः
तत् - दकार. नपु. पु एक
सत् - दकार. नपु. प्र एक
इति - अव्ययम्
श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु
उपनिषत्सु - दकार. स्त्री स बहु
ब्रह्मविद्यायां - आकार. स्त्री स एक
योगशास्त्रे - अकार. नपु. स. एक
श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक
दैवासुरसम्पद्विभागयोगः- अकार. पु. प्र. एक
नाम - नकार.नपु. प्र एक
षोडशः - अकार. पु. प्र एक
अध्यायः - अकार. पु. प्र एक

पदार्थः
ॐ - ओम्
तत् - तत्

[Type here] Downloaded from www.omkaravidya.com [Type here]

सत् - सत्
इति - एवम्
श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु
उपनिषत्सु - उपनिषत्सु
ब्रह्मविद्यायां - ब्रह्म पाठे
योगशास्त्रे - योगशास्त्रे
श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयोः मध्ये संवादे
दैवासुरसम्पद्विभागयोगः - दैवासुरसम्पद्विभागयोग
नाम - नाम
षोडशः - षोडशः
अध्यायः - अध्यायः

अन्वयः
ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसम्पद्विभागयोगः नाम षोडशः अध्यायः (संपूर्णम् भवति) ।

व्याकरणम्
▶सन्धिः
श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः
योगः + नाम - विसर्ग उकारः
षोडशः + अध्यायः - विसर्ग उकारः पूर्वरूपसन्धिः

▶ समासः
ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारयः

 Downloaded from www.omkaravidya.com 

# श्रीमद्भगवद्गीता

# सप्तदशोऽध्यायः

# श्रद्धात्रयविभागयोगः


Downloaded from www.omkaravidya.com

मूलश्लोकः

अर्जुन उवाच
ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥१॥

पदच्छेदः
अर्जुन उवाच
ये शास्त्रविधिम् उत्सृज्य यजन्ते श्रद्धया अन्विताः तेषां निष्ठा तु का कृष्ण सत्त्वम् आहो रजः तमः

पदपरिचयः
शास्त्रविधिम् - इकार पु द्वि एन
उत्सृज्य - ल्यबन्तम्
यजन्ते - लट् प्रपु बहु
श्रद्धया - आकार स्त्री तृ एक
अन्विताः - अकार पु प्र बहु
निष्ठा - आकार स्त्री प्र एक
कृष्ण - अकार पु सं प्र
सत्त्वम् - अकार नपु प्र एक
आहो - अव्ययम्
रजः - सकार नपु प्र एक
तमः - सकार नपु प्र एक

 Downloaded from www.omkaravidya.com 

पदार्थः

शास्त्रविधिम् - शास्त्रविधानम्

उत्सृज्य - परित्यज्य

यजन्ते - पूजयन्ति

श्रद्धया - आस्तिक्यबुद्ध्या

अन्विताः - संयुक्ताः

निष्ठा - अवस्थानम्

कृष्ण - हे कृष्ण

सत्त्वम् - सात्विकी

आहो - आहो

रजः - राजसी

तमः - तामसी

अन्वयः

हे कृष्ण ! ये शास्त्रविधिम् उत्सृज्य तु श्रद्धया अन्विताः यजन्ते तेषां निष्ठा तु सत्त्वम् आहो रजः तमः ?

व्याकरणम्

▶सन्धिः

श्रद्धया + अन्विताः - सवर्णदीर्घसन्धिः

रजः + तमः - विसर्गसकारः

▶ समासः

शासत्रस्य विधिः - शासत्रविधिः - षष्ठीतत्पुरुषः

▶ कृदन्ताः

उत्सृज्य - उत् + सृज् + ल्यप् प्रत्ययः


Downloaded from www.omkaravidya.com

मूलश्लोकः

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां श्रृणु ॥२॥

पदच्छेदः
त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा सात्त्विकी राजसी च एव तामसी च इति तां श्रृणु

पदपरिचयः
त्रिविधा - आकार स्त्री प्र एक
भवति - लट् प्रपु एक
श्रद्धा - आकार स्त्री प्र एक
देहिनां - नकार पु ष बहु
स्वभावजा - आकार स्त्री प्र एक
सात्त्विकी - ईकार स्त्री प्र एक
राजसी - ईकार स्त्री प्र एक
तामसी - ईकार स्त्री प्र एक
श्रृणु - लोट् मपु एक

पदार्थः
त्रिविधा - त्रिप्रकारा
भवति - अस्ति
श्रद्धा - अवलम्बिता

 Downloaded from www.omkaravidya.com 

देहिनां - प्राणिनाम्

स्वभावजा - स्वभावात् सञ्जाता

सात्त्विकी - सत्त्वनिर्वृता

राजसी - रजोनिर्वृत्ता

तामसी - तमोनिर्वृत्ता

श्रृणु - आकर्ण्य

अन्वयः

देहिनां स्वभावजा सा श्रद्धा सात्त्विकी राजसी च एव तामसी च इति त्रिविधा भवति । (त्वम्) तां श्रृणु ।

व्याकरणम्

▶सन्धिः

च + एव - वृद्धिसन्धिः

च + इति - गुणसन्धिः

▶ समासः

स्वभावात् जायते इति स्वभावजा- उपपदसमासः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥ ३॥

 Downloaded from www.omkaravidya.com 

पदच्छेदः

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत श्रद्धामयः अयं  पुरुषः यः यच्छ्रद्धः सः एव सः

पदपरिचयः

सत्त्वानुरूपा - आकार स्त्री प्र एक

सर्वस्य - अकार पु ष एक

श्रद्धा -  आकार स्त्री प्र एक

भवति - लट् प्रपु एक

भारत - अकार पु सं प्र

श्रद्धामयः  -  अकार पु प्र एक

पुरुषः -  अकार पु प्र एक

यच्छ्रद्धः -  अकार पु प्र एक

पदार्थः

सत्त्वानुरूपा -  अन्तःकरणानुगुणा

सर्वस्य - प्राणिजातस्य

श्रद्धा -श्रद्धा

भवति - भवति

भारत - अर्जुन

श्रद्धामयः - श्रद्धान्वितः

पुरुषः -जीवः

यच्छ्रद्धः - यादृशाक्तिविशिष्टः

अन्वयः

हे भारत! सर्वस्य श्रद्धा सत्त्वानुरूपा  भवति । अयं  पुरुषः श्रद्धामयः यः यच्छ्रद्धः सः एव सः ।

[Type here] Downloaded from www.omkaravidya.com [Type here]

व्याकरणम्

▶सन्धिः

श्रद्धामयः + अयं - विसर्गउकारः पूर्वरूपसन्धिः

पुरुषः + यः - विसर्गउकारः

सः + एव - विसर्गलोपः

▶ समासः

या श्रद्धा यस्य सः - यच्छ्रद्धः - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ ४॥

पदच्छेदः

यजन्ते सात्त्विकाः देवान् यक्षरक्षांसि राजसाः प्रेतान् भूतगणान् च अन्ये यजन्ते तामसा जनाः

पदपरिचयः

यजन्ते - लट् प्रपु एक

सात्त्विकाः - अकार पु प्र बहु

देवान् - अकार पु द्वि बहु

यक्षरक्षांसि - सकार नपु द्वि बहु

[Type here] Downloaded from www.omkaravidya.com [Type here]

राजसाः - अकार पु प्र बहु

प्रेतान् - अकार पु द्वि बहु

भूतगणान् अकार पु द्वि बहु

यजन्ते - लट् प्रपु बहु

तामसाः -अकार पु प्र बहु

जनाः - अकार पु प्र बहु

पदार्थः

यजन्ते - पूजयन्ति

सात्त्विकाः - सत्त्वनिष्ठाः

देवान् - अमरान्

यक्षरक्षांसि - अकार नपु द्वि बहु

राजसाः - राजसाः

प्रेतान् - प्रेतान्

भूतगणान् भूतगणान्

यजन्ते - पूजयन्ति

तामसाः -तामसाः

जनाः - पुरुषाः

अन्वयः

सात्त्विकाः देवान् यजन्ते । राजसाः यक्षरक्षांसि अन्ये तामसा जनाः प्रेतान् भूतगणान् च यजन्ते ।

व्याकरणम्

सन्धिः

सात्त्विकाः + देवान् - विसर्गलोपः

[Type here] Downloaded from www.omkaravidya.com [Type here]

भूतगणान् + च - सत्वसन्धिः
च + अन्ये - सवर्णदीर्घसन्धिः
तामसाः + जनाः - विसर्गलोपः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥ ५॥

कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ।
मां चैवान्तः शरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥६॥

पदच्छेदः
अशास्त्रविहितं घोरं तप्यन्ते ये तपः जनाः दम्भाहङ्कारसंयुक्ताः
कामरागबलान्विताः कर्शयन्तः शरीरस्थं भूतग्रामम् अचेतसः
मां च एव अन्तः शरीरस्थं तान् विद्धि आसुरनिश्चयान्

पदपरिचयः
अशास्त्रविहितं - अकार नपु द्वि एक
घोरं- अकार नपु द्वि एक
तप्यन्ते - लट् प्रपु बहु
तपः - सकार नपु द्वि एक
जनाः - अकार पु प्र बहु
दम्भाहङ्कारसंयुक्ताः- अकार पु प्र बहु

[Type here] Downloaded from www.omkaravidya.com [Type here]

कामरागबलान्विता: - अकार पु प्र बहु

कर्शयन्त: - तकार पु प्र बहु

शरीरस्थं - अकार पु दंवि एक

भूतग्रामम् - अकार पु द्वि एक

अचेतस: सकार पु प्र बहु

अन्त: शरीरस्थं - अकार पु द्वि एक

विद्धि - लोट् मपु एक

आसुरनिश्चयान् - अकार पु द्वि बहु

पदार्थः

अशासत्रविहितं -अशासत्रप्रतिपादितं

घोरं - भयकरम्

तप्यन्ते - निर्वर्तयन्ति

तप: - तप:

जना: - प्राणिन:

दम्भाहङ्कारसंयुक्ता: -दम्भाभिमानसहिता:

कामरागबलान्विता: - इच्छानुराहग्रस्ता:

कर्शयन्त: - कृशीकुर्वन्त:

शरीरस्थं- देहस्थितम्

भूतग्रामम् - करणसमुदायम्

अचेतस: -अविवेकिन:

अन्त: शरीरस्थं - साक्षिभूतम्

विद्धि - जानीहि

आसुरनिश्चयान् - क्रूरनिर्णयान्

 Downloaded from www.omkaravidya.com 

अन्वयः

ये जनाः दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् अन्तः शरीरस्थं मां च एव कर्शयन्तः  अशासत्रविहितं घोरं तपः तप्यन्ते तान् आसुरनिश्चयान् विद्धि ।

व्याकरणम्

▶सन्धिः

तपः + जनाः - विसर्गउकारः

च + एव - वृद्धिसन्धिः

एव + अन्तशरीरस्थम् - सवर्णदीर्घसन्धिः

विद्धि + आसुरनिश्चयान् - यण्सन्धिः

▶ समासः

शासत्रेण विहितम् - तृतीयातत्पुरुषः

न शासत्रविहितम् - अशासत्रविहितम् - नञ्तत्पुरुषः

दम्भः च अहङ्कारः च दम्भाहङ्कारौ - इतरेतरद्वन्द्वसमासः

ताभ्यां सम्युक्ताः - दम्भाहङ्कारसंयुक्ताः - तृतीतातत्पुरुषः

कामः च रागः च कामरागौ - इतरेतरद्वन्द्वसमासः

तत् कृतं बलम् - कामरागबलम्

तेन अन्विताः - कामरागबलान्विताः -तृतीतातत्पुरुषः

[Type here] Downloaded from www.omkaravidya.com [Type here]

मूलश्लोकः

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७॥

पदच्छेदः
आहारः तु अपि सर्वस्य त्रिविधः भवति प्रियः यज्ञः तपः तथा दानं तेषां भेदम् इमं शृणु

पदपरिचयः
आहारः - अकार पु प्र एक
सर्वस्य- दकार पु ष एक
त्रिविधः - अकार पु प्र एक
भवति - लट् प्रपु एक
प्रियः - अकार पु प्र एक
यज्ञः अकार पु प्र एक
तपः - सकार नपु प्र एक
दानं अकार नपु प्र एक
भेदम् - अकार पु द्वि एक
शृणु - लोट् मपु एक

पदार्थः
आहारः - भोजनम्

[Type here] Downloaded from www.omkaravidya.com [Type here]

सर्वस्य- सकलस्य

त्रिविधः - त्रिप्रकारः

भवति - अस्ति

प्रियः - इष्टः

यज्ञः - यज्ञः

तपः - तपः

दानं - दानम्

भेदम् - भेदम्

श्रृणु - आकर्ण्य

अन्वयः

अपि सर्वस्य प्रियः आहारः तु त्रिविधः भवति । तथा (एव) यज्ञः तपः दानं च । तेषां इमं भेदम् श्रृणु ।

व्याकरणम्

▶सन्धिः

आहारः + तु - विसर्गसकारः

तु + अपि - यण्सन्धिः

त्रिविधः + भवति - विसर्गउकारः

यज्ञः + तपः - विसर्गसकारः

तपः + तथा - विसर्गसकारः

[Type here] Downloaded from www.omkaravidya.com [Type here]

मूलश्लोकः

आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिराः हृद्या आहाराः सात्त्विकप्रियाः ॥८॥

पदच्छेदः
आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः

पदपरिचयः
आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः -अकार पु प्र बहु
रस्याः - अकार पु प्र बहु
स्निग्धाः - अकार पु प्र बहु
स्थिराः- अकार पु प्र बहु
हृद्याः - अकार पु प्र बहु
आहाराः- अकार पु प्र बहु
सात्त्विकप्रियाः - अकार पु प्र बहु

पदार्थः
आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः - आयुष्यं उत्साहः शक्तिः अरोग्यं चित्तप्रकाशः प्रीतिः च एषां वर्धकाः
रस्याः - रसोपेताः
स्निग्धाः - स्नेहवन्तः
स्थिराः - चिरस्थायिनः

 Downloaded from www.omkaravidya.com 

हृद्याः - हृदयप्रियाः
आहाराः- आहाराः
सात्त्विकप्रियाः सात्त्विकस्य इष्टाः

अन्वयः
आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः ।

व्याकरणम्
▶सन्धिः
स्थिराः + हृद्याः - विसर्गलोपः
हृद्याः + आहाराः - विसर्गलोपः

▶ समासः
आयुः च सत्त्वं च बलं च अरोग्यम् च सुखं च प्रीतिः - इतरेतरद्वन्द्वसमासः
तासां विवर्धनाः - आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९॥

[Type here] Downloaded from www.omkaravidya.com [Type here]

पदच्छेदः

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः आहाराः राजसस्य इष्टाः दुःखशोकामयप्रदाः

पदपरिचयः

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः - नकार पु प्र बहु

आहाराः - अकार पु प्र बहु

राजसस्य - अकार पु ष एक

इष्टाः - अकार पु प्र बहु

दुःखशोकामयप्रदाः - अकार पु प्र बहु

पदार्थः

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः - कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः

आहाराः - भुञ्जानः

राजसस्य - राजोगुणसहितस्य

इष्टाः - प्रियाः

दुःखशोकामयप्रदाः - दुःखव्याकुलरोगदायकाः

अन्वयः

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः दुःखशोकामयप्रदाः आहाराः राजसस्य इष्टाः ।

व्याकरणम्

▶सन्धिः

आहाराः + राजसस्य- विसर्गलोपः

इष्टाः + दुःखशोकामयप्रदाः - विसर्गलोपः

[Type here] Downloaded from www.omkaravidya.com [Type here]

▶ समासः

कटुः च अम्लः च लवणः च अत्युष्णः तीक्ष्णः च रुक्षः च विदाही च - इतरेतरद्वन्द्वसमासः

दुःखं च शोकः च आमयः च - इतरेतरद्वन्द्वसमासः

दुःखशोकामयम् प्रददाति दुःखशोकामयप्रदः - उपपदसमासः - ते

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

यातयामं गतरसं पूति पर्युषितं च यत् ।

उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥१०॥

पदच्छेदः

यातयामं गतरसं पूति पर्युषितं च यत् उच्छिष्टम् अपि च अमेध्यं भोजनं तामसप्रियम्

पदपरिचयः

यातयामं - अकार नपु प्र एक

गतरसं - अकार नपु प्र एक

पूति - इकार नपु प्र एक

पर्युषितं - अकार नपु प्र एक

उच्छिष्टम् - अकार नपु प्र एक

अमेध्यं - अकार नपु प्र एक

भोजनं - अकार नपु प्र एक

तामसप्रियम् - अकार नपु प्र एक


Downloaded from www.omkaravidya.com

पदार्थः

यातयामं - मन्दपक्वं निर्वीर्यम्

गतरसं - रसवियुक्तम्

पूति - दुर्गन्धम्

पर्युषितं - रात्र्यन्तरितम्

उच्छिष्टम् - भुक्तशिष्टम्

अमेध्यं - अयजार्हम्

भोजनं - भोजनं

तामसप्रियम् - तामसाभिमतम्

अन्वयः

यातयामं गतरसं पूति पर्युषितं च उच्छिष्टम् अमेध्यं च यत् भोजनं (तत्) तामसप्रियम् ।

व्याकरणम्

▶सन्धिः

च + अमेध्यम् - सवर्णदीर्घसन्धिः


Downloaded from www.omkaravidya.com

मूलश्लोकः

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥११॥

पदच्छेदः
अफलाकाङ्क्षिभिः यज्ञः विधिदृष्टः य इज्यते यष्टव्यम् एव इति मनः समाधाय सः सात्त्विकः

पदपरिचयः
अफलाकाङ्क्षिभिः - नकार पु तृ बहु
यज्ञः - अकार पु प्र एक
विधिदृष्टः - अकार पु प्र एक
इज्यते - लट् प्रपु एक
यष्टव्यम् - तव्यरन्तम्
मनः - सकार नपु द्वि एक
समाधाय - ल्यबन्तम्
सात्त्विकः - अकार पु प्र एक

पदार्थः
अफलाकाङ्क्षिभिः - अफलार्थिभिः
यज्ञः - यागः
विधिदृष्टः - शासत्रचोदनदृष्टः

[Type here] Downloaded from www.omkaravidya.com [Type here]

इज्यते -निर्वर्त्यते
यष्टव्यम् - यज्ञस्वरूपनिर्वर्तनम्
मन: - अन्त:करणम्
समाधाय - मन: एकाग्रं कृत्वा
सात्त्विक: - सत्त्वसम्बन्धी

अन्वयः
य: यज्ञ: अफलाकाङ्क्षिभि: विधिदृष्ट: यष्टव्यम् एव इति मन: समाधाय इज्यते स: सात्त्विक: ।

व्याकरणम्
▶सन्धिः
अफलाकाङ्क्षिभि: + यज्ञ: - विसर्गरेफ:
यज्ञ: + विधिदृष्ट: - विसर्गउकार:
विधिदृष्ट: + य: - विसर्गउकार:
य: + इज्यते - विसर्गलोप:
स: + सात्त्विक: - विसर्गलोप:

श्रीमद्भगवद्गीता - सप्तदशोऽध्याय: - श्रद्धात्रयविभागयोग:

मूलश्लोकः

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२॥


Downloaded from www.omkaravidya.com

पदच्छेदः

अभिसन्धाय तु फलं दम्भार्थम् अपि च एव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्

पदपरिचयः

अभिसन्धाय - ल्यबन्तम्

फलं - अकार नपु द्वि एक

दम्भार्थम्  - अव्ययम्

इज्यते - लट् कर्मणि प्रपु एक

भरतश्रेष्ठ - अकार पु सं प्र

यज्ञं - अकार पु द्वि एक

विद्धि - लोट् मपु एक

राजसम् - अकार पु द्वि एक

पदार्थः

अभिसन्धाय - उद्दिश्य

फलं - फलम्

दम्भार्थम् - धर्मध्वजित्वार्थम्

इज्यते - इज्यते

भरतश्रेष्ठ - अर्जुन

यज्ञं - यज्ञम्

विद्धि - जानीहि

राजसम् - रजोगुनसम्बन्धिनम्

[Type here] Downloaded from www.omkaravidya.com [Type here]

अन्वयः
हे भरतश्रेष्ठ! फलं अभिसन्धाय तु दम्भार्थम् अपि च एव यत् इज्यते  तं यज्ञं राजसम् विद्धि ।

व्याकरणम्
▶सन्धिः
च + एव - वृद्धिसन्धिः

▶समासः
भरतेषु श्रेष्ठः - सप्तमीतत्पुरुषः

▶ कृदन्ताः
अभिसन्धाय - अभि + सम् + धा+ ल्यप् प्रत्ययः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३॥

पदच्छेदः
विधिहीनम् असृष्टान्नं मन्त्रहीनम् अदक्षिणम् श्रद्धाविरहितं यज्ञं तामसं परिचक्षते

पदपरिचयः
विधिहीनम् - अकार पु द्वि एक

 Downloaded from www.omkaravidya.com 

असृष्टान्नं  - अकार नपु द्वि एक
मन्त्रहीनम्  - अकार पु द्वि एक
अदक्षिणम् - अकार पु द्वि एक
श्रद्धाविरहितं  - अकार पु द्वि एक
यज्ञं  - अकार पु द्वि एक
तामसं - अकार पु द्वि एक
परिचक्षते - लट् प्रपु बहु

पदार्थः

विधिहीनम् - यथाचोदितविपरीतम्
असृष्टान्नं - ब्राह्मणेभ्यः न दत्तम्
मन्त्रहीनम् - मन्त्रतः स्वरतः वर्णतः च वियुक्तम्
अदक्षिणम् - उक्तदक्षिणरहितम्
श्रद्धाविरहितं - श्रद्धाविरहितं
यज्ञं - यज्ञं
तामसं -तामसं
परिचक्षते - कथ्यन्ते

अन्वयः
विधिहीनम् असृष्टान्नं मन्त्रहीनम् अदक्षिणम् श्रद्धाविरहितं यज्ञं तामसं परिचक्षते
व्याकरणम्
▶समासः
सृष्टं अन्नम् यस्मिन् तत् - समानाधिकरणबहुव्रीहिसमासः
न सृष्टान्नम् - नञ् तत्पुरुषः


Downloaded from www.omkaravidya.com

मूलश्लोकः

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१४॥

पदच्छेदः
देवद्विजगुरुप्राज्ञपूजनं शौचम् आर्जवम् ब्रह्मचर्यम् अहिंसा च शारीरं तपः उच्यते

पदपरिचयः
देवद्विजगुरुप्राज्ञपूजनं - अकार नपु प्र एक
शौचम् - अकार नपु प्र एक
आर्जवम् - अकार नपु प्र एक
ब्रह्मचर्यम् - अकार नपु प्र एक
अहिंसा - आकार स्त्री प्र एक
शारीरं - अकार नपु प्र एक
तपः- सकार नपु प्र एक
उच्यते -लट् कर्मणि प्रपु एक

पदार्थः
देवद्विजगुरुप्राज्ञपूजनं -देवद्विजगुरुप्राज्ञपूजनं
शौचम् -शुद्धिः
आर्जवम् - ऋजुत्वम्
ब्रह्मचर्यम् -ब्रह्मव्रतम्

 Downloaded from www.omkaravidya.com 

अहिंसा - अपीडनम्
शारीरं - दैहिकम्
तपः - तपः
उच्यते - उच्यते

अन्वयः
देवद्विजगुरुप्राज्ञपूजनं शौचम् आर्जवम् ब्रह्मचर्यम् अहिंसा  च शारीरं तपः उच्यते ।

व्याकरणम्
▶सन्धिः
तपः + उच्यते - विसर्गलोपः

▶ समासः
देवाः च द्विजाः च गुरवः च प्राज्ञाः च - देवद्विजगुरुप्राज्ञाः - इतरेतरद्वन्द्वसमासः
तेषां पूजनम् - देवद्विजगुरुप्राज्ञपूजनं- षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१५॥

 Downloaded from www.omkaravidya.com 

पदच्छेदः

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् स्वाध्यायाभ्यसनं च एव वाङ्मयं तपः उच्यते

पदपरिचयः

अनुद्वेगकरं - अकार नपु प्र एक

वाक्यं- अकार नपु प्र एक

सत्यं - अकार नपु प्र एक

प्रियहितं - अकार नपु प्र एक

स्वाध्यायाभ्यसनं - अकार नपु प्र एक

वाङ्मयं - अकार नपु प्र एक

तपः - सकार नपु प्र एक

उच्यते - लट् कर्मणि प्रपु एक

पदार्थः

अनुद्वेगकरं - प्राणिनां अदुःखकरम्

वाक्यं - वचनम्

सत्यं - यथार्थम्

प्रियहितं - प्रियहितं

स्वाध्यायाभ्यसनं - वेदशास्त्राभ्यासम्

वाङ्मयं - वाग्रूपम्

तपः - तपः

उच्यते – कथ्यते


Downloaded from www.omkaravidya.com

अन्वयः
यत् अनुद्वेगकरं  सत्यं प्रियहितं च वाक्यं स्वाध्यायाभ्यसनं च एव
(तत्) वाङ्मयं तपः उच्यते ।

व्याकरणम्
▶सन्धिः
च + एव - वृद्धिसन्धिः
तपः + उच्यते - विसर्गलोपः

▶ समासः
उद्वेगं करोति इति - उद्वेगकरः - उपपदसमासः
न उद्वेगकरः - अनुद्वेगकरः नञ्तत्पुरुषः तम्
प्रियं च हितं च - प्रियहितम्
स्वाध्यायस्य अभ्यसनम् - स्वाध्यायाभ्यसनं - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता  - सप्तदशोऽध्यायः  -  श्रद्धात्रयविभागयोगः

मूलश्लोकः

मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ १६॥

पदच्छेदः
मनः प्रसादः सौम्यत्वं मौनम् आत्मविनिग्रहः भावसंशुद्धिः इति एतत् तपः
मानसम् उच्यते


Downloaded from www.omkaravidya.com

पदपरिचयः

मनः प्रसादः - अकार पु प्र एक

सौम्यत्वं - अकार नपु प्र एक

मौनम्  - अकार नपु प्र एक

आत्मविनिग्रहः  - अकार पु प्र एक

भावसंशुद्धिः - इकार स्त्री प्र एक

तपः - सकार नपु प्र एक

मानसम् -  - अकार नपु प्र एक

उच्यते - लट् कर्मणि प्रपु एक

पदार्थः

मनः प्रसादः - मनसः प्रशान्तिः

सौम्यत्वं - अक्रूरत्वम्

मौनम् - वाक्संयमः

आत्मविनिग्रहः - मनोनिरोधः

भावसंशुद्धिः - अमायावित्वम्

तपः  - तपः

मानसम् -मानसम्

उच्यते - कथ्यते

अन्वयः

मनः प्रसादः सौम्यत्वं मौनम् आत्मविनिग्रहः भावसंशुद्धिः इति एतत्  मानसम् तपः उच्यते ।

 Downloaded from www.omkaravidya.com 

व्याकरणम्

▶सन्धिः

भावसंशुद्धिः + इति - विसर्गरेफः

इति + एतत् - यण्सन्धिः

तपः + मानसम् - विसर्गउकारः

▶ समासः

भावस्य संशुद्धिः - भावसंशुद्धिः - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥ १७॥

पदच्छेदः

श्रद्धया परया तप्तं तपः तत् त्रिविधं नरैः अफलाकाङ्क्षिभिः युक्तैः सात्त्विकं परिचक्षते

पदपरिचयः

श्रद्धया - आकार स्त्री तृ एक

परया - आकार स्त्री तृ एक

तप्तं - अकार नपु प्र एक

तपः - सकार नपु प्र एक

त्रिविधं - अकार नपु प्र एक

 Downloaded from www.omkaravidya.com 

नरैः - अकार पु तृ बहु

अफलाकाङ्क्षिभिः - नकार पु तृ बहु

युक्तैः - अकार पु तृ बहु

सात्त्विकं - अकार नपु द्वि एक

परिचक्षते - लट् प्रपु बहु

पदार्थः

श्रद्धया - आस्तिक्यबुद्ध्या

परया - प्रकृष्टया

तप्तं - अनुष्ठितम्

तपः - तपः

त्रिविधं - त्रिप्रकारम्

नरैः - अनुष्ठातृभिः

अफलाकाङ्क्षिभिः - फलाकाङ्क्षारहितैः

युक्तैः - समाहितैः

सात्त्विकं -सात्त्विकं

परिचक्षते - कथयन्ति

अन्वयः

अफलाकाङ्क्षिभिः युक्तैः नरैः परया श्रद्धया तप्तं तत् त्रिविधं तपः सात्त्विकं परिचक्षते ।

व्याकरणम्

▶सन्धिः

तपः + तत् - विसर्गसकारः

अफलाकाङ्क्षिभिः + युक्तैः -विसर्गरेफः

 Downloaded from www.omkaravidya.com 

मूलश्लोकः

सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥१८॥

पदच्छेदः
सत्कारमानपूजार्थं तपः दम्भेन च एव यत् क्रियते तत् इह प्रोक्तं राजसं चलमध्रुवम्

पदपरिचयः
सत्कारमानपूजार्थं - अकार नपु प्र एक
तपः  सकार नपु प्र एक
दम्भेन - अकार पु तृ एक
क्रियते - लट् कर्मणि प्रपु एक
प्रोक्तं - अकार नपु प्र एक
राजसं -  अकार नपु प्र एक
चलम् -  अकार नपु प्र एक
अध्रुवम्  - अकार नपु प्र एक

पदार्थः
सत्कारमानपूजार्थ - स्तुतिबहुमानार्चनाथम्
तपः - तप;
दम्भेन - दम्भेन
क्रियते - क्रियते

 Downloaded from www.omkaravidya.com

प्रोक्तं - उक्तम्
राजसं - राजसमं
चलम् - चञ्चलम्
अध्रुवम् - अस्थिरम्

अन्वयः
सत्कारमानपूजार्थं दम्भेन च एव यत् तपः क्रियते चलम् अध्रुवम् तत् इह राजसं प्रोक्तं ।

व्याकरणम्
▶सन्धिः
तपः + दम्भेन - विसर्गउकारः
च + एव - वृद्धिसन्धिः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥ १९॥

पदच्छेदः
मूढग्राहेण आत्मनः यत् पीडया क्रियते तपः परस्य उत्सादनार्थं वा तत् तामसम् उदाहृतम्

[Type here] Downloaded from www.omkaravidya.com [Type here]

पदपरिचयः

मूढग्राहेण -अकार पु तृ एक

आत्मनः - नकार पु ष एक

पीडया - आकार स्त्री तृ एक

क्रियते - लट् कर्मणि प्रपु एक

तपः - अकार नपु प्र एक

परस्य - अकार पु ष एक

उत्सादनार्थं - अव्ययम्

तामसम् - अकार नपु प्र एक

उदाहृतम् - अकार नपु प्र एक

पदार्थः

मूढग्राहेण - अविवेकनिश्चयेन

आत्मनः - स्वस्य

पीडया - बाधया

क्रियते -क्रियते

तपः - तपः

परस्य - इतरस्य

उत्सादनार्थं - विनाशार्थम्

तामसम् - तामसम्

उदाहृतम् - अभिहितम्

अन्वयः

मूढग्राहेण आत्मनः  पीडया परस्य उत्सादनार्थं वा यत् तपः क्रियते तत् तामसम् उदाहृतम् ।


Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

मूढग्राहेण + आत्मनः - सवर्णदीर्घसन्धिः

परस्य + उत्सादनार्थं -गुणसन्धिः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ २०॥

पदच्छेदः

दातव्यम् इति यत् दानं दीयते अनुपकारिणे देशे काले च पात्रे च तत् दानं सात्त्विकं स्मृतम्

पदपरिचयः

दातव्यम् - तव्यरन्तम्

दानं - अकार नपु प्र एक

दीयते - लट् कर्मणि प्रपु एक

अनुपकारिणे - नकार पु च एक

देशे - अकार पु स एक

काले - अकार पु स एक

पात्रे - अकार नपु स एक

दानं - अकार नपु प्र एक

सात्त्विकं - अकार नपु प्र एक

स्मृतम् - अकार नपु प्र एक

[Type here] Downloaded from www.omkaravidya.com [Type here]

पदार्थः

दातव्यम् -देयम्

दानं -दानं

दीयते -दीयते

अनुपकारिणे -प्रत्युपकारासमर्थाय

देशे - पुण्य कुरुक्षेत्रे

काले - योग्यसमये

पात्रे - षडङ्गविद्वेदपारगे

दानं - दानम्

सात्त्विकं - सात्त्विकं

स्मृतम् - प्रोक्तम्

अन्वयः

यत् दानं दातव्यम् इति अनुपकारिणे देशे काले च पात्रे च दीयते तत् दानं सात्त्विकं स्मृतम् ।

व्याकरणम्

▶सन्धिः

दीयते +अनुपकारिणे - पूर्वरूपसन्धिः

 Downloaded from www.omkaravidya.com 

मूलश्लोकः

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥२१॥

पदच्छेदः
यत् तु प्रत्युपकारार्थं फलम् उद्दिश्य वा पुनः दीयते च परिक्लिष्टं तत् दानं राजसं स्मृतम्

पदपरिचयः
प्रत्युपकारार्थं - अकार नपु द्वि एक
फलम् - अकार नपु द्विएक
उद्दिश्य - ल्यबन्तम्
दीयते - लट् कर्मणि प्रपु एक
परिक्लिष्टं - अव्ययम्
दानं - अकार नपु प्र एक
राजसं - - अकार नपु प्र एक
स्मृतम् - अकार नपु प्र एक

पदार्थः
प्रत्युपकारार्थं -प्रत्युपकाराय
फलम् - प्रयोजनम्
उद्दिश्य -उद्दिश्य
दीयते -दीयते


Downloaded from www.omkaravidya.com

परिक्लिष्टं - खेदसंयुक्तम्
दानं - दानं
राजसं - राजसं
स्मृतम् - कथ्यन्ते

अन्वयः
तु यत् दानं प्रत्युपकारार्थं वा फलम् उद्दिश्य परिक्लिष्टं च दीयते तत् दानं राजसं स्मृतम् ।
व्याकरणम्
▶सन्धिः
तत् + दानम् - जश्त्वसन्धिः



मूलश्लोकः

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥२२॥

पदच्छेदः
अदेशकाले यत् दानम् अपात्रेभ्यः च दीयते असत्कृतम् अवज्ञातं तत् तामसम् उदाहृतम्

पदपरिचयः
अदेशकाले - अकार पु स एक

 Downloaded from www.omkaravidya.com

दानम् - अकार नपु प्र एक
अपात्रेभ्यः - अकार नपु च बहु
दीयते - लट् कर्मणि प्रपु एक
असत्कृतम् - अकार नपु प्र एक
अवज्ञातं - अकार नपु प्र एक
तामसम् - अकार नपु प्र एक
उदाहृतम्- अकार नपु प्र एक

पदार्थः
अदेशकाले - अपुण्ये देशे अकाले
दानम् - दानम्
अपात्रेभ्यः - अनर्हेभ्यः
दीयते - दीयते
असत्कृतम् - पूजारहितम्
अवज्ञातं - पात्रपरिभवयुक्तम्
तामसम् - तामसम्
उदाहृतम् - कथितम्

अन्वयः
अदेशकाले अपात्रेभ्यः असत्कृतम् अवज्ञातं यत् दानम्  दीयते तत् तामसम् उदाहृतम् ।

व्याकरणम्
▶सन्धिः
यत् + दानम् - जश्त्वसन्धिः
अपात्रेभ्यः + च - विसर्गसकारः

 Downloaded from www.omkaravidya.com 

मूलश्लोकः

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥२३॥

पदच्छेदः
ओं तत् सत् इति निर्देशः ब्रह्मणः त्रिविधः स्मृतः ब्राह्मणाः तेन वेदाः च यज्ञाः च विहिताः पुरा

पदपरिचयः
निर्देशः - अकार पु प्र एक
ब्रह्मणः - नकार पु ष एक
त्रिविधः - अकार पु प्र एक
स्मृतः अकार पु प्र एक
ब्राह्मणाः - अकार पु प्र बहु
वेदाः- अकार पु प्र बहु
यज्ञाः - अकार पु प्र बहु
विहिताः- अकार पु प्र बहु
पुरा - अव्ययम्

पदार्थः
निर्देशः - निर्देशः
ब्रह्मणः - ब्रह्मण
त्रिविधः - त्रिविधः


Downloaded from www.omkaravidya.com

स्मृतः - चिन्तितः

ब्राह्मणाः -ब्राह्मणाः

वेदाः - चतुर्वेदाः

यज्ञाः - यज्ञाः

विहिताः- निर्मिताः

पुरा - पूर्वम्

अन्वयः

ओं तत् सत् इति ब्राह्मणः त्रिविधः निर्देशः स्मृतः । तेन ब्राह्मणाः वेदाः च यज्ञाः च पुरा विहिताः ।

व्याकरणम्

▶सन्धिः

सत् + इति - जश्त्वसन्धिः

निर्देशः + ब्रह्मणः - विसर्गउकारः

ब्राह्मणाः + तेन - विसर्गसकारः

वेदाः + च - विसर्गसकारः

यज्ञाः + च - विसर्गसकारः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ २४॥

[Type here] Downloaded from www.omkaravidya.com [Type here]

पदच्छेदः

तस्मात् ओम् इति उदाहृत्य यज्ञदानतपःक्रियाः प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्

पदपरिचयः

ओम् - अव्ययम्

उदाहृत्य - ल्यबन्तम्

यज्ञदानतपः क्रियाः - आकार स्त्री द्वि बहु

प्रवर्तन्ते - लट् प्रपु बहु

विधानोक्ताः - आकार स्त्री द्वि बहु

सततं - अव्ययम्

ब्रह्मवादिनाम् - नकार पु ष बहु

पदार्थः

तस्मात् -तस्मात्

ओम् -ओम्

उदाहृत्य - उच्चार्य

यज्ञदानतपःक्रियाः - यज्ञादिस्वरूपाः क्रियाः

प्रवर्तन्ते -प्रवर्तन्ते

विधानोक्ताः - शास्त्रचोदिताः

सततं - सर्वदा

ब्रह्मवादिनाम् - वेदपण्डितानाम्

अन्वयः

तस्मात् ब्रह्मवादिनाम् विधानोक्ताः यज्ञदानतपःक्रियाः ओम् इति उदाहृत्य सततं प्रवर्तन्ते ।

[Type here] Downloaded from www.omkaravidya.com [Type here]

व्याकरणम्

▶सन्धिः

इति + उदाहृत्य - यण्सन्धिः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

तदित्यनभिसन्धाय फलं यज्ञतपः क्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥ २५॥

पदच्छेदः

तत् इति अनभिसन्धाय फलं यज्ञतपः क्रियाः दानक्रियाः च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः

पदपरिचयः

अनभिसन्धाय - लयबन्तम्

फलं - अकार नपु द्वि एक

यज्ञतपः क्रियाः - आकार स्त्री प्र बहु

दानक्रियाः आकार स्त्री प्र बहु

विविधाः- आकार स्त्री प्र बहु

क्रियन्ते - लट् कर्मणि प्रपु बहु

मोक्षकाङ्क्षिभिः - नकार पु तृ बहु

[Type here] Downloaded from www.omkaravidya.com [Type here]

पदार्थः

अनभिसन्धाय -अनपेक्ष्य

फलं - प्रयोजनम्

यज्ञतपः क्रियाः -यज्ञतपः क्रियाः

दानक्रियाः -दानक्रियाः

विविधाः - अनेकाः

क्रियन्ते - निर्वर्त्यन्ते

मोक्षकाङ्क्षिभिः - मुमुक्षुभिः

अन्वयः

मोक्षकाङ्क्षिभिः तत् इति फलं अनभिसन्धाय विविधाः यज्ञतपःक्रियाः दानक्रियाः च क्रियन्ते ।

व्याकरणम्

▶सन्धिः

तत् + इति - जश्त्वसन्धिः

इति + अनभिसन्धाय - यण्सन्धिः

दानक्रियाः + च - विसर्गसकारः

▶ समासः

यज्ञक्रियाः च तपः क्रियाः - यज्ञतपःक्रियाः - इतरेतरद्वन्द्वसमासः

[Type here] Downloaded from www.omkaravidya.com [Type here]

मूलश्लोकः

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥२६॥

पदच्छेदः
सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते

पदपरिचयः
सद्भावे - अकार पु स एक
साधुभावे - अकार पु स एक
सत् - तकार नपु प्र एक
प्रयुज्यते - लट् कर्मणि प्रपु एक
प्रशस्ते - अकार नपु स एक
कर्मणि- नकार नपु स एक
सच्छब्दः - अकार पु प्र एक
पार्थ - अकार पु सं प्र
युज्यते  लट् कर्मणि प्रपु एक

पदार्थः
सद्भावे - सद्भावे
साधुभावे - श्रेष्ठत्वे
सत् - सत्

[Type here] Downloaded from www.omkaravidya.com [Type here]

प्रयुज्यते - अभिधीयते
प्रशस्ते कर्मणि - विवाहादौ
सच्छब्दः - सच्छब्दः
पार्थ - अर्जुन
युज्यते - कथ्यते

अन्वयः
हे पार्थ ! सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते तथा प्रशस्ते कर्मणि सच्छब्दः युज्यते ।

व्याकरणम्
▶सन्धिः
सत् + इति - जश्त्वसन्धिः
इति + एतत् - यण्सन्धिः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥२७॥

पदच्छेदः
यज्ञे तपसि दाने च स्थितिः सदिति च उच्यते कर्म च एव तदर्थीयं सत् इति एव अभिधीयते

[Type here] Downloaded from www.omkaravidya.com [Type here]

पदपरिचयः

यज्ञे - अकार पु स एक

तपसि - सकार नपु स एक

दाने - अकार नपु स एक

स्थितिः - इकार स्त्री प्र एक

सत् -दकार नपु प्र एक

उच्यते - लट् कर्मणि प्रपु एक

कर्म - नकार नपु प्र एक

तदर्थीयं - अकार नपु प्र एक

सत् - दकार नपु प्र एक

अभिधीयते - लट् कर्मणि प्रपु एक

पदार्थः

यज्ञे - यागे

तपसि - तपसि

दाने - दाने

स्थितिः - अवस्थानम्

सत् - सत्

उच्यते - कथ्यते

कर्म - कर्म

तदर्थीयं - ईश्वरार्थीयम्

सत् - सत्

अभिधीयते - प्रोच्यते


Downloaded from www.omkaravidya.com

अन्वयः

यज्ञे तपसि दाने च स्थितिः सत् इति उच्यते । तदर्थीयं कर्म च एव सत् इति एव अभिधीयते ।

व्याकरणम्

▶सन्धिः

सत् + इति -जश्त्वसन्धिः

च + उच्यते - गुणसन्धिः

च + एव - वृद्धिसन्धिः

सत् + इति - जश्त्वसन्धिः

इति + एव - यण्सन्धिः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह ॥ २८॥

पदच्छेदः

अश्रद्धया हुतं दत्तं तपः तप्तं कृतं च यत् असत् इति उच्यते पार्थ न च तत् प्रेत्य न उ इह

पदपरिचयः

अश्रद्धया - आकार स्त्री तृ एक

[Type here] Downloaded from www.omkaravidya.com [Type here]

हुतं - अकार नपु प्र एक

दत्तं - अकार नपु प्र एक

तपः - सकार नपु प्र एक

तप्तं - अकार नपु प्र एक

कृतं अकार नपु प्र एक

असत् - दकार नपु प्र एक

उच्यते - लट् कर्मणि प्रपु एक

पार्थ - अकार नपु सं प्र

प्रेत्य - ल्यबन्तम्

पदार्थः

अश्रद्धया -अनाशक्त्या

हुतं - हवनम्

दत्तं - वितीर्णम्

तपः - तपः

तप्तं - निर्वर्तितम्

कृतं - कृतं

असत् - असत्

उच्यते - कथ्यते

पार्थ - अर्जुन

प्रेत्य - लोकान्तरे

अन्वयः

हे पार्थ ! अश्रद्धया यत् हुतं दत्तं तपः तप्तं च कृतं असत् इति उच्यते ।तत् च न प्रेत्य न उ इह ।

[Type here] Downloaded from www.omkaravidya.com [Type here]

व्याकरणम्

▶सन्धिः

तपः+ तप्तं - विसर्गसकारः

असत् + इति - जश्त्वसन्धिः

इति + उच्यते - यण्सन्धिः

▶ कृदन्ताः

प्रेत्य - प्र + इण् + ल्यप् प्रत्ययः

श्रीमद्भगवद्गीता - सप्तदशोऽध्यायः - श्रद्धात्रयविभागयोगः

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ॥ 17॥

पदच्छेदः

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगः नाम सप्तदशः अध्यायः

पदपरिचयः

ॐ - अव् धातुः + मन् प्रत्ययः

तत् - दकार. नपु. पु एक

सत् - दकार. नपु. प्र एक

[Type here] Downloaded from www.omkaravidya.com [Type here]

इति - अव्ययम्

श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु

उपनिषत्सु - दकार. स्त्री स बहु

ब्रह्मविद्यायां - आकार. स्त्री स एक

योगशास्त्रे - अकार. नपु. स. एक

श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक

श्रद्धात्रयविभागयोगः- अकार. पु. प्र. एक

नाम - नकार.नपु. प्र एक

सप्तदशः - अकार. पु. प्र एक

अध्यायः - अकार. पु. प्र एक

पदार्थः

ॐ - ओम्

तत् - तत्

सत् - सत्

इति - एवम्

श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु

उपनिषत्सु - उपनिषत्सु

ब्रह्मविद्यायां - ब्रह्म पाठे

योगशास्त्रे - योगशास्त्रे

श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयोः मध्ये संवादे

श्रद्धात्रयविभागयोगः - श्रद्धात्रयविभागयोगः

नाम - नाम

सप्तदशः - सप्तदशः

अध्यायः - अध्यायः

[Type here] Downloaded from www.omkaravidya.com [Type here]

अन्वयः

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगः नाम सप्तदशः अध्यायः (संपूर्णम् भवति) ।

व्याकरणम्

▶सन्धिः

श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः

योगः + नाम - विसर्ग उकारः

सप्तदशः + अध्यायः - विसर्ग उकारः पूर्वरूपसन्धिः

▶ समासः

ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारयः

 Downloaded from www.omkaravidya.com 

# श्रीमद्भगवद्गीता
# अष्टादशोऽध्यायः
# मोक्षसंन्यासयोगः

Downloaded from www.omkaravidya.com

## श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

अर्जुन उवाच
सन्न्यासस्य महावाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥ १॥

पदच्छेदः
अर्जुन उवाच सन्न्यासस्य महावाहो तत्त्वम् इच्छामि वेदितुम् त्यागस्य च हृषीकेश पृथक् केशिनिषूदन

पदपरिचयः
सन्न्यासस्य - अकार पु ष एक
महावाहो - उकार पु सं प्र
तत्त्वम् - अकार नपु द्वि एक
इच्छामि - लट् उपु एक
वेदितुम् - तुमुनन्तम्
त्यागस्य- अकार पु ष एक
हृषीकेश - अकार पु सं प्र
पृथक् - अव्ययम्
केशिनिषूदन - अकार पु सं प्र

पदार्थः
सन्न्यासस्य- सन्न्यासस्य

Downloaded from www.omkaravidya.com

महावाहो - कृष्ण
तत्त्वम् -तस्य भावः
इच्छामि - अभिलषामि
वेदितुम् - ज्ञातुम्
त्यागस्य - त्यागशब्दार्थस्य
हृषीकेश - कृष्ण
पृथक् - पृथक्
केशिनिषूदन - कृष्ण

अन्वयः
हे हृषीकेश ! हे केशिनिषूदन ! हे महावाहो सन्न्यासस्य त्यागस्य च तत्त्वम् पृथक् वेदितुम् इच्छामि ।

व्याकरणम्
▶समासः
केशिनं निषूदति- केशिनिषूदनः - उपपदसमासः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः
श्री भगवानुवाच
काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २॥

पदच्छेदः

Downloaded from www.omkaravidya.com

काम्यानां कर्मणां न्यासं संन्यासं कवयः विदुः सर्वकर्मफलत्यागं प्राहुः त्यागं विचक्षणाः

पदपरिचयः
काम्यानां - अकार नपु ष बहु
कर्मणां - नकार नपु ष बहु
न्यासं - अकार पु द्वि एक
संन्यासं - अकार पु द्वि एक
कवयः - इकार पु प्र बहु
विदुः लट् प्रपु बहु
सर्वकर्मफलत्यागं - अकार पु द्वि एक
प्राहुः - लट् प्रपु बहु
त्यागं - अकार पु द्वि एक
विचक्षणाः - अकार पु प्र बहु

पदार्थः
काम्यानां - अश्वमेधादीनाम्
कर्मणां -क्रियाणां
न्यासं - परित्यागम्
न्यासं -संन्यासशब्दार्थम्
कवयः - पण्डिताः
विदुः - जानन्ति
सर्वकर्मफलत्यागं - सकलकर्मप्रयोजनपरित्यागं
प्राहुः - वदन्ति
त्यागं - त्यागम्
विचक्षणाः - पण्डिताः

Downloaded from www.omkaravidya.com

अन्वयः

श्री भगवानुवाच

कवयः काम्यानां कर्मणां न्यासं संन्यासं विदुः । विचक्षणाः सर्वकर्मफलत्यागं त्यागं (इति) प्राहुः ।

व्याकरणम्

▶सन्धिः

कवयः + विदुः - विसर्गउकारः

प्राहुः + त्यागम् - विसर्गसकारः

▶ समासः

फलस्य त्यागः - फलत्यागः - षष्ठीतत्पुरुषः

सर्वकर्मणां फलत्यागः षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ ३॥

पदच्छेदः

त्याज्यं दोषवत् इति एके कर्म प्राहुः मनीषिणः यज्ञदानतपः कर्म न त्याज्यम् इति च अपरे

Downloaded from www.omkaravidya.com

पदपरिचयः

त्याज्यं - अकार नपु द्वि एक

दोषवत् - तकार नपु द्वि एक

एके - अकार पु प्र बहु

कर्म - नकार नपु द्वि एक

प्राहुः - लट् प्रपु बहु

मनीषिणः - नकार पु प्र बहु

यज्ञदानतपःकर्म - नकार नपु द्वि एक

त्याज्यम् - अकार नपु द्वि एक

अपरे - अकार पु प्र बहु

पदार्थः

त्याज्यं - त्यक्तव्यम्

दोषवत् - दोषसहितम्

एके - एके

कर्म - कर्म

प्राहुः - वदन्ति

मनीषिणः - पण्डिताः

यज्ञदानतपःकर्म -यागवितरणतपःकर्म

त्याज्यम् - त्यक्तव्यम्

अपरे - अन्ये

अन्वयः

एके मनीषिणः दोषवत् कर्म त्याज्यं इति प्राहुः । अपरे यज्ञदानतपःकर्म न त्याज्यम् इति च (प्राहुः) ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

दोषवत् + इति - जश्त्वसन्धिः

इति + एके - यण्सन्धिः

प्राहुः + मनीषिणः - विसर्गरेफः

च + अपरे - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

निश्चयं श्रृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः ॥४॥

पदच्छेदः

निश्चयं श्रृणु मे तत्र त्यागे भरतसत्तम त्यागः हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः

पदपरिचयः

निश्चयं - अकार पु द्वि एक

श्रृणु - लोट् मपु एक

त्यागे - अकार पु स एक

भरतसत्तम - अकार पु सं प्र

Downloaded from www.omkaravidya.com

त्यागः - अकार पु प्र एक
पुरुषव्याघ्र - अकार पु सं प्र
त्रिविधः - अकार पु प्र एक
सम्प्रकीर्तितः - अकार पु प्र एक

पदार्थः
निश्चयं - निर्धारणम्
श्रृणु - अवधारय
त्यागे -त्यागे
भरतसत्तम - भरतानां साधुतम !
त्यागे - त्यागे
पुरुषव्याघ्र - हे अर्जुन
त्रिविधः - त्रिप्रकारः
सम्प्रकीर्तितः - शासत्रेषु सम्यक् उक्तः

अन्वयः
हे भरतसत्तम ! तत्र त्यागे मे निश्चयं श्रृणु । हे पुरुषव्याघ्र! त्यागः हि त्रिविधः सम्प्रकीर्तितः ।

व्याकरणम्
▶सन्धिः
त्यागः + हे - विसर्गउकारः

▶ समासः
भरतसत्तमः - भरतानां सत्तमः - षष्ठीतत्पुरुषः
पुरुषव्याघ्रः - पुरुषेषु व्याघ्रः - सप्तमीतत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ ५॥

पदच्छेदः
यज्ञदानतपः कर्म न त्याज्यं कार्यम् एव तत् यज्ञः दानं तपः च एव पावनानि मनीषिणाम्

पदपरिचयः
यज्ञदानतपः कर्म - नकार नपु प्र एक
त्याज्यं - अकार नपु प्र एक
कार्यम् - अकार नपु प्र एक
यज्ञः - अकार पु प्र एक
दानं - अकार नपु प्र एक
तपः - सकार नपु प्र एक
पावनानि - अकार नपु प्र बहु
मनीषिणाम् - नकार पु ष बहु

पदार्थः
यज्ञदानतपः कर्म - त्रिविधं कर्म

Downloaded from www.omkaravidya.com

त्याज्यं - त्यक्तव्यम्
कार्यम् - करणीयम्
यज्ञ:- यागः
दानं - दानम्
तपः - व्रतम्
पावनानि - विशुद्धिकारणानि
मनीषिणाम् - विवेकिनाम्

अन्वयः
यज्ञदानतपः कर्म न त्याज्यं तत् कार्यम् एव । यज्ञः दानं तपः च  मनीषिणाम् पावनानि एव।

व्याकरणम्
▶सन्धिः
यज्ञः + दानं - विसर्गउकारः
तपः + च - विसर्गसकारः
च + एव - वृद्धिसन्धिः

श्रीमद्भगवद्गीता  - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥६॥

पदच्छेदः

Downloaded from www.omkaravidya.com

एतानि अपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च कर्तव्यानि इति मे पार्थ निश्चितं मतम् उत्तमम्

पदपरिचयः
कर्माणि - अकार नपु प्र वहु
सङ्गं - अकार पु द्वि एक
त्यक्त्वा - क्त्वान्तम्
फलानि - अकार नपु द्वि बहु
कर्तव्यानि -अकार नपु प्र बहु
पार्थ - अकार पु सं प्र
निश्चितं - अकार नपु प्र एक
मतम् - अकार नपु प्र एक
उत्तमम् - अकार नपु प्र एक

पदार्थः
कर्माणि - यज्ञदानतपांसि
सङ्गं - आसक्तिं
त्यक्त्वा - परित्यज्य
फलानि - प्रयोजनानि
कर्तव्यानि - अनुष्ठेयानि
पार्थ - अर्जुन !
निश्चितं - निर्णीतम्
मतम् - मतम्
उत्तमम् - उत्कृष्टम्

अन्वयः

Downloaded from www.omkaravidya.com

हे पार्थ! एतानि अपि तु कर्माणि सङ्गं फलानि च त्यक्त्वा कर्तव्यानि इति मे निश्चितं उत्तमम् मतम् ।

व्याकरणम्

▶सन्धिः

एतानि + अपि - यण्सन्धिः

कर्तव्यानि + इति - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ 7॥

पदच्छेदः

नियतस्य तु सन्न्यासः कर्मणः न उपपद्यते मोहात् तस्य परित्यागः तामसः परिकीर्तितः

पदपरिचयः

नियतस्य - अकार नपु ष एक

सन्न्यासः - अकार पु प्र एक

कर्मणः -नकार नपु ष एक

उपपद्यते - लट् प्रपु एक

मोहात् - अकार पु प एक

परित्यागः - अकार पु प्र एक

Downloaded from www.omkaravidya.com

तामसः - अकार पु प्र एक
परिकीर्तितः - अकार पु प्र एक

पदार्थः
नियतस्य - नित्यस्य
सन्न्यासः - परित्यागः
कर्मणः - कर्मणः
उपपद्यते -युज्यते
मोहात् - अज्ञानात्
परित्यागः - परित्यागः
तामसः -तामसः
परिकीर्तितः - उक्तः

अन्वयः
तु नियतस्य कर्मणः सन्न्यासः न उपपद्यते । मोहात् तस्य परित्यागः तामसः परिकीर्तितः ।

व्याकरणम्
▶सन्धिः
कर्मणः + न - विसर्गउकारः
न + उपपद्यते - गुणसन्धिः
परित्यागः + तामसः - विसर्गसकारः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

Downloaded from www.omkaravidya.com

दु:खमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥ ८॥

पदच्छेदः
दु:खम् इति एव यत् कर्म कायक्लेशभयात् त्यजेत् सः कृत्वा राजसं त्यागं न एव त्यागफलं लभेत्

पदपरिचयः
दु:खम् - अकार नपु द्वि एक
कर्म - नकार नपु द्वि एक
कायक्लेशभयात् - अकार नपु प एक
त्यजेत् - विधि प्रपु एक
कृत्वा - क्त्वान्तम्
राजसं - अकार पु द्वि एक
त्यागं - अकार पु द्वि एक
त्यागफलं - अकार नपु द्वि एक
लभेत् - लट् प्रपु एक

पदार्थः
दु:खम् - दुः खम्
कर्म - कर्म
कायक्लेशभयात् - शरीरदु:खभयात्
त्यजेत् - परित्यजेत्
कृत्वा - कृत्वा
राजसं - रजोनिर्वृत्तम्

Downloaded from www.omkaravidya.com

त्यागं - त्यागम्

त्यागफलं - त्यागफलं

लभेत् – प्राप्नुयात्

अन्वयः

(यः) यत् कर्म कायक्लेशभयात् दुःखम् इति एव त्यजेत् सः राजसं त्यागं कृत्वा त्यागफलं न एव लभेत् ।

व्याकरणम्

▶सन्धिः

इति + एव - यण्सन्धिः

सः + कृत्वा - विसर्गलोपः

न + एव - वृद्धिसन्धिः

▶ समासः

कायस्य क्लेशम् - षष्ठीतत्पुरुषः

कायक्लेशात् भयम् - पञ्चमीतत्पुरुषः - तस्मात्

त्यागस्य फलम् - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः ॥ ९॥

पदच्छेदः

Downloaded from www.omkaravidya.com

कार्यम् इति एव यत् कर्म नियतं क्रियते अर्जुन सङ्गं त्यक्त्वा फलं  च एव सः त्यागः सात्विकः मतः

पदपरिचयः
कार्यम् - अकार नपु प्र एक
कर्म - नकार नपु प्र एक
नियतं- अकार नपु प्र एक
क्रियते - लट् कर्मणि प्रपु एक
अर्जुन - अकार पु सं प्र
सङ्गं - अकार पु द्वि एक
त्यक्त्वा - क्त्वान्तम्
फलं - अकार नपु द्वि एक
त्यागः - अकार पु प्र एक
सात्विकः - अकार पु प्र एक
मतः - अकार नपु प्र एक

पदार्थः
कार्यम् - कर्तव्यम्
कर्म - कर्म
नियतं - नित्यम्
क्रियते - निर्वर्त्यते
अर्जुन - पार्थ
सङ्गं - अभिमानम्
त्यक्त्वा - परित्यज्य
फलं - प्रयोजनम्
त्यागः - त्यागः

Downloaded from www.omkaravidya.com

सात्विक: -सत्त्वनिर्वृत्त:
मत: - अभिमत:

अन्वयः
हे अर्जुन! कार्यं इति एव यत् नियतं कर्म सङ्गं फलं च त्यक्त्वा क्रियते स: त्याग: सात्विक: मत: ।

व्याकरणम्
▶सन्धिः
इति + एव - यण्सन्धि:
क्रियते + अर्जुन - पूर्वरूपसन्धि:
च + एव - वृद्धिसन्धि:
स: + त्याग: - विसर्गलोप:
सात्त्विक: + मत: - विसर्गउकार:
▶ कृदन्ता:
त्यक्त्वा - त्यज् + क्त्वा प्रत्यय:

श्रीमद्भगवद्गीता - अष्टादशोऽध्याय: - मोक्षसंन्यासयोग:

मूलश्लोकः

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशय: ॥१०॥

पदच्छेदः

Downloaded from www.omkaravidya.com

न द्वेष्टि अकुशलं कर्म कुशले न अनुषज्जते त्यागी सत्त्वसमाविष्टः मेधावी छिन्नसंशयः

पदपरिचयः
द्वेष्टि - लट् प्रपु एक
अकुशलं - अकार नपु द्वि एक
कर्म - नकार नपु द्वि एक
कुशले - अकार नपु स एक
अनुषज्जते - लट् प्रपु एक
त्यागी - नकार पु प्र एक
सत्त्वसमाविष्टः - अकार पु प्र एक
मेधावी - नकार पु प्र एक
छिन्नसंशयः - अकार पु प्र एक

पदार्थः
द्वेष्टि -द्वेष्टि
अकुशलं - अशोभनम्
कर्म - कर्म
कुशले - शोभने
अनुषज्जते - प्रीतिं करोति
त्यागी - त्यागी
सत्त्वसमाविष्टः - सत्त्वसमाविष्टः
मेधावी - विवेकी
छिन्नसंशयः - संशयरहितः

Downloaded from www.omkaravidya.com

अन्वयः
सत्त्वसमाविष्टः मेधावी छिन्नसंशयः त्यागी अकुशलं कर्म न द्वेष्टि । कुशले न अनुषज्जते ।

व्याकरणम्
▶सन्धिः
द्वेष्टि + अकुशलं - यण्सन्धिः
न +अनुषज्जते - सवर्णदीर्घसन्धिः
सत्त्वसमाविष्टः + मेधावी - विसर्गउकारः

▶ समासः
सत्त्वेन समाविष्टः - सत्त्वसमाविष्टः- तृतीयातत्पुरुषः
छिन्नः संशयः यस्य सः छिन्नसंशयः - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

न हि देहभृता शक्यं त्यक्तुं कर्मण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११॥

पदच्छेदः
न हि देहभृता शक्यं त्यक्तुं कर्माणि अशेषतः यः तु कर्मफलत्यागी सः त्यागी इति अभिधीयते

पदपरिचयः

Downloaded from www.omkaravidya.com

देहभृता - तकार पु तृ एक
शक्यं - अकार नपु प्रएक
त्यक्तुं - तुमुनन्तम्
कर्माणि - अकार नपु द्वि बहु
अशेषतः - अव्ययम्
कर्मफलत्यागी - नकार पु प्र एक
त्यागी - नकार पु प्र एक
अभिधीयते - लट् कर्मणि प्रपु एक

पदार्थः
देहभृता - शरीरधारिणा
शक्यं - साध्यम्
त्यक्तुं - सन्नयसितुम्
कर्माणि -कर्माणि
अशेषतः - शेषरहितः
कर्मफलत्यागी - कर्मप्रयोजनपरित्यागी
त्यागी - त्यागी
अभिधीयते -कथ्यते

अन्वयः
देहभृता कर्माणि अशेषतः त्यक्तुं न शक्यं । यः तु कर्मफलत्यागी सः त्यागी इति अभिधीयते ।

व्याकरणम्
▶सन्धिः
कर्माणि + अशेषतः - यण्सन्धिः

Downloaded from www.omkaravidya.com

यः + तु - विर्गसकारः
सः + त्यागी - विसर्गलोपः
त्यागी + इति - सवर्णदीर्घसन्धिः
इति + अभिधीयते - यण्सन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥१२॥

पदच्छेदः
अनिष्टम् इष्टं मिश्रं च त्रिविधं कर्मणः फलम् भवति अत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्

पदपरिचयः
अनिष्टम् - अकार नपु प्र एक
इष्टं - अकार नपु प्र एक
मिश्रं - अकार नपु प्र एक
त्रिविधं- अकार नपु प्र एक
कर्मणः - नकार नपु ष एक
फलम्- अकार नपु प्र एक
भवति - लट् प्रपु एक
अत्यागिनां - अकार नपु ष बहु

Downloaded from www.omkaravidya.com

प्रेत्य - ल्यबन्तम्
सन्न्यासिनां - नकार पु ष बहु
क्वचित् - अव्ययम्

पदार्थः
अनिष्टम्- नरकतिर्यगादिलक्षणम्
इष्टं - देवादिलक्षणम्
मिश्रं - इष्टानिष्टसंयुक्तं
त्रिविधं - त्रिप्रकारम्
कर्मणः - कर्मणः
फलम् - प्रयोजनम्
भवति - लभते
अत्यागिनां - अज्ञानाम्
प्रेत्य - मरणान्तरम्
सन्न्यासिनां - परमहंसपरिव्राजकानाम्
क्वचित् - कदापि

अन्वयः
अनिष्टम् इष्टं मिश्रं च त्रिविधं कर्मणः फलम् अत्यागिनां प्रेत्य भवति ।
सन्न्यासिनां तु क्वचित् न (भवति) ।

व्याकरणम्
▶सन्धिः
अवति + अत्यागिनाम् - यण्सन्धिः

▶ समासः
न इष्टम् - अनिष्टम् - नञ् तत्पुरुषः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

पञ्चैतानि महाबाहो कारणानि निबोध मे ।
साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३॥

पदच्छेदः
पञ्च एतानि महाबाहो कारणानि निबोध मे साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्

पदपरिचयः
पञ्च - अकार नपु द्वि बहु
एतानि - अकार नपु द्वि बहु
महाबाहो - उकार पु सं प्र
कारणानि - अकार नपु द्वि बहु
निबोध - लोट् मपु एक
साङ्ख्ये - अकार नपु स एक
कृतान्ते - अकार पु स एक
प्रोक्तानि - अकार नपु द्वि बहु
सिद्धये - इकार स्त्री च एक
सर्वकर्मणाम् - नकार नपु ष बहु

Downloaded from www.omkaravidya.com

पदार्थः

पञ्च - पञ्च

एतानि - इमानि

महाबाहो - अर्जुन!

कारणानि - निर्वर्तकानि

निबोध - जानीहि

साङ्ख्ये - वेदान्तशास्त्रे

कृतान्ते - कर्मसमाप्तिविशेष्टे

प्रोक्तानि - निर्दिष्टानि

सिद्धये -प्राप्तये

सर्वकर्मणाम् - सकलकर्माणम्

अन्वयः

हे महाबाहो ! सर्वकर्मणाम् सिद्धये साङ्ख्ये कृतान्ते प्रोक्तानि एतानि पञ्च कारणानि मे  निबोध ।

व्याकरणम्

▶सन्धिः

पञ्च + एतानि - वृद्धिसन्धिः

▶ कृदन्ताः

प्रोक्तानि - प्र + वच् + क्त प्रत्ययः



Downloaded from www.omkaravidya.com

मूलश्लोकः

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥ १४॥

पदच्छेदः

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् विविधाः च  पृथक् चेष्टाः दैवं च एव अत्र पञ्चमम्

पदपरिचयः

अधिष्ठानं - अकार नपु प्र एक
कर्ता - ऋकार पु प्र एक
करणं - अकार नपु प्र एक
पृथग्विधम्  - अकार नपु प्र एक
विविधाः - आकार स्त्री प्र बहु
पृथक् - अव्ययम्
चेष्टाः आकार स्त्री प्र बहु
दैवं - अकार नपु प्र एक
पञ्चमम् - अकार नपु प्र एक

पदार्थः

अधिष्ठानं - शरीरम्
कर्ता - उपाधिलक्षणः भोक्ता
करणं - इन्द्रियम्
पृथग्क् - विशिष्टा
विधम् - विधम्
विविधाः - नानाप्रकारः

Downloaded from www.omkaravidya.com

चेष्टा :-चेष्टा;
दैवं - दैवम्
पञ्चमम् - पञ्चमम्

अन्वयः
अधिष्ठानं तथा कर्ता पृथग्विधम् करणं च विविधाः पृथक् चेष्टाः च अत्र दैवं च एव पञ्चमम् ।

व्याकरणम्
▶सन्धिः
विविधाः + च - विसर्गसकारः
च + एव - वृद्धिसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥१५॥

पदच्छेदः
शरीरवाङ्मनोभिः यत् कर्म प्रारभते नरः न्याय्यं वा विपरीतं वा पञ्च एते तस्य हेतवः

पदपरिचयः
शरीरवाङ्मनोभिः सकार नपु तृ बहु
कर्म - नकार नपु द्वि एक

Downloaded from www.omkaravidya.com

प्रारभते - लट् प्रपु एक

नरः - अकार पु प्र एक

न्याय्यं - अकार पु द्वि एक

विपरीतं - अकार नपु द्वि एक

पञ्च - नकार त्रि प्र बहु

हेतवः - उकार पु प्र बहु

पदार्थः

शरीरवाङ्मनोभिः - कायवाक्चित्तैः

कर्म - क्रिया

प्रारभते - निर्वर्तयति

नरः - पुरुषः

न्याय्यं - धर्म्यम्

विपरीतं - अधर्म्यम्

पञ्च - पञ्च

हेतवः - कारणानि

अन्वयः

नरः शरीरवाङ्मनोभिः न्याय्यं वा विपरीतं वा यत् कर्म प्रारभते तस्य एते पञ्च हेतवः ।

व्याकरणम्

▶सन्धिः

शरीरवाङ्मनोभिः + यत् - विसर्गरेफः

पञ्च + एते - वृद्धिसन्धिः

▶ समासः

Downloaded from www.omkaravidya.com

शरीरं च वाक् च मनस् च - शरीरवाङ्मनांसि - इतरेतरद्वन्द्वसमासः - तैः शरीरवाङ्मनोभिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न सः पश्यति दुर्मतिः ॥१६॥

पदच्छेदः
तत्र एवं सति कर्तारम् आत्मानं केवलं तु यः पश्यति अकृतबुद्धित्वात् न सः पश्यति दुर्मतिः

पदपरिचयः
सति - तकार नपु स एक
कर्तारम् - ऋकार पु द्वि एक
आत्मानं - नकार पु द्वि एक
पश्यति - लट् प्रपु एक
अकृतबुद्धित्वात् - तकार नपु प एक
पश्यति - लट् प्रपु एक
दुर्मतिः - इकार पु प्र एक

पदार्थः
कर्तारम् - कर्तारम्
आत्मानं - आत्मानं

Downloaded from www.omkaravidya.com

केवलं - केवलम्
पश्यति - जानाति
अकृतबुद्धित्वात् - विवेकरहितबुद्धेः
पश्यति - जानाति
दुर्मतिः दुर्बुद्धिः

अन्वयः
तत्र एवं सति तु यः  अकृतबुद्धित्वात् आत्मानं केवलं कर्तारम् (इति) पश्यति स; दुर्मतिः न पश्यति ।

व्याकरणम्
▶सन्धिः
तत्र + एवम् - वृद्धिसन्धिः
पश्यति + अकृतबुद्धित्वात् - यण्सन्धिः
अकृतबुद्धित्वात् + न - अनुनासिकासन्धिः

श्रीमद्भगवद्गीता  अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमांल्लोकान्न हन्ति न निबध्यते ॥ १७॥

पदच्छेदः

Downloaded from www.omkaravidya.com

यस्य न अहङ्कृतः भावः बुद्धिः यस्य न लिप्यते हत्वा अपि स इमान् लोकान् न हन्ति न निबध्यते

पदपरिचयः

अहङ्कृतः - अकार पु प्र एक

भावः - अकार पु प्र एक

बुद्धिः -इकार स्त्री प्रपु एक

लिप्यते - लट् प्रपु बहु

हत्वा - क्त्वान्तम्

इमान् - मकार पु द्वि बहु

लोकान् - अकार पु द्वि बहु

हन्ति - लट् प्रपु बहु

निबध्यते - लट् कर्मणि प्रपु एक

पदार्थः

अहङ्कृतः - अहं कर्ता इति भावः

भावः - भावना

बुद्धिः - अन्तः करणम्

लिप्यते - अनुशायिनी भवति

हत्वा - विनाश्य

लोकान् - प्राणिनः

हन्ति - नाशयति

निबध्यते - सम्बध्यते

अन्वयः

Downloaded from www.omkaravidya.com

यस्य अहङ्कृतः भावः न ,यस्य बुद्धिः  न लिप्यते सः  इमान् लोकान् हत्वा अपि स न हन्ति न निबध्यते ।

व्याकरणम्

▶सन्धिः

न + अहङ्कृतः - सवर्णदीर्घसन्धिः

अहङ्कृतः + भावः - विसर्गउकारः

भावः + बुद्धिः - विसर्गउकारः

बुद्धिः + यस्य - विसर्गरेफः

हत्वा + अपि - सवर्णदीर्घसन्धिः

इमान् + लोकान् - अनुनासिकासन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः ॥१८॥

पदच्छेदः

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना करणं कर्म कर्ता इति त्रिविधः कर्मसङ्ग्रहः

पदपरिचयः

ज्ञानं - अकार नपु प्र एक

Downloaded from www.omkaravidya.com

ज्ञेयं - अकार नपु प्र एक

परिज्ञाता - ऋकार पु प्र एक

त्रिविधा - आकार स्त्री प्र एक

कर्मचोदना - आकार स्त्री प्र एक

करणं - अकार नपु प्र एक

कर्म - नकार नपु प्र एक

कर्ता - ऋकार पु प्र एक

त्रिविधः - अकार पु प्र एक

कर्मसङ्ग्रहः - अकार पु प्र एक

पदार्थः

ज्ञानं - सर्व विषयज्ञानम्

ज्ञेयं - ज्ञातव्यम्

परिज्ञाता - ज्ञानाश्रयः

त्रिविधा - त्रिप्रकारा

कर्मचोदना - कर्मप्रवर्तना

करणं - बाह्यकरणम्

कर्म - कर्म

कर्ता - आचरिता

त्रिविधः - त्रिप्रकारः

कर्मसङ्ग्रहः - कर्मप्रकारः

अन्वयः

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना करणं कर्म कर्त इति त्रिविधः कर्मसङ्ग्रहः ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

कर्ता + इति - गुणसन्धिः

▶ समासः

कर्मणः सङ्ग्रहः कर्मसङ्ग्रहः - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदत : ।
प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि ॥१८॥

पदच्छेदः

ज्ञानं कर्म च कर्ता च त्रिधा एव गुणभेदत : प्रोच्यते गुणसङ्ख्याने यथावत् श्रुणु तानि अपि

पदपरिचयः

ज्ञानं - अकार नपु प्र एक

कर्म - नकार नपु प्र एक

कर्ता - ऋकार पु प्र एक

त्रिधा - अव्ययम्

गुणभेदतः - अव्ययम्

प्रोच्यते - लट् कर्मणि प्रपु एक

गुणसङ्ख्याने - अकार नपु स एक

श्रुणु - लोट् मपु एक

Downloaded from www.omkaravidya.com

पदार्थः

ज्ञानं - ज्ञानम्

कर्म - कर्म

कर्ता - कर्ता

त्रिधा - त्रिप्रकारः

गुणभेदतः - गुणभेदतः

प्रोच्यते - कथ्यते

गुणसङ्ख्याने - गुणसङ्ख्याने

श्रृणु - आकर्ण्य

अन्वयः

गुणसङ्ख्याने ज्ञानं कर्म च कर्ता च गुणभेदतः त्रिधा एव प्रोच्यते । तानि अपि यथावत् श्रृणु ।

व्याकरणम्

▶सन्धिः

त्रिधा + एव - वृद्धिसन्धिः

यथावत् + श्रृणु - श्चुत्वसन्धिः छत्वसन्धिः

तानि + अपि - यण्सन्धिः

▶ समासः

गुणानां भेदः गुणभेदः - षष्ठीतत्पुरुषः - तस्मात्

गुणानां सङ्ख्यानः- षष्ठीतत्पुरुषः



Downloaded from www.omkaravidya.com

मूलश्लोकः

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकम् ॥२०॥

पदच्छेदः
सर्वभूतेषु येन एकं भावम् अव्ययम् ईक्षते अविभक्तं विभक्तेषु तत् ज्ञानं विद्धि सात्विकम्

पदपरिचयः
सर्वभूतेषु - अकार पु स बहु
एकं - अकार पु द्वि एक
भावम् - अकार पु द्वि एक
अव्ययम् - अकार पु द्वि एक
ईक्षते - लट् प्रपु एक
अविभक्तं - अकार पु द्वि एक
विभक्तेषु - अकार पु स बहु
ज्ञानं - अकार नपु द्वि एक
विद्धि - लोट् मपु एक
सात्विकम् - अकार नपु द्वि एक

पदार्थः
सर्वभूतेषु - सर्वेषु भूतेषु
एकं - एकम्
भावम् - वस्तु
अव्ययम् -अक्षरम्

Downloaded from www.omkaravidya.com

ईक्षते - पश्यति
अविभक्तं -विभागरहितम्
विभक्तेषु - परस्परं व्यावृत्तेषु
ज्ञानं - ज्ञानं
विद्धि .- जानीहि
सात्विकम् - सात्विकम्

अन्वयः
विभक्तेषु सर्वभूतेषु अविभक्तं येन एकं अव्ययम् भावम् ईक्षते तत् ज्ञानं सात्विकम् विद्धि ।

व्याकरणम्
▶सन्धिः
येन + एकम् - वृद्धिसन्धिः
तत् + ज्ञानम् - श्चुत्वसन्धिः जश्त्वसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः
पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥२१॥

Downloaded from www.omkaravidya.com

पदच्छेदः

पृथक्त्वेन तु यत् ज्ञानं नानाभावान् पृथग्विधान् वेत्ति सर्वेषु भूतेषु तत् ज्ञानं विद्धि राजसम्

पदपरिचयः

पृथक्त्वेन - अकार नपु तृ एक

ज्ञानं - अकार नपु प्र एक

नानाभावान् - अकार पु द्वि बहु

पृथग्विधान् - अकार पु द्वि बहु

वेत्ति - लट् प्रपु एक

सर्वेषु - अकार पु स बहु

भूतेषु - अकार पु स बहु

ज्ञानं - अकार नपु द्वि बहु

विद्धि - लोट् मपु एम

राजसम् - अकार नपु द्वि एक

पदार्थः

पृथक्त्वेन - भेदेन

ज्ञानं - ज्ञानम्

नानाभावान् - आत्मनः भिन्नान्

पृथग्विधान् - पृथक्प्रकारान्

वेत्ति - जानाति

सर्वेषु - सकलेषु

भूतेषु - प्राणिषु

ज्ञानं - ज्ञानम्

Downloaded from www.omkaravidya.com

विद्धि - जानीहि
राजसम् - राजसम्

अन्वयः
तु सर्वेषु भूतेषु पृथग्विधान् नानाभावान् पृथक्त्वेन यत् ज्ञानं वेत्ति तत् ज्ञानं राजसम् विद्धि ।

व्याकरणम्
▶सन्धिः
यत् + ज्ञानम् - श्चुत्वसन्धिः जश्त्वसन्धिः
तत् + ज्ञानम् - श्चुत्वसन्धिः जश्त्वसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥ २२॥

पदच्छेदः
यत् तु कृत्स्नवत् एकस्मिन् कार्ये सक्तम् अहैतुकम् अतत्त्वार्थवत् अल्पं च तत् तामसम् उदाहृतम्

पदपरिचयः

कृत्स्नवत् - अव्ययम्
एकस्मिन् - अकार नपु स एक

Downloaded from www.omkaravidya.com

कार्ये - अकार नपु स एक

सक्तम् - अकार नपु प्र एक

अहैतुकम् - अकार नपु प्र एक

अतत्त्वार्थवत् - अव्ययम्

अल्पं - अकार नपु प्र एक

तामसम् - अकार नपु प्र एक

उदाहृतम् - अकार नपु प्र एक

पदार्थः

कृत्स्नवत् - परिपूर्णवत्

एकस्मिन् - एकस्मिन्

कार्ये - देहे

सक्तम् -लग्नम्

अहैतुकम् - हेतुवर्जितम्

अतत्त्वार्थवत् -अतत्त्वार्थवत्

अल्पं - अल्पफलत्वात्

तामसम् - तामसम्

उदाहृतम् - कथितम्

अन्वयः

यत् तु एकस्मिन् कार्ये कृत्स्नवत् सक्तम् अहैतुकम् अतत्त्वार्थवत् अल्पं च (ज्ञानम्) तत् तामसम् उदाहृतम् ।

व्याकरणम्

▶सन्धिः

कृत्स्नवत् + एकस्मिन् - जश्त्वसन्धिः

Downloaded from www.omkaravidya.com

अतत्त्वार्थवत् + अल्पं- जश्त्वसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥ २३॥

पदच्छेदः
नियतं सङ्गरहितम् अरागद्वेषतः कृतम् अफलप्रेप्सुना कर्म यत् तत् सात्विकम् उच्यते

पदपरिचयः
नियतं - अकार नपु प्र एक
सङ्गरहितम् - अकार नपु प्र एक
अरागद्वेषतः - अव्ययम्
कृतम् - अकार नपु प्र एक
अफलप्रेप्सुना - उकार पु तृ एक
कर्म - नकार नपु प्र एक
सात्विकम् - अकार नपु प्र एक
उच्यते - लट् कर्मणि प्रपु एक

पदार्थः

Downloaded from www.omkaravidya.com

नियतं - नित्यम्
सङ्गरहितम् - आसक्तिविवर्जितम्
अरागद्वेषतः - रागद्वेषराहित्येन
कृतम् - कृतम्
अफलप्रेप्सुना - अफलतृष्णेन
कर्म - कर्म
सात्विकम् -सात्विकम्
उच्यते - कथ्यते

अन्वयः
यत् कर्म नियतं  अफलप्रेप्सुना सङ्गरहितम् अरागद्वेषतः कृतम् तत् सात्विकम् उच्यते ।

व्याकरणम्
▶सन्धिः
नियतम् +सङ्गरहितम् - अनुस्वारसन्धिः

▶ समासः
फलं प्रेप्सुः फलप्रेप्सुः - द्वितीयातत्पुरुषः
न फलप्रेप्सुः - अफलप्रेप्सुः -नञ् तत्पुरुषः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

Downloaded from www.omkaravidya.com

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥२४॥

पदच्छेदः
यत् तु  कामेप्सुना कर्म साहङ्कारेण वा पुनः क्रियते बहुलायासं तत् राजसम् उदाहृतम्

पदपरिचयः
कामेप्सुना - उकार पु तृ एक
कर्म - नकार नपु प्र एक
साहङ्कारेण - अकार पु तृ एक
क्रियते - लट् कर्मणि प्रपु एक
बहुलायासं -अकार पु द्वि एक
राजसम् -अकार नपु प्र एक
उदाहृतम् - अकार नपु प्र एक

पदार्थः
कामेप्सुना - फलप्रेप्सुना
कर्म - कर्म
साहङ्कारेण - अहङ्कारसहितेन
क्रियते -  क्रियते
बहुलायासं - महदायासम्
राजसम् -  राजसम्
उदाहृतम् -  उदाहृतम्

Downloaded from www.omkaravidya.com

अन्वयः
यत् तु कर्म कामेप्सुना साहङ्कारेण वा पुनः बहुलायासं  क्रियते तत् राजसम् उदाहृतम् ।

व्याकरणम्
▶सन्धिः
तत् + राजसम् - जश्त्वसन्धिः
▶ समासः
अहङ्कारेण सह वर्तते इति - साहङ्कारः - सहपूर्वपदबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ २५॥

पदच्छेदः
अनुबन्धं क्षयं हिंसाम् अनपेक्ष्य च पौरुषम् मोहात् आरभ्यते कर्म यत् तत् तामसम् उच्यते

पदपरिचयः
अनुबन्धं - अकार पु द्वि एक
क्षयं- अकार पु द्वि एक
हिंसाम् - आकार स्त्री द्वि एक
अनपेक्ष्य - ल्यबन्तम्

Downloaded from www.omkaravidya.com

पौरुषम् - अकार नपु द्वि एक
मोहात् - अकार पु प एक
आरभ्यते - लट् कर्मणि प्रपु एक
कर्म - नकार नपु प्र एक
तामसम् - अकार नपु प्र एक
उच्यते - - लट् कर्मणि प्रपु एक

पदार्थः
अनुबन्धं - पश्चात् भावि शुभाशुभम्
क्षयं - द्रव्यव्ययम्
हिंसाम् - परपीडाम्
अनपेक्ष्य - अविगणय्य
पौरुषम् - सामर्थ्यम्
मोहात् - अविवेकात्
आरभ्यते -आरभ्यते
कर्म- कर्म
तामसम् - तामसम्
उच्यते - कथ्यते

अन्वयः
यत् कर्म अनुबन्धं क्षयं हिंसाम्  पौरुषम् अनपेक्ष्य मोहात् आरभ्यते तत् तामसम् उच्यते ।

व्याकरणम्
▶सन्धिः
मोहात् + आरभ्यते - जश्त्वसन्धिः

Downloaded from www.omkaravidya.com

▶ कृदन्ताः

उप + इक्ष् + ल्यप् - अपेक्ष्य

न अपेक्ष्य - अनपेक्ष्य

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥२६॥

पदच्छेदः

मुक्तसङ्गः अनहंवादी धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योः निर्विकारः कर्ता सात्त्विकः उच्यते

पदपरिचयः

मुक्तसङ्गः - अकार पु प्र एक

अनहंवादी - नकार पु प्र एक

धृत्युत्साहसमन्वितः- अकार पु प्र एक

सिद्ध्यसिद्ध्योः - इकार स्त्री स द्वि

निर्विकारः - अकार पु प्र एक

कर्ता - ऋकार पु प्र एक

सात्त्विकः - अकार पु प्र एक

उच्यते - लट् कर्मणि प्रपु एक

पदार्थः

Downloaded from www.omkaravidya.com

मुक्तसङ्गः - परित्यक्तः सङ्गः
अनहंवादी - न अहंवदनशीलः
धृत्युत्साहसमन्वितः- धैर्यौत्सुक्यसहितः
सिद्ध्यसिद्ध्योः - लाभालाभयोः
निर्विकारः -विकारशून्यः
कर्ता - आचरिता
सात्त्विकः - सत्त्ववान्
उच्यते - कथ्यते

अन्वयः
मुक्तसङ्गः अनहंवादी धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योः निर्विकारः कर्ता सात्त्विकः उच्यते ।

व्याकरणम्
▶सन्धिः
मुक्तसङ्गः + अनहंवादी - विसर्गउकारः
सिद्ध्यसिद्ध्योः + निर्विकारः - विसर्गरेफः
सात्त्विकः+ उच्यते - विसर्गलोपः

▶ समासः
धृतिः च उत्साहः च - धृत्युत्साहौ - इतरेतरद्वन्द्वसमासः
ताभ्याम् समन्वितः - तृतीयातत्पुरुषः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

Downloaded from www.omkaravidya.com

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ।२७॥

पदच्छेदः
रागी कर्मफलप्रेप्सुः लुब्धः हिंसात्मकः अशुचिः हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः

पदपरिचयः
रागी - नकार पु प्र एक
कर्मफलप्रेप्सुः - उकार पु प्र एक
लुब्धः- अकार पु प्र एक
हिंसात्मकः - अकार पु प्र एक
अशुचिः - इकार पु प्र एक
हर्षशोकान्वितः - अकार पु प्र एक
कर्ता - ऋकार पु प्र एक
राजसः - अकार पु प्र एक
परिकीर्तितः - अकार पु प्र एक

पदार्थः
रागी - रागवान्
कर्मफलप्रेप्सुः - कर्मफलार्थी
लुब्धः - लोभी
हिंसात्मकः - परपीडास्वभावः
अशुचिः -अशुद्धः
हर्षशोकान्वितः - सुखदुःखसमन्वितः

Downloaded from www.omkaravidya.com

कर्ता - कर्ता
राजसः - राजोगुणयुक्तः
परिकीर्तितः - ख्यातः

अन्वयः
रागी कर्मफलप्रेप्सुः लुब्धः हिंसात्मकः अशुचिः हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ।

व्याकरणम्
▶सन्धिः
कर्मफलप्रेप्सुः + लुब्धः - विसर्गरेफः
हिंसात्मकः + अशुचिः - विसर्गउकारः पूर्वरूपसन्धिः

▶ समासः
हिंसा आत्मा यस्य सः - समानाधिकरणबहुव्रीहिसमासः
हर्षः च शोकः च - हर्षशोकौ - इतरेतरद्वन्द्वसमासः
हर्षशोकाभ्यां समन्वितः तृतीयातत्पुरुषसमासः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥२८॥

Downloaded from www.omkaravidya.com

पदच्छेदः

अयुक्तः प्राकृतः स्तब्धः शठः नैष्कृतिकः अलसः विषादी दीर्घसूत्री च कर्ता तामसः उच्यते

पदपरिचयः

अयुक्तः - अकार पु प्र एक

प्राकृतः - अकार पु प्र एक

स्तब्धः - अकार पु प्र एक

शठः - अकार पु प्र एक

नैष्कृतिकः - अकार पु प्र एक

अलसः - अकार पु प्र एक

विषादी - नकार पु प्र एक

दीर्घसूत्री - नकार पु प्र एक

कर्ता - ऋकार पु प्र एक

तामसः - अकार पु प्र एक

उच्यते - लट् कर्मणि प्रपु एक

पदार्थः

अयुक्तः - असमाहितः

प्राकृतः - असंस्कृतबुद्धिः

स्तब्धः - अविनीतः

शठः - शक्तिगूहनकारी

नैष्कृतिकः - परवृत्तिच्छेदनपरः

अलसः- अनुद्यमशीलः

विषादी - शोकशीलः

दीर्घसूत्री - मन्दकारी

Downloaded from www.omkaravidya.com

कर्ता  - कर्ता
तामसः - तामोगुणयुक्तः
उच्युते - उच्यते

अन्वयः
अयुक्तः प्राकृतः स्तब्धः शठः नैष्कृतिकः अलसः विषादी दीर्घसूत्री च कर्ता तामसः  उच्युते  ।

व्याकरणम्
▶सन्धिः
शठः + नैष्कृतिकः - विसर्गउकारः
नैष्कृतिकः + अलसः - विसर्गउकारः पूर्वरूपसन्धिः
तामसः + उच्यते - विसर्गलोपः

श्रीमद्भगवद्गीता  -  अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं श्रृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥ २९॥

पदच्छेदः
बुद्धेः भेदं धृतेः च एव  गुणतः त्रिविधं श्रृणु प्रोच्यमानम् अशेषेण पृथक्त्वेन धनञ्जय

Downloaded from www.omkaravidya.com

पदपरिचयः

बुद्धेः - इकार स्त्री ष एक

भेदं - अकार पु द्वि एक

धृतेः - इकार स्त्री ष एक

गुणतः - अव्ययम्

त्रिविधं - अकार पु द्वि एक

श्रृणु - लोट् मपु एक

प्रोच्यमानम् - अकार पु द्वि एक

अशेषेण-- अकार पु तृ एक

पृथक्त्वेन - अकार नपु तृ एक

धनञ्जय - अकार पु सं प्र

पदार्थः

बुद्धेः -धियः

भेदं - विभागम्

धृतेः - धैर्यस्य

गुणतः - सत्त्वादिगुणतः

त्रिविधं - त्रिप्रकारम्

श्रृणु - आकर्ण्य

प्रोच्यमानम् - कथ्यमानम्

अशेषेण - शेषरहितेन

पृथक्त्वेन - विभागेन

धनञ्जय - अर्जुन

अन्वयः

हे धनञ्जय! त्रिविधं बुद्धेः धृतेः च एव भेदं गुणतः पृथक्त्वेन अशेषेण

Downloaded from www.omkaravidya.com

प्रोच्यमानम्    श्रृणु ।

व्याकरणम्

▶सन्धिः

बुद्धेः + भेदं - विसर्गरेफः

धृतेः + च -  विसर्गसकारः

च + एव  - वृद्धिसन्धिः

गुणतः + त्रिविधं - विसर्गसकारः

श्रीमद्भगवद्गीता  -  अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥३०॥

पदच्छेदः

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी

पदपरिचयः

प्रवृत्तिं - इकार स्त्री द्वि एक

निवृत्तिं - इकार स्त्री द्वि एक

कार्याकार्ये - अकार नपु द्वि द्वि

भयाभये - अकार नपु द्वि द्वि

बन्धं - अकार पु द्वि एक

Downloaded from www.omkaravidya.com

मोक्षं -  अकार पु द्वि एक
वेत्ति - लट् प्रपु एक
बुद्धिः - इकार स्त्री प्र एक
पार्थ - अकार पु सं प्र
सात्त्विकी - ईकार स्त्री प्र एक

पदार्थः
प्रवृत्तिं - प्रवर्तनम्
निवृत्तिं - अधर्मे निवृत्तिं
कार्याकार्ये - विहितप्रतिषिद्धे
भयाभये -भयाभये
बन्धं - बन्धं
मोक्षं - मुक्तिम्
वेत्ति - जानाति
बुद्धिः - बुद्धिः
पार्थ - अर्जुन!
सात्त्विकी - सात्त्विकी

अन्वयः
हे पार्थ! या बुद्धिः प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बन्धं मोक्षं च वेत्ति सा  सात्त्विकी  ।

व्याकरणम्
▶सन्धिः
प्रवृत्तिम् + च - अनुस्वारसन्धिः
निवृत्तिं + च - अनुस्वारसन्धिः

Downloaded from www.omkaravidya.com

▶ समासः

कार्यम् च अकार्यम् च - कार्याकार्ये - इतरेतरद्वन्द्वसमासः

भयम् च अभयम् च - भयाभये - इतरेतरद्वन्द्वसमासः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥३१॥

पदच्छेदः

यया धर्मम् अधर्मं च कार्यं च अकार्यम् एव च अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी

पदपरिचयः

धर्मम् -अकार पु द्वि एक
अधर्मं -अकार पु द्वि एक
कार्यं -अकार नपु द्वि एक
अकार्यम् -अकार नपु द्वि एक
अयथावत् - अव्ययम्
प्रजानाति - लट् प्रपु एक
बुद्धिः - इकार स्त्री प्र एक
पार्थ - अकार पु सं प्र
राजसी - ईकार स्त्री प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
धर्मम् - शासत्रचोदितम्
अधर्मं - शास्त्रप्रतिषिद्धम्
कार्यं -कर्तव्यम्
अकार्यम्  - अकार्यम्
अयथावत् - अयथार्य्येन
प्रजानाति - जानाति
बुद्धिः - बुद्धिः
पार्थ- अर्जुन
राजसी - राजसी

अन्वयः
हे पार्थ! यया (बुद्ध्या) धर्मम् अधर्मं च कार्यं  अकार्यम् एव च अयथावत् प्रजानाति सा बुद्धिः  राजसी ।

व्याकरणम्
▶सन्धिः
च + अकार्यम् - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी । ३२॥

Downloaded from www.omkaravidya.com

पदच्छेदः
अधर्मं धर्मम् इति या मन्यते तमसा आवृता सर्वार्थान् विपरितान् च बुद्धिः सा पार्थ तामसी

पदपरिचयः
अधर्मं - अकार पु द्वि एक
धर्मम्- अकार पु द्वि एक
मन्यते - लट् प्रपु एक
तमसा - सकार नपु तृ एक
आवृता - आकार स्त्री प्र एक
सर्वार्थान् - अकार पु द्वि बहु
विपरीतान्  - अकार पु द्वि बहु
बुद्धिः - इकार स्त्री प्र एक
पार्थ - अकार पु सं प्र
तामसी - ईकार स्त्री प्र एक

पदार्थः
अधर्मं - प्रतिषिद्धम्
धर्मम् - विहितम्
मन्यते - जानाति
तमसा -तमोगुणेन
आवृता -आच्छायिता
सर्वार्थान् - सर्वान् ज्ञेयपदार्थान्
विपरितान् -  विरुद्धान्
बुद्धिः - बुद्धिः
पार्थ - अर्जुन

Downloaded from www.omkaravidya.com

तामसी - तामसी

अन्वयः
हे पार्थ ! या बुद्धिः तमसा आवृता अधर्मं धर्मम् इति सर्वार्थान् विपरितान् च मन्यते सा (बुद्धिः) तामसी ।

व्याकरणम्
▶सन्धिः
तमसा + आवृता - सवर्णदीर्घसन्धिः
विपरीतान् + च - सत्वसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ ३३॥

पदच्छेदः
धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः योगेन अव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी

पदपरिचयः
धृत्या - इकार स्त्री तृ एक

Downloaded from www.omkaravidya.com

धारयते - लट् णिचं प्रपु एक
मन:प्राणेन्द्रियक्रिया: - आकार स्त्री द्वि बहु
योगेन - अकार पु तृ एक
अव्यभिचारिण्या - ईकार स्त्री तृ एक
धृतिः - इकार स्त्री प्र एक
पार्थ - अकार पु सं प्र
सात्त्विकी - ईकार स्त्री प्र एक

पदार्थः
धृत्या - उद्यमेन
धारयते - धारयते
मन:प्राणेन्द्रियक्रिया: - चित्तप्राणेन्द्रियव्यापारान्
योगेन - समाधिना
अव्यभिचारिण्या - अविनाभूतेन धारतन्त्या
धृतिः प्रयत्नः
सा - इयम्
पार्थ - अर्जुन
सात्त्विकी - सात्त्विकी

अन्वयः
हे पार्थ ! यया अव्यभिचारिण्या धृत्या मन:प्राणेन्द्रियक्रिया: योगेन धारयते सा धृतिः सात्त्विकी ।

व्याकरणम्
▶सन्धिः
योगेन + अव्यभिचारिण्या - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

▶ समासः

मनः च प्राणाः  च इन्द्रियाणि च - मनःप्राणेन्द्रियाणि - इतरेतरद्वन्द्वसमासः

तेषां क्रिया - मनःप्राणेन्द्रियक्रियाः - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥ ३४॥

पदच्छेदः

यया तु धर्मकामार्थान् धृत्या धारयते अर्जुन प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी

पदपरिचयः

धर्मकामार्थान्  - अकार पु द्वि बहु
धृत्या - इकार स्त्री तृ एक
धारयते -लट् णिच् प्रपु एक
अर्जुन - अकार पु सं प्र
प्रसङ्गेन - अकार पु तृ एक
फलाकाङ्क्षी - नकार पु प्र एक
धृतिः - इकार स्त्री प्र एक
पार्थ - अकार पु सं प्र
राजसी - ईकार स्त्री प्र एक

Downloaded from www.omkaravidya.com

पदार्थः
धर्मकामार्थान् -पुरुषार्थान्
धृत्या -प्रयत्नेन
धारयते - अवधारयते
अर्जुन - हे अर्जुन!
प्रसङ्गेन - प्रसङ्गेन
फलाकाङ्क्षी - फलप्रेप्सुः
धृतिः - उद्यमः
पार्थ - हे पार्थ
राजसी - राजसी

अन्वयः
हे पार्थ हे अर्जुन! यया धृत्या तु फलाकाङ्क्षी प्रसङ्गेन धर्मकामार्थान् धारयते सा धृतिः राजसी ।

व्याकरणम्
▶सन्धिः
धारयते + अर्जुन - पूर्वरूपसन्धिः

▶ समासः
धर्मः च कामः च अर्थः च - धर्मकामार्थाः - इतरेतरद्वन्द्वसमासः
तान् - धर्मकामार्थान्

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

Downloaded from www.omkaravidya.com

यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा तामसी मता ॥३५॥

पदच्छेदः
यया स्वप्नं भयं शोकं विषादं मदम् एव च न विमुञ्चति दुर्मेधाः धृतिः सा तामसी मता

पदपरिचयः
स्वप्नं - अकार पु द्वि एक
भयं - अकार नपु द्वि एक
शोकं - अकार पु द्वि एक
विषादं - अकार पु द्वि एक
मदम् - अकार पु द्वि एक
विमुञ्चति - लट् प्रपु एक
दुर्मेधाः - सकार पु प्र एक
धृतिः - इकार स्त्री प्र एक
तामसी - ईकार स्त्री प्र एक
मता - आकार स्त्री प्रपु एक

पदार्थः
स्वप्नं - निद्राम्
भयं - त्रासम्
शोकं - दुःखम्
विषादं - अवसादम्
मदम् - गर्वम्

Downloaded from www.omkaravidya.com

विमुञ्चति - विमुञ्चति
दुर्मेधा - कुत्सितमेधाः
धृतिः -धृतिः
तामसी .- तामसी
मता - मता

अन्वयः
दुर्मेधाः स्वप्नं भयं शोकं विषादं मदम् एव च यया (धृत्या) न विमुञ्चति सा धृतिः तामसी मता ।

व्याकरणम्
▶सन्धिः
दुर्मेधाः + धृतिः - विसर्गलोपः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

सुखं त्विदानीं त्रिविधं श्रृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुः खान्तं च निगच्छति ॥३६॥

यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥३७॥

पदच्छेदः

Downloaded from www.omkaravidya.com

सुखं तु इदानीं  त्रिविधं श्रृणु मे भरतर्षभ अभ्यासात् रमते यत्र दुः खान्तं च निगच्छति यत् तत् अग्रे विषम् इव परिणामे अमृतोपमम् तत् सुखं सात्त्विकं प्रोक्तम् आत्मबुद्धिप्रसादजम् ॥

पदपरिचयः

सुखं - अकार नपु द्वि एक

त्रिविधं  - अकार नपु द्वि एक

श्रृणु - लोट् मपु एक

भरतर्षभ - अकार पु सं प्र

अभ्यासात् - अकार पु प एक

रमते -लट् प्रपु एक

दुः खान्तं - अकार पु द्वि एक

निगच्छति - लट् प्रपु एक

विषम् - अकार नपु प्र एक

परिणामे - अकार पु स एक

अमृतोपमम्- अकार नपु प्र एक

सुखं - अकार नपु प्र एक

सात्त्विकं- अकार नपु प्र एक

प्रोक्तम् - अकार नपु प्र एक

आत्मबुद्धिप्रसादजम्- अकार नपु प्र एक

पदार्थः

सुखं - सुखं

त्रिविधं - त्रिप्रकारम्

श्रृणु - समाधानं कुरु

भरतर्षभ - अर्जुन

Downloaded from www.omkaravidya.com

अभ्यासात् - परिचयात्
रमते - तुष्यति
दुः खान्तं - दु:खावसानम्
निगच्छति - प्राप्नोति
विषम् - विषम्
परिणामे - अन्ते
अमृतोपमम् - अमृतसदृशम्
सुखं -सुखम्
सात्त्विकं - सात्विकम्
प्रोक्तम् - कथितम्
आत्मबुद्धिप्रसादजम् - स्वमतिनैर्मल्यसञ्जातम्

अन्वयः
हे भरतर्षभ! इदानीं त्रिविधं सुखं मे (वचनात्) श्रृणु । यत्र अभ्यासात् रमते दुः खान्तं च निगच्छति यत् तत् अग्रे विषम् इव परिणामे अमृतोपमम् आत्मबुद्धिप्रसादजम् तत् सुखं सात्त्विकं प्रोक्तम् ।

व्याकरणम्
▶सन्धिः
तु + इदानीं - यण्सन्धि:
अभ्यासात् + रमते - जश्त्वसन्धि:
तत् + अग्रे -जश्त्वसन्धि:
परिणामे + अमृतोपमम् - पूर्वरूपसन्धि:

▶ समासः
दु:खस्य अन्तः - दु:खान्तः - षष्ठीतत्पुरुष:

Downloaded from www.omkaravidya.com

अमृतम् उपमा यस्य तत् -समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।

परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८॥

पदच्छेदः

विषयेन्द्रियसंयोगात् यत् तत् अग्रे अमृतोपमम् परिणामे विषम् इव तत् सुखं राजसं स्मृतम्

पदपरिचयः

विषयेन्द्रियसंयोगात् - अकार पु प एक

अग्रे - अकार नपु स एक

अमृतोपमम् - अकार नपु प्र एक

परिणामे - अकार पु स एक

विषम् - अकार नपु प्र एक

सुखं - अकार नपु प्र एक

राजसं - अकार नपु प्र एक

स्मृतम् - अकार नपु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः

विषयेन्द्रियसंयोगात् -विषयेन्द्रियसंबन्धात्

अग्रे - आदौ

अमृतोपमम् -अमृतसदृशम्

परिणामे - अन्ते

विषम् - विषम्

सुखं - सुखम्

राजसं - राजसम्

स्मृतम् - प्रोक्तम्

अन्वयः

यत् तत् विषयेन्द्रिय- संयोगात्  अग्रे अमृतोपमम् परिणामे विषम् इव तत् सुखं राजसं स्मृतम् ।

व्याकरणम्

▶सन्धिः

विषयेन्द्रियसंयोगात् + यत् - जश्त्वसन्धि:

तत् + अग्रे -जास्त्वसन्धि:

अग्रे +अमृतोपमम् - पूर्वरूपसन्धि:

▶ समासः

विषया: च इन्द्रियाणि च  विषयेन्द्रियाणि - द्वन्द्वसमास:

विषयेन्द्रियाणां संयोग: - विषयेन्द्रियसंयोग: - षष्ठीतत्पुरुष: तस्मात्



Downloaded from www.omkaravidya.com

मूलश्लोकः

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थम् तत्तामसमुदाहृतम् ॥३९॥

पदच्छेदः
यत् अग्रे च अनुबन्धे च सुखं मोहनम् आत्मनः निद्रालस्यप्रमादोत्थम् तत् तामसम् उदाहृतम्

पदपरिचयः
अग्रे - अकार नपु स एक
अनुबन्धे - अकार पु स एक
सुखं - अकार नपु प्र एक
मोहनम् - अकार नपु प्र एक
आत्मनः - नकार पु ष एक
निद्रालस्यप्रमादोत्थम् - अकार नपु प्र एक
तामसम् - अकार नपु प्र एक
उदाहृतम् - अकार नपु प्र एक

पदार्थः
अग्रे- आरम्भे
अनुबन्धे - अवसानोत्तरकाले
सुखं - सुखम्
मोहनम् - मोहकरम्
आत्मनः -आत्मनः

Downloaded from www.omkaravidya.com

निद्रालस्यप्रमादोत्थम् -   निद्रालस्यप्रमादोत्थम्
तामसम् -तामसम्
उदाहृतम् - वर्णितम्

अन्वयः
यत् सुखम् अग्रे च निद्रालस्यप्रमादोत्थम् अनुबन्धे च  आत्मनः मोहनम्   तत् तामसम् उदाहृतम् ।

व्याकरणम्
▶सन्धिः
यत् + अग्रे - जश्त्वसन्धिः
च + अनुबन्धे - सवर्णदीर्घसन्धिः

निद्रा च आलस्यं च प्रमादः च - निद्रालस्यप्रमादाः - इतरेतरद्वन्द्वसमासः
निद्रालस्यप्रमादेभ्यः समुत्तिष्ठति - निद्रालस्यप्रमादोत्थम्

श्रीमद्भगवद्गीता  -  अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिःस्यात्त्रिभिर्गुणैः ॥४०॥

पदच्छेदः
न तत् अस्ति पृथिव्यां वा दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैः मुक्तं यत् एभिः स्यात् त्रिभिः गुणैः

Downloaded from www.omkaravidya.com

पदपरिचयः

पृथिव्यां - ईकार स्त्री स एक

दिवि - वकार स्त्री स एक

देवेषु - अकार पु स बहु

सत्त्वं - अकार नपु पंर एक

प्रकृतिजैः - अकार पु तृ बहु

मुक्तं - अकार नपु प्र एक

एभिः - मकार पु तृ बहु

स्यात् - विधि प्रपु एक

त्रिभिः - इकार पु तृ नित्य बहु

गुणैः - अकार पु तृ बहु

पदार्थः

पृथिव्यां - मनुष्यलोके

दिवि - स्वर्गलोके

देवेषु - देवेषु

सत्त्वं -सत्त्वम्

प्रकृतिजैः - प्रकृतितः जातैः

मुक्तं - परित्यक्तम्

एभिः - एभिः

स्यात् - भवेत्

त्रिभिः - त्रिभिः

गुणैः - गुणैः

अन्वयः

Downloaded from www.omkaravidya.com

यत् सत्त्वं एभिः प्रकृतिजैः त्रिभिः गुणैः मुक्तं स्यात् तत् पृथिव्यां वा दिवि देवेषु वा पुनः न अस्ति ।

व्याकरणम्

▶सन्धिः

तत् + अस्ति - जश्त्वसन्धिः

प्रकृतिजैः + मुक्तम् - विसर्गरेफः

यत् + एभिः -जश्त्वसन्धिः

त्रिभिः + गुणैः - विसर्गरेफः

▶ समासः

प्रकृतितः जातः इति प्रकृतिजः - उपपदसमासः तैः - प्रकृतिजैः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१॥

पदच्छेदः

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप कर्माणि प्रविभक्तानि स्वभावप्रभवैः गुणैः

पदपरिचयः

ब्राह्मणक्षत्रियविशां - शकार पु ष बहु

शूद्राणां - अकार पु ष बहु

Downloaded from www.omkaravidya.com

परन्तप - अकार पु सं प्र
कर्माणि - नकार नपु प्र बहु
प्रविभक्तानि - अकार पु प्र बहु
स्वभावप्रभवैः - अकार पु तृ बहु
गुणैः - अकार पु तृ बहु

पदार्थः
ब्राह्मणक्षत्रियविशां - विप्रराजन्यवैश्यानाम्
शूद्राणां - शूद्राणां
परन्तप - शत्रुतापन !
कर्माणि -कर्माणि
प्रविभक्तानि -व्यवस्थापितानि
स्वभावप्रभवैः -प्रकृत्या जातैः
गुणैः - सत्त्वरजस्तमोभिः

अन्वयः
हे परन्तप ! ब्राह्मणक्षत्रियविशां शूद्राणां च स्वभावप्रभवैः गुणैः कर्माणि प्रविभक्तानि ।

व्याकरणम्
▶सन्धिः
स्वभावप्रभवैः + गुणैः- विसर्गरेफः

▶ समासः
ब्राह्मणाः च क्षत्रियाः च विशः च - ब्राह्मणक्षत्रियविशः - इतरेतरद्वन्द्वसमासः - तेषाम् - ब्राह्मणक्षत्रियविशाम्

Downloaded from www.omkaravidya.com

स्वभावात् प्रभवः - स्वभावप्रभवः - पञ्चमीतत्पुरुषः तैः - स्वभावप्रभवैः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥४२॥

पदच्छेदः
शमः दमः तपः शौचं क्षान्तिः आर्जवम् एव च ज्ञानं विज्ञानम् आस्तिक्यं ब्रह्मकर्म स्वभावजम्

पदपरिचयः
शमः - अकार पु प्र एक
दमः - अकार पु प्र एक
तपः - सकार नपु प्र एक
शौचं - अकार नपु प्र एक
क्षान्तिः - इकार स्त्री प्र एक
आर्जवम् - अकार नपु प्र एक
ज्ञानं - अकार नपु प्र एक
विज्ञानम् - अकार नपु प्र एक

Downloaded from www.omkaravidya.com

आस्तिक्यं  - अकार नपु प्र एक
ब्रह्मकर्म - नकार नपु प्र एक
स्वभावजम्  - अकार नपु प्र एक

पदार्थः
शमः  - चित्तनिग्रहः
दमः - बाह्येन्द्रियनिग्रहः
तपः - विविधं व्रतः
शौचं - शुचित्वम्
क्षान्तिः - क्षमा
आर्जवम् - ऋजता
ज्ञानं - बोधः
विज्ञानम् - विज्ञानं
आस्तिक्यं - अस्तिभावः
ब्रह्मकर्म - ब्रह्मणकृत्यम्
स्वभावजम् - स्वभावजम्

अन्वयः
शमः  दमः तपः शौचं क्षान्तिः आर्जवम् एव च ज्ञानं विज्ञानम् आस्तिक्यं स्वभावजम् ब्रह्मकर्म (भवति) ।

व्याकरणम्
▶सन्धिः
शमः  + दमः - विसर्गउकारः
दमः + तपः - विसर्गसकारः
क्षान्तिः + आर्जवम् - विसर्गरेफः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्मस्वभावजम् ॥४३॥

पदच्छेदः
शौर्यं तेजः धृतिः दाक्ष्यं युद्धे च अपि अपलायनम् दानम् ईश्वरभावः च क्षात्रं कर्म स्वभावजम्

पदपरिचयः
शौर्यं - अकार नपु प्र एक
तेजः - सकार नपु प्र एक
धृतिः - इकार स्त्री प्र एक
दाक्ष्यं - अकार नपु प्र एक
युद्धे - अकार नपु स एक
अपलायनम् - अकार नपु प्र एक
दानम् - अकार नपु प्र एक
ईश्वरभावः - अकार पु प्र एक

Downloaded from www.omkaravidya.com

क्षात्रं - अकार नपु प्र एक
कर्म - नकार नपु प्र एक
स्वभावजम् - अकार नपु प्र एक

पदार्थः
शौर्यं - पराक्रमः
तेजः - प्रागल्भ्यम्
धृतिः - धारणम्
दाक्ष्यं - कौशलम्
युद्धे - युद्धे
अपलायनम् - अपराङ्मुखता
दानम् - औदार्यम्
ईश्वरभावः -प्रभुत्वम्
क्षात्रं - क्षत्रियसम्बन्धि
कर्म- कर्तव्यम्
स्वभावजम् - स्वभावजम्

अन्वयः
शौर्यं तेजः धृतिः दाक्ष्यं युद्धे अपलायनम् अपि दानम् ईश्वरभावः च स्वभावजम् क्षात्रं कर्म ।

व्याकरणम्
▶सन्धिः
तेजः + धृतिः - विसर्गउकारः
धृतिः + दाक्ष्यं - विसर्गरेफः
च + अपि - सवर्णदीर्घसन्धिः

Downloaded from www.omkaravidya.com

अपि + अपलायनम् - यण्सन्धिः
ईश्वरभावः + च - विसर्गसकारः

▶ समासः
ईश्वरस्य भावः - ईश्वरभावः - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥४४॥

पदच्छेदः
कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् परिचर्यात्मकं कर्म शूद्रस्य अपि स्वभावजम्

पदपरिचयः
कृषिगौरक्ष्यवाणिज्यं - अकार नपु प्र एक
वैश्यकर्म - नकार नपु प्र एक
स्वभावजम् - अकार नपु प्र एक
परिचर्यात्मकं - अकार नपु प्र एक
कर्म - नकार नपु प्र एक
शूद्रस्य - अकार पु ष एक
स्वभावजम् - अकार नपु प्र एक

Downloaded from www.omkaravidya.com

पदार्थः

कृषिगौरक्ष्यवाणिज्यं - कर्षणम् - गौरक्ष्यम्- वाणिज्यम्

वैश्यकर्म - वैश्यस्य कर्म

स्वभावजम् -स्वभावजम्

परिचर्यात्मकं - शुश्रूषास्वभावम्

कर्म - कर्म

शूद्रस्य -शूद्रस्य

स्वभावजम् - प्रकृतिसम्भवम्

अन्वयः

कृषिगौरक्ष्यवाणिज्यं स्वभावजम् वैश्यकर्म । परिचर्यात्मकं शूद्रस्य अपि स्वभावजम् कर्म ।

व्याकरणम्

▶सन्धिः

शूद्रस्य + अपि - सवर्णदीर्घसन्धिः

▶ समासः

कृषिः च गौरक्ष्यम् च वाणिज्यम् च -

कृषिगौरक्ष्यवाणिज्यम् - इतरेतरद्वन्द्वसमासः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

Downloaded from www.omkaravidya.com

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥४५॥

पदच्छेदः
स्वे स्वे कर्मणि अभिरतः संसिद्धिं लभते नरः स्वकर्मनिरतः सिद्धिं यथा विन्दति तत् छृणु

पदपरिचयः
स्वे - अकार नपु स एक
स्वे - अकार नपु स एक
कर्मणि - नकार नपु स एक
अभिरतः - अकार पु प्र एक
संसिद्धिं - इकार स्त्री द्वि एक
लभते - लट् प्रपु एक
नरः - अकार पु प्र एक
स्वकर्मनिरतः - अकार पु प्र एक
सिद्धिं -- इकार स्त्री द्वि एक
विन्दति - लट् प्रपु एक
श्रृणु - लोट् मपु एक

पदार्थः
स्वे - स्वस्मिन्
स्वे - स्वस्मिन्
कर्मणि - कर्तव्ये
अभिरतः - तत्परः
संसिद्धिं - ज्ञानयोग्यताम्
लभते - आप्नोति

Downloaded from www.omkaravidya.com

नरः -पुरुषः
स्वकर्मनिरतः - स्वकर्मानुष्ठाता
सिद्धिं -ज्ञानयोग्यताम्
विन्दति - लभते
शृणु - शृणु

अन्वयः
स्वे स्वे कर्मणि अभिरतः नरः संसिद्धिं लभते । स्वकर्मनिरतः यथा सिद्धिं विन्दति तत् शृणु ।

व्याकरणम्
▶सन्धिः
कर्मणि + अभिरतः - यण्सन्धिः
तत् + छृणु - श्चुत्वसन्धिः छत्वसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥४६॥

पदच्छेदः
यतः प्रवृत्तिः भूतानां येन सर्वम् इदं ततम् स्वकर्मणा तम् अभ्यर्च्य सिद्धिं विन्दति मानवः

Downloaded from www.omkaravidya.com

पदपरिचयः

प्रवृत्तिः - इकार स्त्री प्र एक

भूतानां - अकार नपु ष बहु

सर्वम् - अकार नपु प्र एक

ततम् - अकार नपु प्र एक

स्वकर्मणा - नकार नपु तृ एक

अभ्यर्च्य - ल्यबन्तम्

सिद्धिं - इकार स्त्री द्वि एक

विन्दति - लट् प्रपु एक

मानवः - अकार पु प्र एक

पदार्थः

प्रवृत्तिः - उत्पत्तिः

भूतानां - प्राणिनाम्

सर्वम् - सकलम्

ततम् - व्याप्तम्

स्वकर्मणा -स्वकर्तव्येन

अभ्यर्च्य - आराध्य

सिद्धिं -सिद्धिं

विन्दति - लभते

मानवः - नरः

अन्वयः

मानवः यतः भूतानां प्रवृत्तिःयेन इदं सर्वम् ततं तं स्वकर्मणा अभ्यर्च्य सिद्धिं विन्दति ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

प्रवृत्तिः + भूतानाम् - विसर्गरेफः

▶ कृदन्ताः

अभ्यर्च्य - अभि + अर्च् + ल्यप् प्रत्ययः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥४७॥

पदच्छेदः

श्रेयान् स्वधर्मः विगुणः परधर्मात् स्वनुष्ठितात् स्वभावनियतं कर्म कुर्वन् न आप्नोति किल्बिषम्

पदपरिचयः

श्रेयान् - सकार पु प्र एज

स्वधर्मः - अकार पु प्र एक

विगुणः - अकार पु प्र एक

परधर्मात्- अकार पु प एक

स्वनुष्ठितात् - अकार पु प एक

स्वभावनियतं - अकार नपु द्वि एक

कर्म - नकार नपु द्वि एक

Downloaded from www.omkaravidya.com

कुर्वन् - तकार पु प्र एक

आप्नोति - लट् प्रपु एक

किल्बिषम् - अकार नपु द्वि एक

पदार्थः

श्रेयान् - प्रशस्यतरः

स्वधर्मः -स्वधर्मः

विगुणः - विकृतः

परधर्मात् - अन्यधर्मात्

स्वनुष्ठितात् - सुष्टु कृतात्

स्वभावनियतं - स्वभावजातम्

कर्म- कर्म

कुर्वन् - आचरन्

आप्नोति - प्राप्नोति

किल्बिषम् - पापम्

अन्वयः

विगुणःस्वधर्मः स्वनुष्ठितात् परधर्मात् श्रेयान् स्वभावनियतं कर्म कुर्वन् किल्बिषम् न आप्नोति ।

व्याकरणम्

▶सन्धिः

स्वधर्मः + विगुणः - विसर्गउकारः

न + आप्नोति - सवर्णदीर्घसन्धिः



Downloaded from www.omkaravidya.com

मूलश्लोकः

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८॥

पदच्छेदः
सहजं कर्म कौन्तेय सदोषम् अपि न त्यजेत् सर्वारम्भाः हि दोषेण धूमेन अग्निः इव आवृताः

पदपरिचयः
सहजं - अकार नपु प्र एक
कर्म - नकार नपु प्र एक
कौन्तेय - अकार पु सं प्र
सदोषम् - अकार नपु द्वि एक
त्यजेत् - विधि प्रपु एक
सर्वारम्भाः - अकार पु प्र बहु
दोषेण -अकार पु तृ एक
धूमेन -अकार पु तृ एक
अग्निः - इकार पु प्र एक
आवृताः - अकार पु प्र बहु

पदार्थः
सहजं - स्वभावविहितम्
कर्म - कर्म
कौन्तेय - अर्जुन !
सदोषम् - दोषसहितम्

Downloaded from www.omkaravidya.com

त्यजेत् -त्यजेत्
सर्वारम्भाः -सर्वारम्भाः
दोषेण - दोषेण
धूमेन धूमेन
अग्निः - अग्निः
आवृताः - आच्छादिताः

अन्वयः

हे कौन्तेय ! सदोषम् अपि सहजं कर्म न त्यजेत् । सर्वारम्भाः हि दोषेण आवृताः धूमेन अग्निः इव ।

व्याकरणम्

▶सन्धिः

सर्वारम्भाः + हि - विसर्गलोपः
धूमेन + अग्निः - सवर्णदीर्घसन्धिः
अग्निः + इव - विसर्गरेफः
इव + आवृताः - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां सन्नयासेनाधिगच्छति ॥ ४९॥

Downloaded from www.omkaravidya.com

पदच्छेदः

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः नैष्कर्म्यसिद्धिं परमां सन्नयासेन अधिगच्छति

पदपरिचयः

असक्तबुद्धिः - इकार पु प्र एक

जितात्मा - नकार पु प्र एक

विगतस्पृहः - अकार पु प्र एक

नैष्कर्म्यसिद्धिं - इकार स्त्री द्वि एक

परमां -आकार स्त्री द्वि एक

सन्नयासेन - अकार पु प्र एक

अधिगच्छति - लट् प्रपु एक

पदार्थः

असक्तबुद्धिः - असङ्गमतिः

जितात्मा - विहितमनस्कः

विगतस्पृहः - अपगताशः

नैष्कर्म्यसिद्धिं -परमात्मज्ञानयोग्यताम्

परमां - श्रेष्ठाम्

सन्नयासेन - सम्यक् दर्शनेन

अधिगच्छति - प्राप्नोति

अन्वयः

सर्वत्र असक्तबुद्धिः जितात्मा विगतस्पृहः सन्नयासेन परमां नैष्कर्म्यसिद्धिं अधिगच्छति ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

सन्नयासेन + अधिगच्छति - सवर्णदीर्घसन्धिः

▶ समासः

असक्ता बुद्धिः यस्य सः - समानाधिकरणबहुव्रीहिसमासः

जितः आत्मा येन सः - समानाधिकरणबहुव्रीहिसमासः

विगता स्पृहा यस्मात् सः -समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या *परा ॥५०॥

पदच्छेदः

सिद्धिं प्राप्तः यथा ब्रह्म तथा आप्नोति निबोध मे समासेन एव कौन्तेय निष्ठा ज्ञानस्य या परा

पदपरिचयः

सिद्धिं - इकार स्त्री द्वि एम

प्राप्तः - अकार पु प्र एक

ब्रह्म - नकार नपु द्वि एक

आप्नोति - लट् प्रपु एक

निबोध - लट् मपु एक

Downloaded from www.omkaravidya.com

समासेन - अकार पु तृ एक
कौन्तेय - अकार पु सं प्र
निष्ठा - आकार स्त्री प्र एक
ज्ञानस्य - अकार नपु ष एक
परा - आकार स्त्री प्र एक

पदार्थः
सिद्धिं - अन्तःकरणसिद्धिम्
प्राप्तः - लब्धः
ब्रह्म - परमात्मानम्
आप्नोति -आप्नोति
निबोध - जानीहि
मे - मे वचनात्
समासेन - सङ्क्षेपेण
कौन्तेय - अर्जुन
निष्ठा - स्थितिः
ज्ञानस्य - ब्रह्मज्ञानस्य
परा - श्रेष्ठा

अन्वयः
हे कौन्तेय! सिद्धिं प्राप्तः यथा ज्ञानस्य परा निष्ठा ब्रह्म आप्नोति तथा समासेन एव मे निबोध ।

व्याकरणम्
▶सन्धिः
प्राप्तः + यथा - विसर्गउकारः

Downloaded from www.omkaravidya.com

तथा + आप्नोति - सवर्णदीर्घसन्धिः
समासेन + एव - वृद्धिसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकाः
बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥५१॥

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥५२॥

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तः ब्रह्मभूयाय कल्पते ॥५३॥

पदच्छेदः
बुद्ध्या विशुद्धया युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ध्यानयोगपरः नित्यं वैराग्यं समुपाश्रितः अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् विमुच्य निर्ममः शान्तः ब्रह्मभूयाय कल्पते

पदपरिचयः
बुद्ध्या - इकार स्त्री तृ एक
विशुद्धया - आकार स्त्री तृ एक

Downloaded from www.omkaravidya.com

युक्तः - अकार पु प्र एक

धृत्या - इकार स्त्री तृ एक

आत्मानं - नकार पु द्वि एक

नियम्य - ल्यबन्तम्

शब्दादीन् - इकार पु द्वि बहु

विषयान् - अकार पु द्वि बहु

त्यक्त्वा - क्त्वान्तम्

रागद्वेषौ - अकार पु द्वि द्वि

व्युदस्य - ल्यबन्तम्

विविक्तसेवी - नकार पु प्र एक

लघ्वाशी - नकार पु प्र एक

यतवाक्कायमानसः - अकार पु प्र एक

ध्यानयोगपरः - अकार पु प्र एक

वैराग्यं - अकार नपु द्वि एक

समुपाश्रितः - अकार पु प्र एक

अहङ्कारं - अकार पु द्वि एक

बलं - अकार नपु द्वि एक

दर्पं - अकार पु द्वि एक

कामं - अकार पु द्वि एक

क्रोधं - अकार पु द्वि एक

परिग्रहम् - अकार पु द्वि एक

विमुच्य - ल्यबन्तम्

निर्ममः - अकार पु प्र एक

शान्तः - अकार पु प्र एक

ब्रह्मभूयाय - अकार नपु च एक

कल्पते लट् प्रपु एक

Downloaded from www.omkaravidya.com

पदार्थः

बुद्ध्या - अध्यवसायात्मिकया

विशुद्धया - मायारहितया

युक्तः - सम्पन्नः

धृत्या - धैर्येण

आत्मानं - कार्यकरणसङ्घातम्

नियम्य - वशीकृत्य

शब्दादीन् -शब्दादीन्

विषयान् -विषयान्

त्यक्त्वा - परित्यज्य

रागद्वेषौ -रागद्वेषौ

व्युदस्य - परित्यज्य

विविक्तसेवी - एकान्तसेवी

लघ्वाशी - मितभोजी

यतवाक्कायमानसः - वाक्देहचित्तसंयतः

ध्यानयोगपरः -आत्मचिन्तनपरः

वैराग्यं - वितृष्णाम्

समुपाश्रितः - अवलम्बितः

अहङ्कारं - अहंभावम्

बलं - दार्ढ्यम्

दर्पं - गर्वम्

कामं - इच्छाम्

क्रोधं - क्रोधं

परिग्रहम् - उपार्जनम्

विमुच्य - विशेषेण त्यक्त्वा

Downloaded from www.omkaravidya.com

निर्ममः - ममाकाररहितः

शान्तः - शान्तः

ब्रह्मभूयाय - ब्रह्मभावाय

कल्पते - समर्थः भवति

अन्वयः

विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः वैराग्यं समुपाश्रितः अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् विमुच्य निर्ममः शान्तः ब्रह्मभूयाय कल्पते ।

व्याकरणम्

▶सन्धिः

युक्तः + धृत्या - विसर्गउकारः

धृत्या + आत्मानं - सवर्णदीर्घसन्धिः

विषयान् + त्यक्त्वा - सत्वसन्धिः

ध्यानयोगपरः + नित्यं - विसर्गउकारः

शान्तः + ब्रह्मभूयाय - विसर्गउकारः

▶ समासः

विविक्तं सेवते इति विविक्तसेवी - उपपदसमासः

लघु अश्नाति इति लघ्वाशी -उपपदसमासः

ब्रह्मणः भूयः - षष्ठीतत्पुरुषः



Downloaded from www.omkaravidya.com

मूलश्लोकः

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४॥

पदच्छेदः
ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्

पदपरिचयः
ब्रह्मभूतः - अकार पु प्र एक
प्रसन्नात्मा -नकार पु प्र एक
शोचति - लट् प्रपु एक
काङ्क्षति - लट् प्रपु एक
समः अकार पु प्र एक
सर्वेषु - अकार नपु स बहु
भूतेषु - अकार नपु स बहु
मद्भक्तिं - इकार स्त्री द्वि एक
लभते - लट् प्रपु एक
पराम् - अाकार स्त्री द्वि एक

पदार्थः
ब्रह्मभूतः - ब्रह्मणि अवस्थितः
प्रसन्नात्मा - प्रसन्नचित्तः
शोचति - विषीदति
काङ्क्षति - इच्छति

Downloaded from www.omkaravidya.com

समः - तुल्यः
सर्वेषु - सकलेषु
भूतेषु -भूतेषु
मद्भक्तिं - मम भक्तिम्
लभते - प्राप्नोति
पराम् - श्रेष्ठाम्

अन्वयः
ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । सर्वेषु भूतेषु समः पराम् मद्भक्तिं लभते ।

व्याकरणम्
▶सन्धिः
मद्भक्तिं + लभते - अनुस्वारसन्धिः

▶ समासः
प्रसन्नः आत्मा यस्य सः - प्रसन्नात्मा समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ५५॥

Downloaded from www.omkaravidya.com

पदच्छेदः

भक्त्या माम् अभिजानाति यावान् यः च अस्मि तत्त्वतः ततः मां तत्त्वतः ज्ञात्वा विशते तदनन्तरम्

पदपरिचयः

भक्त्या - इकार स्त्री तृ एक

अभिजानाति - लट् प्रपु एक

यावान् - तकार पु प्र एक

अस्मि - लट् उपु एक

तत्त्वतः - अव्ययम्

तत्त्वतः - अव्ययम्

ज्ञात्वा - क्त्वान्तम्

विशते - लट् प्रपु एक

तदनन्तरम् - अव्ययम्

पदार्थः

भक्त्या - सेवया

अभिजानाति - सम्यक् वेत्ति

यावान् - यावान्

तत्त्वतः - तत्त्वतः

तत्त्वतः वस्तुतः

ज्ञात्वा - विदिध्वा

विशते - प्रविशति

तदनन्तरम्- तदनन्तरम्

Downloaded from www.omkaravidya.com

अन्वयः

भक्त्या  यावान् यः च अस्मि (इति) तत्त्वतः माम् अभिजानाति ततः तत्त्वतः ज्ञात्वा  तदनन्तरम् विशते ।

व्याकरणम्

▶सन्धिः

यः + च - विसर्गसकारः

च + अस्मि - सवर्णदीर्घसन्धिः

ततः + मां - विसर्गउकारः

तत्त्वतः + ज्ञात्वा   - विसर्गउकारः

श्रीमद्भगवद्गीता  -  अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥५६॥

पदच्छेदः

सर्वकर्माणि अपि सदा कुर्वाणः मद्व्यपाश्रयः मत्प्रसादात् अवाप्नोति शाश्वतं पदम् अव्ययम्

पदपरिचयः

सर्वकर्माणि - नकार नपु द्वि बहु

Downloaded from www.omkaravidya.com

कुर्वाणः-  अकार पु प्र एक

मद्व्यापाश्रयः -  अकार पु प्र एक

मत्प्रसादात् - अकार पु प एक

अवाप्नोति - लट् प्रपु एक

शाश्वतं - अकार नपु द्वि एक

पदम् - अकार नपु द्वि एक

अव्ययम् - अकार नपु द्वि एक

पदार्थः

सर्वकर्माणि - निखिलकर्तव्याणि

सदा - सर्वदा

कुर्वाणः - अनुतिष्ठन्

मद्व्यापाश्रयः -मद्व्यापाश्रयः

मत्प्रसादात् - ममानुग्रगात्

अवाप्नोति - प्राप्नोति

शाश्वतं - नित्यम्

पदम् -पदम्

अव्ययम् - अविनाशि

अन्वयः

सर्वकर्माणि अपि सदा कुर्वाणः मद्व्यापाश्रयः मत्प्रसादात् शाश्वतं अव्ययम् पदम् अवाप्नोति ।

व्याकरणम्

▶सन्धिः

सर्वकर्माणि + अपि - यण्सन्धिः

Downloaded from www.omkaravidya.com

कुर्वाणः + मद्व्यापाश्रयः - विसर्गउकारः
मत्प्रसादात् + अवाप्नोति - जश्त्वसन्धिः
▶ समासः
अहं व्यपाश्रयः यस्य सः - मद्व्यापाश्रयः - समानाधिकरणबहुव्रीहिसमासः
मम प्रसादः - मत्प्रसादः - षष्ठीतत्पुरुषः तस्मात् - मत्प्रसादात्

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

चेतसा सर्वकर्माणि मयि सन्न्यस्य मत्परः।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७॥

पदच्छेदः
चेतसा सर्वकर्माणि मयि सन्न्यस्य मत्परः बुद्धियोगम् उपाश्रित्य मच्चित्तः सततं भव

पदपरिचयः
चेतसा - सकार नपु तृ एक
सर्वकर्माणि - नकार नपु द्वि बहु
सन्न्यस्य - ल्यबन्तम्
मत्परः - अकार पु प्र एक
बुद्धियोगम् - अकार पु द्वि एक
उपाश्रित्य- ल्यबन्तम्
मच्चित्तः - अकार पु प्र एक
भव - लोट् मपु एक

Downloaded from www.omkaravidya.com

पदार्थः
चेतसा - बुद्ध्या
सर्वकर्माणि - दृष्टादृष्टार्थानि
सन्न्यस्य - समर्प्य
मत्परः - अहम् एव परः
बुद्धियोगम् - समाहितबुद्धित्वम्
उपाश्रित्य - अवलम्ब्य
मच्चित्तः - मन्मनाः
भव - भव

अन्वयः
चेतसा सर्वकर्माणि मयि सन्न्यस्य मत्परः बुद्धियोगम् उपाश्रित्य  सततं मच्चित्तः भव ।

व्याकरणम्
▶सन्धिः
सततं + भव - अनुस्वारसन्धिः

▶ समासः
अहं परः यस्य सः - मत्परः - समानाधिकरणबहुव्रीहिसमासः
मयि चित्तम् यस्य सः - मच्चित्तः ब्यधिकरणबहुव्रीहिसमासः

▶ कृदन्ताः
सन्न्यस्य - सम् + नि+ अस् + ल्यप् प्रत्ययः
उपाश्रित्य - उप + आ + श्रि+ ल्यप् प्रत्ययः

Downloaded from www.omkaravidya.com

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।
अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि ॥ ५८॥

पदच्छेदः
मच्चित्तः सर्वदुर्गाणि मत्प्रसादात् तरिष्यसि अथ चेत् त्वम् अहङ्कारात् न श्रोष्यसि विनङ्क्ष्यसि

पदपरिचयः
मच्चित्तः - अकार पु प्र एक
सर्वदुर्गाणि - अकार नपु द्वि बहु
मत्प्रसादात् - अकार पु प एक
तरिष्यसि - लृट् मपु एक
अहङ्कारात् - अकार पु प एक
श्रोष्यसि - लृट् मपु एक
विनङ्क्ष्यसि - लृट् मपु एक

पदार्थः

Downloaded from www.omkaravidya.com

मच्चित्तः - मच्चित्तः
सर्वदुर्गाणि - सकलदुस्तराणि
मत्प्रसादात् - मदनुग्राहात्
तरिष्यसि - अतिक्रमिष्यसि
अहङ्कारात्-अहङ्कारात्
श्रोष्यसि - ग्रहीष्यसि
विनङ्क्ष्यसि - विनाशं गमिष्यसि

अन्वयः
मच्चित्तः  मत्प्रसादात् सर्वदुर्गाणि तरिष्यसि । अथ अहङ्कारात् त्वं न श्रोष्यसि चेत् विनङ्क्ष्यसि ।

व्याकरणम्
▶सन्धिः
अहङ्कारात् + न - अनुनासिकासन्धिः
▶ समासः
मयि चित्तं यस्य सः - मच्चित्तः - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९॥

पदच्छेदः

Downloaded from www.omkaravidya.com

यत् अहङ्कारम् आश्रित्य न योत्स्ये इति मन्यसे मिथ्या एषः व्यवसायः ते प्रकृतिः त्वां नियोक्ष्यति

पदपरिचयः

अहङ्कारम् - अकार पु द्वि एक

आश्रित्य - लंयबन्तम्

योत्स्ये - लृट् लकार उपु एक

मन्यसे - लट् लकार मपु एक

मिथ्या - अव्ययम्

व्यवसायः - अकार पु प्र एक

प्रकृतिः - इकार स्त्री प्र एक

नियोक्ष्यति - लृट् लकार प्रपु एक

पदार्थः

अहङ्कारम् -अहंभावम्

आश्रित्य - अवलम्ब्य

योत्स्य - युद्धं करिष्यामि

मन्यसे - चिन्तयसि

मिथ्या – मिथ्या

व्यवसायः - निश्चयः

प्रकृतिः - क्षत्रस्वभावः

नियोक्ष्यति - नियोक्ष्यति

अन्वयः

यत् अहङ्कारम् आश्रित्य न योत्स्ये इति मन्यसे एषः ते व्यवसायः

Downloaded from www.omkaravidya.com

मिथ्या प्रकृतिः त्वां नियोक्ष्यति ।

व्याकरणम्

▶सन्धिः

यत् + अहङ्कारम् - जश्त्वसन्धिः

योत्स्ये + इति - यान्तवान्तादेशसन्धिः

मिथ्या + एषः - वृद्धिसन्धिः

व्यवसायः + ते - विसर्गसकारः

प्रकृतिः + त्वां विसर्गसकारः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ।

कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥६०॥

पदच्छेदः

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा कर्तुं न इच्छसि यत् मोहात् करिष्यसि अवशः अपि तत्

पदपरिचयः

स्वभावजेन- अकार नपु तृ एक

कौन्तेय - अकार पु सं प्र

निबद्धः - अकार पु प्र एक

स्वेन - अकार नपु तृ एक

Downloaded from www.omkaravidya.com

कर्मणा - अकार नपु तृ एक
कर्तुं - तुमुनन्तम्
इच्छसि - लट् मपु एक
मोहात् - अकार पु प एक
करिष्यसि - लृत् मपु एक
अवशः - अकार पु प्र एक

पदार्थः
स्वभावजेन - शौर्यादिना
कौन्तेय - अर्जुन!
निबद्धः - बद्धः
स्वेन- आत्मीयेन
कर्मणा -कर्मणा
कर्तुं - कर्तुम्
इच्छसि - अभिलषसि
मोहात् अविवेकतः
करिष्यसि -करिष्यसि
अवशः - परवशः

अन्वयः
हे कौन्तेय !स्वभावजेन स्वेन कर्मणा निबद्धः मोहात् यत् कर्तुं न इच्छसि तत् अपि अवशः करिष्यसि ।

व्याकरणम्
▶सन्धिः
न + इच्छसि - गुणसन्धिः

Downloaded from www.omkaravidya.com

यत् + मोहात् - जश्त्वसन्धिः
करिष्यसि +अवशः- यण्सन्धिः
अवशः + अपि - विसर्गउकारः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१॥

पदच्छेदः
ईश्वरः सर्वभूतानां हृद्देशे अर्जुन तिष्ठति भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया

पदपरिचयः
ईश्वरः - अकार पु प्र एक
सर्वभूतानां - अकार नपु ष बहु
हृद्देशे - अकार पु स एक
अर्जुन - अकार पु सं प्र
तिष्ठति - लट् लकार प्रपु एक
भ्रामयन् - तकार पु प्र एक
सर्वभूतानि - अकार नपु द्वि बहु
यन्त्रारूढानि - अकार नपु द्वि बहु
मायया - आकार स्त्री तृ एक

Downloaded from www.omkaravidya.com

पदार्थः
ईश्वरः - अन्तर्यामी
सर्वभूतानां -सर्वप्राणिनां
हृद्देशे - हृदयमध्ये
अर्जुन - अर्जुन
तिष्ठति - स्थितिं लभते
भ्रामयन् - प्रवर्तयन्
सर्वभूतानि - सर्वभूतानि
यन्त्रारूढानि - यन्त्राधिष्ठितानि
मायया - छद्मना

अन्वयः
हे अर्जुन! ईश्वरः यन्त्रारूढानि सर्वभूतानि मायया भ्रामयन् सर्वभूतानां हृद्देशे तिष्ठति ।

व्याकरणम्
▶सन्धिः
हृद्देशे + अर्जुन - पूर्वरूपसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत् प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२॥

Downloaded from www.omkaravidya.com

पदच्छेदः
तम् एव शरणं गच्छ सर्वभावेन भारत तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्

पदपरिचयः
शरणं - अकार नपु द्वि एक
गच्छ - लोट् मपु एक
सर्वभावेन - अकार पु तृ एक
भारत - अकार पु सं प्र
प्रसादात् - अकार पु प एक
परां - आकार स्त्री द्वि एक
शान्तिं - इकार स्त्री द्वि एक
स्थानं - अकार नपु द्वि एक
प्राप्स्यसि - लृट् मपु एक
शाश्वतम् - अकार नपु द्वि एक

पदार्थः
शरणं- आश्रयम्
गच्छ - प्राप्नुहि
सर्वभावेन - सर्वात्मना
भारत - हे अर्जुन!
तत्प्रसादात् - ईश्वरानुग्रहात्
परां - श्रेष्ठाम्
शान्तिं - उपरतिम्
स्थानं - पदम्

Downloaded from www.omkaravidya.com

प्राप्स्यसि - अवाप्स्यसि
शाश्वतम् - नित्यम्

अन्वयः
हे भारत! (त्वं) सर्वभावेन तम् एव शरणं गच्छ । तत्प्रसादात् परां शान्तिं शाश्वतम् स्थानं प्राप्स्यसि ।

व्याकरणम्
▶सन्धिः
शरणं + गच्छ - अनुस्वारसन्धिः
परां + शान्तिं- अनुस्वारसन्धिः
शान्तिं + स्थानं - अनुस्वारसन्धिः
तत् प्रसादात् - षष्ठीतत्पुरुषः तस्मात्

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुतु ॥६३॥

पदच्छेदः
इति ते ज्ञानम् आख्यातं गुह्याद् गुह्यतरं मया विमृश्य एतत् अशेषेण यथा इच्छसि तथा कुतु

पदपरिचयः
ज्ञानम् - अकार नपु प्र एक

Downloaded from www.omkaravidya.com

आख्यातं - अकार नपु प्र एक

गुह्याद् - अकार नपु प एक

गुह्यतरं - अकार नपु प्र एक

विमृश्य - ल्यबन्तम्

अशेषेण - अकार पु तृ एक

इच्छसि - लट् मपु एक

कुरु - लोट् मपु एक

पदार्थः

ज्ञानम् -ज्ञानम्

आख्यातं - कथितम्

गुह्याद् - गोप्यात्

गुह्यतरं -गुह्यतरं

विमृश्य - आलोचनं कृत्वा

अशेषेण - समस्तम्

इच्छसि -इच्छसि

कुरु - कुरु

अन्वयः

मया गुह्याद् गुह्यतरं ज्ञानम् ते आख्यातं एतत् अशेषेण विमृश्य
यथा इच्छसि तथा कुरु ।

व्याकरणम्

▶सन्धिः

विमृश्य + एतत् - वृद्धिसन्धिः

एतत् + अशेषेण - जश्त्वसन्धिः

Downloaded from www.omkaravidya.com

यथा + इच्छसि - गुणसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

सर्वगुह्यतमं भूयः श्रृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४॥

पदच्छेदः
सर्वगुह्यतमं भूयः श्रृणु मे परमं वचः इष्टः असि मे दृढम् इति ततः वक्ष्यामि ते हितम्

पदपरिचयः
सर्वगुह्यतमं - अकार नपु द्वि एक
श्रृणु - लोट् मपु एक
परमं - अकार नपु द्वि एक
वचः - सकार नपु द्वि एक
इष्टः - अकार पु प्र एक
असि - लट् मपु एक
दृढम् - अव्ययम्
वक्ष्यामि - लृट् उपु एक
हितम् - अकार पु द्वि एक

Downloaded from www.omkaravidya.com

पदार्थः

सर्वगुह्यतमं - अत्यन्तरहस्यम्

श्रृणु - आकर्ण्य

परमं - प्रकृष्टम्

वचः - वाक्यम्

इष्टः - प्रियः

असि -असि

मे - मम

दृढम् - दृढम्

वक्ष्यामि - कथयिष्यामि

ते - तव

हितम् -श्रेयस्करम्

अन्वयः

भूयः परमं सर्वगुह्यतमं मे वचः श्रृणु । (त्वम्) मे दृढम् इष्टः असि इति ततः ते हितम् वक्ष्यामि ।

व्याकरणम्

▶सन्धिः

इष्टः + असि - विसर्गउकारःपूर्वरूपसन्धिः

ततः + वक्ष्यामि- विसर्गउकारः



Downloaded from www.omkaravidya.com

मूलश्लोकः

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५॥

पदच्छेदः
मन्मनाः भव मद्भक्तः मद्याजी मां नमस्कुरु माम् एव एष्यसि सत्यं ते प्रतिजाने प्रियः असि मे

पदपरिचयः
मन्मनाः - सकार पु प्र एक
भव - लोट् मपु एक
मद्भक्तः - अकार पु प्र एक
मद्याजी - नकार पु प्र एक
नमस्कुरु - लोट् मपु एक
एष्यसि - लृट् लकार मपु एक
सत्यं - अकार नपु प्र एक
प्रतिजाने - लट् उपु एक
प्रियः - अकार पु प्र एक
असि - लट् मपु एक

पदार्थः
मन्मनाः - मच्चित्तः
भव - भव
मद्भक्तः - मद्भजनः
मद्याजी - मद्यजनशीलः

Downloaded from www.omkaravidya.com

नमस्कुरु - नमस्कारं कुरु
एष्यसि - प्राप्स्यसि
सत्यं - सत्यम्
प्रतिजाने - प्रतिज्ञां केरोमि
प्रियः - इष्टः
असि - भवसि

अन्वयः
मन्मनाः मद्भक्तः मद्याजी भव ।(त्वम्) मां नमस्कुरु । (त्वं) माम् एव एष्यसि । (अहं) ते  सत्यं प्रतिजाने । (त्वं) मे प्रियः असि ।

व्याकरणम्
▶सन्धिः
मद्भक्तः + मद्याजी - विसर्गउकारः
एव +  एष्यसि - वृद्धिसन्धिः
प्रियः + असि - विसर्गउकारः पूर्वरूपसन्धिः

▶ समासः
मयि मनः यस्य सः - मन्मनाः- व्यधिकरणबहुव्रीहिसमासः
मम भक्तः- मद्भक्तः - षष्ठीतत्पुरुषः
मम याजी - मद्याजी - षष्ठीतत्पुरुषः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

Downloaded from www.omkaravidya.com

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच : ॥६६॥

पदच्छेदः
सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज अहं त्वा सर्वपापेभ्य: मोक्षयिष्यामि मा शुच

पदपरिचयः
सर्वधर्मान् - अकार पु द्वि बहु
परित्यज्य - ल्यबन्तम्
एकं - अकार पु द्वि एक
शरणं - अकार नपु द्वि एक
व्रज - लोट् मपु एक
सर्वपापेभ्य: - अकार नपु प बहु
मोक्षयिष्यामि - लृट् लकार: उपु एक
शुचः - लट् मपु एक

पदार्थः
सर्वधर्मान् - सकलधर्माधर्मान्
परित्यज्य - सन्न्यस्य
एकं - सर्वात्मानम्
शरणं - आश्रयम्
व्रज- प्राप्नुहि
सर्वपापेभ्य: - सर्वधर्माधर्मबन्धनरूपेभ्य:
मोक्षयिष्यामि - निवर्तयिष्यामि

Downloaded from www.omkaravidya.com

शुचः - शोकं मा कार्षीः

अन्वयः
सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज अहं त्वा सर्वपापेभ्यः मोक्षयिष्यामि । मा शुचः ।

व्याकरणम्
▶सन्धिः
सर्वपापेभ्यः + मोक्षयिष्यामि - विसर्गउकारः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

इदं ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७॥

पदच्छेदः
इदं ते न अतपस्काय न अभक्ताय कदाचन न च अशुश्रूषवे वाच्यं न च मां यः अभ्यसूयति

पदपरिचयः
अतपस्काय - अकार पु च एक
अभक्ताय - अकार पु च एक
अशुश्रूषवे - उकार पु च एक
वाच्यं - अकार नपु प्र एक

Downloaded from www.omkaravidya.com

अभ्यसूयति - लट् प्रपु एक

पदार्थः

अतपस्काय - तपोरहिताय

अभक्ताय - गुरुदेवभक्तिरहिताय

अशुश्रूषवे - असेविने

वाच्यं - वक्तव्यम्

अभ्यसूयति - न सहते

अन्वयः

इदं अतपस्काय कदाचन ते न वाच्यं । अभक्ताय न (वाच्यं) । अशुश्रूषवे च न (वाच्यं) । यः माम् अभ्यसूयति (तस्मै) च न (वाच्यं) ।

व्याकरणम्

▶सन्धिः

न + अतपस्काय - सवर्णदीर्घसन्धि:

न + अभक्ताय- सवर्णदीर्घसन्धि:

च +अशुश्रूषवे - सवर्णदीर्घसन्धि:

यः + अभ्यसूयति - विसर्गउकार: पूर्वरूपसन्धि:

▶ समास:

न तपस्कः - अतपस्कः - नञ्तत्पुरुषः

न भक्तः - अभक्तः - नञ्तत्पुरुषः

न शुश्रूषुः - अशुश्रुषुः - नञ्तत्पुरुषः



Downloaded from www.omkaravidya.com

मूलश्लोकः

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि  परां कृत्वा मामेवैष्यत्यसंशयः ॥६८॥

पदच्छेदः
यः इमं परमं गुह्यं मद्भक्तेषु अभिधास्यति भक्तिं मयि  परां कृत्वा माम् एव एष्यति असंशयः

पदपरिचयः
परमं - अकार नपु द्वि एक
गुह्यं - अकार नपु द्वि एक
मद्भक्तेषु - अकार पु स बहु
अभिधास्यति - लृट् प्रपु एक
भक्तिं - इकार स्त्री द्वि एक
परां - आकार स्त्री द्वि एक
कृत्वा - क्त्वान्तम्
एष्यति - लृट् प्रपु एक
असंशयः - अकार पु प्र एक

पदार्थः
परमं - निःश्रेयसार्थम्
गुह्यं - गोप्यम्
मद्भक्तेषु - मयि भक्तमत्सु
अभिधास्यति - वक्ष्यति
भक्तिं - भक्तिम्

Downloaded from www.omkaravidya.com

परां - श्रेष्ठाम्
कृत्वा -कृत्वा
एष्यति - प्राप्स्यति
असंशय: - न संशय:

अन्वयः
य: परमं गुह्यं इमं (गीता शासत्रम्) मद्भक्तेषु अभिधास्यति (स:) मयि परां भक्तिं कृत्वा माम् एव एष्यति । असंशय: ।

व्याकरणम्
▶सन्धिः
य: + इमं - विसर्गलोप:
मद्भक्तेषु + अभिधास्यति - यण्सन्धि:
एव + एष्यति - वृद्धिसन्धि:
एष्यति + असंशय: - यण्सन्धि:

▶ समासः
मयि भक्तमत्सु - सप्तमीतत्पुरुष:

श्रीमद्भगवद्गीता - अष्टादशोऽध्याय: - मोक्षसंन्यासयोग:

मूलश्लोकः

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तम: ।
भविता न च मे तस्मादन्य: प्रियतरो भुवि ॥ ६९॥

Downloaded from www.omkaravidya.com

पदच्छेदः
न च तस्मात् मनुष्येषु कश्चित् मे प्रियकृत्तमः भविता न च मे तस्मात् अन्यः प्रियतरः भुवि

पदपरिचयः
मनुष्येषु - अकार पु स बहु
प्रियकृत्तमः - अकार पु प्र एक
भविता - लुट् प्रपु एक
अन्यः - अकार पु प्र एक
प्रियतरः - अकार पु प्र एक
भुवि - ऊकार स्त्री स एक

पदार्थः
मनुष्येषु - मनुष्याणां मध्ये
प्रियकृत्तमः - अतिशयेन प्रियकृत्
भविता - भविष्यति अपि
अन्यः - इतरः
प्रियतरः - इष्टतरः
भुवि - अस्मिन् लोके

अन्वयः
तस्मात् च मनुष्येषु न कश्चित् मे प्रियकृत्तमः तस्मात् च अन्यः प्रियतरः मे भुवि न भविता ।

व्याकरणम्

Downloaded from www.omkaravidya.com

▶सन्धिः

तस्मात् + मनुष्येषु - अनुनासिकासन्धिः

कश्चित् + मे - अनुनासिकासन्धिः

तस्मात् + अन्यः - जश्त्वसन्धिः

प्रियतरः + भुवि - विसर्गउकारः

## श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥७०॥

पदच्छेदः

अध्येष्यते च यः इमं धर्म्यं संवादम् आवयोः ज्ञानयज्ञेन तेन अहम् इष्टः स्याम् इति मे मतिः

पदपरिचयः

अध्येष्यते - लृट् प्रपु एक

धर्म्यं - अकार पु द्वि एक

संवादम् - अकार पु द्वि एक

ज्ञानयज्ञेन - अकार पु तृ एक

इष्टः - अकार पु प्र एक

स्याम् - विधि उपु एक

मतिः - इकार स्त्री प्र एक

पदार्थः

Downloaded from www.omkaravidya.com

अध्येष्यते - पठिष्यति
धर्म्यं - धर्मात् अनपेतम्
संवादम् - सम्भाषणम्
ज्ञानयज्ञेन - ज्ञानरूपयागेन
इष्टः - पूजितः
स्याम् - भवेयम्
मतिः - निश्चयः

अन्वयः
यः च आवयोः इमं धर्म्यं संवादम् अध्येष्यते तेन अहम् ज्ञानयज्ञेन इष्टः स्याम् इति मे मतिः ।

व्याकरणम्
▶सन्धिः
तेन + अहम् - सवर्णदीर्घसन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

श्रद्धावाननसूयश्च श्रृणुयादपि यो नरः ।
सोऽपि मुक्तः शुभांल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥७१॥

पदच्छेदः
श्रद्धावान् अनसूयः च श्रृणुयात् अपि यः नरः सः अपि मुक्तः शुभान् लोकान् प्राप्नुयात् पुण्यकर्मणाम्

Downloaded from www.omkaravidya.com

पदपरिचयः

श्रद्धावान् - तकार पु प्र एक

अनसूयः - अकार पु प्र एक

श्रृणुयात्  - विधि प्रपु एक

नरः - अकार पु प्र एक

मुक्तः - अकार पु प्र एक

शुभान् - अकार पु द्वि बहु

लोकान् - अकार पु द्वि बहु

प्राप्नुयात् - विधि प्रपु एक

पुण्यकर्मणाम् - नकार नपु ष बहु

पदार्थः

श्रद्धावान् - श्रद्दधानः

अनसूयः - असूयावर्जितः

श्रृणुयात् - आकर्णयेत्

नरः - पुरुषः

मुक्तः - विमुक्तः

शुभान् - प्रशस्तान्

लोकान् -लोकान्

प्राप्नुयात् - गच्छेत्

पुण्यकर्मणाम् - अग्निहोत्रादिकर्मवताम्

अन्वयः

श्रद्धावान् अनसूयः यः नरः च श्रृणुयात् अपि  सः अपि मुक्तः पुण्यकर्मणाम् शुभान् लोकान् प्राप्नुयात्  ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

अनसूयः + च - विसर्गसकारः

श्रृणुयात् + अपि - जश्त्वसन्धिः

यः + नरः - विसर्गउकारः

सः + अपि- विसर्गउकार:पूर्वरूपसन्धिः

शुभान् + लोकान् - परसवर्णसन्धिः

▶ समासः

अनसूयः न विद्यते असूया यस्मिन् सः - नञ्बहुव्रीहिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसम्मोहः प्रणष्टस्ते धनञ्जय ॥ ७२॥

पदच्छेदः

कच्चित् एतत् श्रुतं पार्थ त्वया एकाग्रेण चेतसा कच्चित् अज्ञानसम्मोहः प्रणष्टः ते धनञ्जय

पदपरिचयः

श्रुतं - अकार नपु प्र एक

पार्थ - अकार पु सं प्र

Downloaded from www.omkaravidya.com

एकाग्रेण - अकार नपु तृ एक
चेतसा - सकार नपु तृ एक
अज्ञानसम्मोहः - अकार पु प्र एक
प्रणष्टः - अकार पु प्र एक
धनञ्जय - अकार पु सं प्र

पदार्थः
श्रुतं - आकर्णितम्
पार्थ - अर्जुन
एकाग्रेण - अवहितेन
चेतसा - चित्तेन
अज्ञानसम्मोहः - अज्ञाननिमित्तसम्मोहः
प्रणष्टः - अपगतः
धनञ्जय - हे अर्जुब

अन्वयः
हे पार्थ ! त्वया एकाग्रेण चेतसा एतत् श्रुतं कच्चित् ? हे धनञ्जय ! कच्चित् ते (तव) अज्ञानसम्मोहः प्रणष्टः (कच्चित्) ?

व्याकरणम्
▶सन्धिः
कच्चित् + एतत् - जश्त्वसन्धिः
एतत् + श्रुतं - श्चुत्वसन्धिः छत्वसन्धिः
त्वया + एकाग्रेण -वृद्धिसन्धिः
कच्चित् + अज्ञानसम्मोहः - जश्त्वसन्धिः

Downloaded from www.omkaravidya.com

प्रणष्टः + ते - विसर्गसकारः

▶ समासः

अज्ञानात् सम्मोहः -पञ्चमीतत्पुरुषः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥ ७३॥

पदच्छेदः

नष्टः मोहः स्मृतिः लब्धा त्वत्प्रसादात् मया अच्युत स्थितः अस्मि गतसन्देहः करिष्ये वचनं तव

पदपरिचयः

नष्टः - अकार पु प्र एक

मोहः- अकार पु प्र एक

स्मृतिः- इकार स्त्री प्र एक

लब्धा - आकार स्त्री प्र एक

त्वत्प्रसादात् - अकार पु प एक

अच्युत -अकार पु सं प्र

स्थितः - अकार पु प्र एक

गतसन्देहः - अकार पु प्र एक

करिष्ये - लृट् लकार उपु एक

Downloaded from www.omkaravidya.com

वचनं - अकार नपु द्वि एक

पदार्थः

नष्टः - प्रणष्टः

मोहः - अविवेकः

स्मृतिः - आत्मतत्त्वविषया

लब्धा - प्राप्ता

त्वत्प्रसादात् - तव अनुग्रहात्

अच्युत - हे कृष्ण

स्थितः - भूतः

गतसन्देहः - मुक्तसंशयः

करिष्ये - आचरिष्यामि

वचनं - आज्ञाम्

अन्वयः

हे अच्युत! त्वत्प्रसादात् मोहः नष्टः मया स्मृतिः लब्धा गतसन्देहः स्थितः अस्मि तव वचनं करिष्ये ।

व्याकरणम्

▶सन्धिः

नष्टः + मोहः - विसर्गउकारः

स्मृतिः + लब्धा - विसर्गरेफः

त्वत्प्रसादात् + मया - अनुनासिकासन्धिः

मया + अच्युत - सवर्णदीर्घसन्धिः

स्थितः + अस्मि - विसर्गउकारः पूर्वरूपसन्धिः

Downloaded from www.omkaravidya.com

▶ समासः
गतः संदेहः यस्य सः - समानाधिकरणबहुव्रीहिसमासः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

सञ्जय उवाच
इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥ ७४॥

पदच्छेदः
इति अहं वासुदेवस्य पार्थस्य च महात्मनः संवादम् इमम् अश्रौषम् अद्भुतं रोमहर्षणम्

पदपरिचयः
वासुदेवस्य - अकार पु ष एक
पार्थस्य - अकार पु ष एक
महात्मनः- नकार पु ष एक
संवादम् - अकार पु द्वि एक
अश्रौषम् - लुङ् उपु एक
अद्भुतं - अकार नपु द्वि एक
रोमहर्षणम् - अकार नपु द्वि एक

Downloaded from www.omkaravidya.com

पदार्थः
वासुदेवस्य - कृष्णस्य
पार्थस्य - अर्जुनस्य
महात्मनः - महानुभावस्य
संवादम् - सम्भाषणम्
अश्रौषम् - श्रुतवान्
अद्भुतं - अत्यन्तविस्मयकरम्
रोमहर्षणम् - रोमाञ्चकरम्

अन्वयः
सञ्जय उवाच
महात्मनः वासुदेवस्य पार्थस्य अद्भुतं रोमहर्षणम् संवादम् इति अहम् अश्रौषम् ।

व्याकरणम्
▶सन्धिः
इति + अहम् - यण्सन्धिः

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

व्यासप्रसादाच्छ्रुतवानेतद् गुह्यमहं परम् ।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥७५॥

पदच्छेदः

Downloaded from www.omkaravidya.com

व्यासप्रसादात् श्रुतवान् एतद् गुह्यम् अहं परम् योगं योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयम्

पदपरिचयः

व्यासप्रसादात् - अकार पु प एक

श्रुतवान् - तकार पु प्र एज

गुह्यम् - अकार नपु द्वि एक

परम् - अकार नपु द्वि एक

योगं - अकार पु द्वि एक

योगेश्वरात् - अकार पु प एक

कृष्णात् - अकार पु प एक

कथयतः - तकार पु प एक

स्वयम् - अव्ययम्

पदार्थः

व्यासप्रसादात् - व्यासस्य अनुग्रहात्

श्रुतवान् - आकर्णितवान्

गुह्यम् - गोप्यम्

परम् - श्रेष्ठम्

योगं - सम्वादम्

योगेश्वरात् - परमेश्वरात्

कृष्णात् - श्रीकृष्णतः

साक्षात् – साक्षात् कथयतः - वदतः

अन्वयः

व्यासप्रसादात् एतद् गुह्यम् परम् योगं योगेश्वरात् कृष्णात् स्वयम् साक्षात् कथयतः अहं श्रुतवान् ।

Downloaded from www.omkaravidya.com

व्याकरणम्

▶सन्धिः

व्यासप्रसादात् + श्रुतवान् - श्चुत्वसन्धिः छत्वसन्धिः

▶समासः

योगानाम् ईश्वरः - योगेश्वरः - षष्ठीतत्पुरुषः - तस्मात्

श्रीमद्भगवद्गीता - अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥७६॥

पदच्छेदः

राजन् संस्मृत्य संस्मृत्य संवादम् इमम् अद्भुतम् केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः

पदपरिचयः

राजन् - नकार पु सं प्र

संस्मृत्य - ल्यबन्तम्

संस्मृत्य - ल्यबन्तम्

संवादम् - अकार पु द्वि एक

अद्भुतम् - अकार पु द्वि एक

केशवार्जुनयोः - अकार पु ष द्वि

Downloaded from www.omkaravidya.com

पुण्यं  - अकार नपु द्वि एक
हृष्यामि - लट् उपु एक
मुहुर्मुहुः - अव्ययम्

पदार्थः
राजन् - हे धृतराष्ट्र !
संस्मृत्य  - स्मृत्वा
संस्मृत्य - विचिन्त्य
संवादम् - सम्भाषणम्
अद्भुतम् - आश्चर्यम्
केशवार्जुनयोः - श्रीकृष्णार्जुनयोः
पुण्यं - पापहरम्
हृष्यामि - सन्तोषम् अनुभवामि
मुहुर्मुहुः - भूयः भूयः

अन्वयः
हे राजन् केशवार्जुनयोः इम् अद्भुतम् पुण्यं संवादम् संस्मृत्य संस्मृत्य मुहुर्मुहुः च हृष्यामि ।

व्याकरणम्
▶सन्धिः
मुहुः + मुहुः - विसर्गरेफः
▶ कृदन्ताः
संस्मृत्य - सम् + स्मृ + ल्यप् प्रत्ययः



Downloaded from www.omkaravidya.com

मूलश्लोकः

तच्च संस्मृत्य  संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान् राजन्हृष्यामि च पुनः पुनः ॥७७॥

पदच्छेदः
तत् च संस्मृत्य  संस्मृत्य रूपम् अत्यद्भुतं हरेः विस्मयः मे महान् राजन् हृष्यामि च पुनः पुनः

पदपरिचयः
संस्मृत्य - ल्यबन्तम्
संस्मृत्य - ल्यबन्तम्
रूपम् - अकार नपु द्वि एक
अत्यद्भुतं  - अकार नपु द्वि एक
हरेः - इकार पु ष एक
विस्मयः - अकार पु प्र एक
महान् - तकार पु प्र एक
राजन् -नकार पु सं प्र
हृष्यामि - लट् उपु एक

पदार्थः
संस्मृत्य  - विचिन्त्य
रूपम् -  रूपम्
अत्यद्भुतं - विश्वरूपम्

Downloaded from www.omkaravidya.com

हरेः - कृष्णस्य
विस्मयः - आश्चर्यम्
महान् - अधिकः
राजन् - हे धृतराष्ट्र !
हृष्यामि - सन्तोषं अनुभवामि

अन्वयः
हे राजन् ! हरेः अत्यद्भुतं तत् च रूपं संस्मृत्य  संस्मृत्य मे महान् विस्मयः पुनः पुनः  हृष्यामि च ।

व्याकरणम्
▶सन्धिः
तत् + च -श्चुत्वसन्धिः
विस्मयः + मे - विसर्गउकारः

श्रीमद्भगवद्गीता  -  अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥७८॥

पदच्छेदः
यत्र योगेश्वरः कृष्णः यत्र पार्थः धनुर्धरः तत्र श्रीः विजयः भूतिः ध्रुवा नीतिः मतिः मम

Downloaded from www.omkaravidya.com

पदपरिचयः

योगेश्वरः - अकार पु प्र एक

कृष्णः - अकार पु प्र एक

पार्थः - अकार पु प्र एक

धनुर्धरः - अकार पु प्र एक

श्रीः - ईकार स्त्री प्र एक

विजयः - अकार पु प्र एक

भूतिः - इकार स्त्री प्र एक

ध्रुवा - आकार स्त्री प्र एक

नीतिः - इकार स्त्री प्र एक

मतिः - इकार स्त्री प्र एक

पदार्थः

योगेश्वरः - योगानाम् ईश्वरः

कृष्णः - केशवः

पार्थः - अर्जुनः

धनुर्धरः - गाण्डीवधारी

श्रीः - राज्यलक्ष्मीः

विजयः- जयः

भूतिः - ऐश्वर्यम्

ध्रुवा - अव्यभिचारिणी

नीतिः - न्यायः

मतिः - मतम्

अन्वयः

Downloaded from www.omkaravidya.com

यत्र योगेश्वरः कृष्णः यत्र धनुर्धरः पार्थः तत्र श्रीः विजयः भूतिः  ध्रुवा नीतिः (इति) मम  मतिः ।

व्याकरणम्

▶सन्धिः

कृष्णः + यत्र - विसर्गउकारः

पार्थः + धनुर्धरः - विसर्गउकारः

श्रीः+  विजयः - विसर्गरेफः

विजयः +भूतिः - विसर्गउकारः

भूतिः + ध्रुवा - विसर्गरेफः

नीतिः+ मतिः - विसर्गरेफः

मतिः + मम- विसर्गरेफः

श्रीमद्भगवद्गीता  -  अष्टादशोऽध्यायः - मोक्षसंन्यासयोगः

मूलश्लोकः

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नाम अष्टादशोऽध्यायः ॥ १८॥

पदच्छेदः

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगः नाम अष्टादशः अध्यायः

पदपरिचयः

Downloaded from www.omkaravidya.com

ॐ - अव् धातुः + मन् प्रत्ययः

तत् - दकार. नपु. पु एक

सत् - दकार. नपु. प्र एक

इति - अव्ययम्

श्रीमद्भगवद्गीतासु - आकार. स्त्री स. बहु

उपनिषत्सु - दकार. स्त्री स बहु

ब्रह्मविद्यायां - आकार. स्त्री स एक

योगशास्त्रे - अकार. नपु. स. एक

श्रीकृष्णार्जुनसंवादे - अकार. पु. स. एक

मोक्षसंन्यासयोगः- अकार. पु. प्र. एक

नाम - नकार.नपु. प्र एक

अष्टादशः - अकार. पु. प्र एक

अध्यायः - अकार. पु. प्र एक

पदार्थः

ॐ - ओम्

तत् - तत्

सत् - सत्

इति - एवम्

श्रीमद्भगवद्गीतासु - श्रीमद्भगवद्गीतासु

उपनिषत्सु - उपनिषत्सु

ब्रह्मविद्यायां - ब्रह्म पाठे

योगशास्त्रे - योगशास्त्रे

श्रीकृष्णार्जुनसंवादे - श्रीकृष्णर्जुनयोः मध्ये संवादे

मोक्षसंन्यासयोगः - मोक्षसंन्यासयोगः

नाम - नाम

Downloaded from www.omkaravidya.com

अष्टादशः - अष्टादशः

अध्यायः - अध्यायः

अन्वयः

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगः नाम अष्टादशः अध्यायः (संपूर्णम् भवति) ।

व्याकरणम्

▶सन्धिः

श्रीमद्भगवद्गीतासु + उपनिषत्सु - सवर्णदीर्घसन्धिः

योगः + नाम - विसर्ग उकारः

अष्टादशः + अध्यायः - विसर्ग उकारः पूर्वरूपसन्धिः

▶ समासः

ब्रह्मविद्यायां - ब्रह्म इति विद्या - संभावनापूर्वपदकर्मधारयः

॥ श्री कृष्णार्पणमस्तु ॥

Downloaded from www.omkaravidya.com